
पलाश, बेल, पीपल या गूलर में से किसी एक का दण्ड, मुंज और मेखला धारण करके और यज्ञोपवीत को छोड़कर जो इस उपनिषद् को भलीभाँति जान लेता है, वही शूरवीर है।

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुरायतम् ॥9॥

जो परमात्मा आकाश में प्रकाशमान सूर्यमण्डल की तरह परम व्योम में चिन्मय तेज से सर्वव्याप्त है, उस विष्णु के परमपद को विद्वान् लोग सर्वदा देखा ही करते हैं।

तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत् परमं पदमिति। एवं निर्वाणानुशासनं वेदानुशासनम्। इत्युपनिषत् ॥10॥

इति आरुण्युपनिषत्समाप्ता।

ऐसे भगवान् विष्णु के उस परमधाम का विद्वान् उपासक, जो साधना में लगे रहनेवाले हैं, वे निष्काम ब्राह्मण वहाँ पहुँचकर उस परमधाम को प्रदीप्त करते रहते हैं। वह विष्णु का परमधाम है। ऐसे यह निर्वाण का अनुशासन है। वेद का अनुशासन है। उपनिषदत् पूर्ण हुई।

यहाँ आरुण्युपनिषत् पूरी हुई।

शान्तिपाठः

ॐ आप्यायन्तु ममाङ्गानि........ते मयि सन्तु। (पूर्ववत्)

ॐ शान्तिः शान्तिः शान्तिः ॥

❋

(17) गर्भोपनिषत्

(उपनिषत्परिचय)

इस कृष्णयजुर्वेदीय उपनिषद् में शरीर की पांचभौतिकता आदि का वर्णन किया गया है। और साथ ही साथ पूर्व कर्मों के अनुसार माता के गर्भ में आए हुए जीवात्मा की दशा का वर्णन बड़े मार्मिक ढंग से किया गया है। गर्भ में जीव भयंकर दुःख से पीड़ित होकर जो प्रार्थना करता है, वह प्रार्थना बड़ी संवेदनात्मक है। प्रवर्तमान काल की महिलाएँ यदि भ्रूणहत्या करवाते समय भ्रूण की पीड़ा का इलेक्ट्रोनिक फिल्म से वह दृश्य देखें तो अवश्य ही वे थर्रा उठेंगी। इसका प्रमाण है कि बहुत-सी विदेशी महिलाएँ ऐसी फिल्में देखकर बेहोश-सी हो गयी थीं।

शान्तिपाठः

ॐ सह नाववतु। सह नौ.........मा विद्विषावहै। (पूर्ववत्)
ॐ शान्तिः शान्ति शान्तिः॥

इसका हिन्दी रूपान्तर पूर्व में (ब्रह्मोपनिषद् में) द्रष्टव्य है।

पञ्चात्मकं पञ्चसु वर्तमानं षडाश्रयं षड्गुणयोगयुक्तम्।
तं सप्तधातुं (द्वि)त्रिमलं त्रियोनिं चतुर्विधाहारमयं शरीरम्॥1॥

यह शरीर पंचभूतात्मक है, पाँच इन्द्रियों में रहा करता है, छः रसों का आश्रय है, और छः गुणों के योग से युक्त है। वह सात धातुवाला है, (दो) तीन प्रकार के मलोंवाला, तीन प्रकार की योनिवाला और चार प्रकार के आहार से युक्त है।

पञ्चात्मकमिति कस्मात्? पृथिव्यप्तेजोवाय्वाकाशमिति। अस्मिन् पञ्चात्मके शरीरे का पृथिवी का आपः किं तेजः को वायुः किमाकाशमिति। अस्मिन् पञ्चात्मके शरीरे यत्कठिनं सा पृथिवी, यद् द्रवं तदापः, यदुष्णं तत्तेजः, यत् सञ्चरति स वायुः, यत् सुषिरं तदाकाशमित्युच्यते॥2॥

इसे पञ्चात्मक क्यों कहा गया है? क्योंकि पृथ्वी, जल, तेज, वायु और आकाश—ये पाँच तत्त्व हैं। तो इस पञ्चात्मक शरीर में पृथ्वी कौन सी है? जल कौन सा है? तेज कौन सा है? वायु कौन सा है? और आकाश कौन सा है? तो इस पञ्चात्मक शरीर में जो कठिन भाग है वह पृथ्वी है, जो द्रव (प्रवाही) है वह जल है, जो उष्ण (गरम) है वह तेज है, जो परिभ्रमण करता है वह वायु है और जो शून्य (खाली) है वह आकाश है—ऐसा कहा जाता है।

तत्र पृथिवी धारणे आपः पिण्डीकरणे तेजो रूपदर्शने वायुर्गमने आकाशमवकाशप्रदाने॥3॥

इसमें से पृथ्वी का कार्य शरीर को धारण करना है, जल का कार्य उसे संयुक्त रखने का है, तेज का कार्य उसे प्रकाश देना है, वायु का कार्य उसमें गति प्रदान करना है और आकाश का कार्य उसे अवकाश देने का है। ('तेजोरूप दर्शने' के बदले कहीं-कहीं 'तेजः प्रकाशने' ऐसा पाठ भी मिलता है, पर दोनों के अर्थ में कुछ खास अन्तर नहीं है)।

पृथक् चक्षुःश्रोत्रे चक्षुषी रूपे जिह्वोपस्थश्चानन्दोऽपाने चोत्सर्गो बुद्ध्या बुध्यति मनसा सङ्कल्पयति वाचा वदति ॥4॥

पञ्चात्मक शरीर के चक्षु आदि अवयव भी रूप आदि कर्म में पृथक् (अलग) निर्दिष्ट किए जाते हैं। श्रोत्र शब्द में और चक्षु रूप में विनियुक्त है। इसी प्रकार जिह्वा रसास्वाद में नियोजित है। (यहाँ कहा गया केवल श्रोत्र, चक्षु और जिह्वा का ग्रहण त्वक् और घ्राणेन्द्रिय को भी उपलक्षित कर देता है, ऐसा समझना चाहिए)। उपस्थ आनन्द है और अपान में उत्सर्ग कर्म होता है। मनुष्य बुद्धि से जानता है, मन से संकल्प करता है और वाणी से बोलता है।

षडाश्रयमिति कस्मात्? मधुराम्ललवणतिक्तकटुकषायरसान् विन्दत इति ॥5॥

यह शरीर 'षडाश्रय' है, ऐसा क्यों कहा गया है? (उत्तर यह है कि) यह शरीर मीठा, खारा, खट्टा, तीखा, कडुआ और कसेला—ऐसे छः रसों पर आधारित है।

षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाश्चेतीष्टानिष्टशब्दसंज्ञाः प्रतिविधाः भवन्ति ॥6॥

षड्ज, ऋषभ, गान्धार, मध्यम, पंचम, धैवत और निषाद एवं इष्ट और अनिष्ट ऐसे बहुत प्रकार के शब्द होते हैं, शब्द के गुण हैं। (कहीं-कहीं 'प्रतिविधाः' के बदले 'प्रणिधानाद्दशविधाः'—ऐसा पाठ भी है जिसके अनुसार अर्थ होगा—सात स्वर+दो इष्ट-अनिष्ट+प्रणिधान=इस प्रकार कुल मिलाकर दस प्रकार के स्वरगुण होते हैं)।

शुक्लो रक्तः कृष्णो धूम्रः पीतः कपिलः पाण्डरः सप्त धातव इति कस्मात्? यदा देवदत्तस्य द्रव्यविषया जायन्ते परस्पररसोगुणत्वात्। षड्विधो रसः। रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसोऽस्थीनि अस्थिभ्यो मज्जा मज्जायाः शुक्लं शुक्लशोणितसंयोगादावर्तते गर्भो हृदि व्यवस्थां नयति हृदयेऽभ्यन्तराऽग्निः अग्निस्थाने पित्तं पित्तस्थाने वायुः वायुस्थाने हृदयं प्राजापत्य ऋतुकाले सम्प्रयोगतः ॥7॥

सफेद, लाल, काला, भूरा, पीला, कपिल और पाण्डर—ये सात धातु के गुण हैं। परन्तु सात धातुएँ कही हैं वह कैसे? (सुनो। किसी) देवदत्त को भोग भोगने की अन्यान्य रसादि के गुणों से (आकर्षित होकर) इच्छाएँ होती हैं, तब वह जो छः प्रकार का रस है, उस रस से शोणित बनता है उस शोणित (रक्त) से मांस बनता है, मांस से चर्बी उत्पन्न होती है, चरबी से हड्डियाँ पैदा होती हैं, हड्डियों से मज्जा पैदा होती है औरं मज्जा में से वीर्य पैदा होता है। (कहीं-कहीं 'मेदसः स्नायवः स्नायुभ्योऽस्थीनि'—ऐसा भी पाठ है, तदनुसार 'चरबी से स्नायु और स्नायु से हड्डियाँ बनती हैं'—ऐसा अर्थ करना चाहिए)। उस वीर्य का जब स्त्री के रज़ के साथ संयोग होता है, तब गर्भ उत्पन्न होता है। वह गर्भ जठर में रहता है ऐसी व्यवस्था है। वहाँ जठर के भीतर अग्नि (उष्णता) भी है, और

मूलाधार में पित्त का जल – प्रवाही – भी है तथा स्वाधिष्ठान प्रदेश में प्राणवायु भी है। अतः उष्णता, जल और वायु से जठराग्निस्थित गर्भ सुरक्षित रहता है। प्रजापति द्वारा व्यवस्थापित ऋतुकाल में ही स्त्री-पुरुष संयोग से गर्भ उत्पन्न होता है।

एकरात्रोषितं कलिलं भवति। सप्तरात्रोषितं बुद्बुदं भवति। अर्धमासा-भ्यन्तरेण कठिनो भवति। मासद्वयेन शिरः कुरुते (सम्पद्यते)। मास-त्रयेण पादप्रदेशो भवति। अथ चतुर्थे मासे जठरकटिप्रदेशो भवति। पञ्चमे मासे पृष्ठवंशो भवति। षष्ठे मासे नासाक्षिश्रोत्राणि भवन्ति। सप्तमे मासे जीवसंयुक्तो भवति। अष्टमे मासे सर्वसम्पूर्णो भवति ॥8॥

ऋतुकाल में स्त्रीसंभोग से उत्पन्न वह गर्भ एक रात्रि में छोटी बूँद जैसा होता है, सात रात्रि में वह बड़े बुद्बुदे-सा हो जाता है, पंद्रह दिनों में वह पिण्डाकार (कठिन) हो जाता है, दो महीनों में उसका सिर उत्पन्न होता है, तीन महीनों में पैर आदि विभाग उत्पन्न होता है और चार मास होते-होते उसके जठर और कमर का भाग उत्पन्न होता है। पाँचवें महीने में उसकी पीठ का भाग बनता है, छठे महीने में मुख, नासिका, आँख, कान आदि अवयव फूट निकलते हैं। सातवें महीने में उसमें जीव संचरित होता है और आठवें महीने में वह सर्वांग (सम्पूर्ण) बन जाता है।

पितृरेतोऽतिरिक्तात् पुरुषो भवति। मातुः रेतोऽतिरिक्तात् स्त्रियो भवन्ति। उभयोः बीजतुल्यत्वान्नपुंसको भवति। व्याकुलितमन-सोऽन्धाः खञ्जाः कुब्जा वामना भवन्ति। अन्योन्यवायुपरिपीडितानां शुक्लद्वैधे स्त्रियो योन्यां (योन्या) युग्माः प्रजायन्ते ॥9॥

यदि पिता का वीर्य प्रमाण में ज्यादा हो, तो पुरुष उत्पन्न होता है, और यदि स्त्री का वीर्य प्रमाण में ज्यादा हो, तो स्त्री उत्पन्न होती है। परन्तु दोनों का बीज अगर समान प्रमाण में हो, तो नपुंसक उत्पन्न होता है। अगर गर्भाधान-काल में माता का मन व्याकुल हो तो अन्धी, लँगड़ी, कुरूप या ठिगनी सन्तानें उत्पन्न होती हैं। और यदि वायु के आघात से माता-पिता के गर्भ के दो भाग हो गए हों तो जुडवाँ सन्तान उत्पन्न होती हैं।

पञ्चात्मकसमर्थः पञ्चात्मकतेजसेद्धरसश्च सम्यग्ज्ञानात् ध्यानादक्षर-मोङ्कारं चिन्तयति। तदेतदेकाक्षरं ज्ञात्वा अष्टौ प्रकृतयः षोडश विकाराः शरीरे ॥10॥

आठ महीने बीतने पर वह पाँच इन्द्रियों और मन-बुद्धि आदि के तेज से प्रकाशित और समर्थ होकर ओंकार का चिन्तन करने लगता है। इस प्रकार वह उस एकाक्षर ब्रह्म को जानता है। और बाद में उसके शरीर में आठ प्रकृतियाँ और सोलह विकार उत्पन्न हो जाते हैं।

तस्यैव देहिनोऽथ (देहिनामथ) नवमे मासे सर्वलक्षणसम्पूर्णो भवति। पूर्वजातिं स्मरति। कृताकृतं कर्म विभाति। शुभाशुभं कर्म विन्दति (विभाति) ॥11॥

वह देहधारी आत्मा नवम मास में सभी लक्षणों से संपूर्ण हो जाता है। और तब वह अपने पूर्वजन्म का स्मरण करता है। उसके पहले किए हुए शुभ और अशुभ कर्म उससे आ मिलते हैं और वह अपने किए गए कर्मों को याद करता है (कि—)

नानायोनिसहस्राणि दृष्ट्वा चैव ततो मया।
आहारा विविधा भुक्ताः पीताश्च विविधाः स्तनाः ॥12॥

मैंने हजारों योनियाँ देखकर तरह-तरह के आहार खाए हैं और अनेक माताओं के स्तनों का पान पूर्व में किया है।

जातस्यैव मृतस्यैव जन्म चैव पुनः पुनः।
अहो दुःखोदधिमग्नो न पश्यामि प्रतिक्रियाम् ॥13॥

जन्मे हुए व्यक्ति की मृत्यु और मरे हुए व्यक्ति का जन्म तो बार-बार होता ही रहता है। अरे, इस संसाररूप दुःख के सागर में डूबा हुआ मैं इसे पार करने का कोई उपाय नहीं जानता।

यदि योन्यां प्रमुञ्चामि साङ्ख्यं योगं समाश्रये।
अशुभक्षयकर्तारं फलमुक्तिप्रदायिनम् ॥14॥

और कदाचित् यदि मैं योनि से (जन्ममरण से) छुटकारा पा जाऊँगा तो मैं सांख्य और योग का आश्रय लूँगा, जो कि अशुभ कर्मों का क्षय करनेवाला है, तथा मुक्तिरूपी फल को देनेवाला है।

यदि योन्यां प्रमुञ्चामि तं प्रपद्ये महेश्वरम्।
अशुभक्षयकर्तारं फलमुक्तिप्रदायिनम् ॥15॥

और यदि कदाचित् मैं इस जन्ममरणरूप दुःख से मुक्त हो जाऊँगा तो मैं महेश्वर की ही शरण में जाऊँगा, जो कि अशुभ कर्मों का क्षय करनेवाले हैं और मुक्तिरूपी फल को देनेवाले हैं।

यदि योन्यां प्रमुञ्चामि तं प्रपद्ये भगवन्तं नारायणं देवम्।
अशुभक्षयकर्तारं फलमुक्तिप्रदायिनम् ॥16॥

और भी यदि कदाचित् मैं इस जन्मादि दुःखसागर से छुटकारा पाऊँ, तो मैं भगवान् नारायण देव की शरण में जाऊँगा, जो कि अशुभ का क्षय करनेवाले हैं, और मोक्षरूपी फल को देनेवाले हैं।

यन्मया परिजनस्यार्थे कृतं कर्म शुभाशुभम्।
एकाकी तेन दह्यामि गतास्ते फलभागिनः ॥17॥

मैंने जो कुछ भी अच्छा-बुरा काम अपने स्वजनों के लिए किया है, उन कर्मों के फलस्वरूप मैं अब अकेला (निःसहाय) होकर जलता रहता हूँ क्योंकि वे तो मेरे किए का फल भोगकर अब चले ही गए (मेरा साथी कोई न रहा)।

जन्तुः स्त्रीयोनिशतं योनिद्वारि सम्प्राप्तो यन्त्रेण परिपीड्यमानो महता दुःखेन जातमात्रस्तु वैष्णवेन वायुना संस्पृश्यते। तदा न स्मरति जन्ममरणादिकं शुभाशुभम् ॥18॥

प्राणी बाद में हजारों बार योनियों में भटकते हुए जब योनि के मुख में आता है, तब मानों किसी यन्त्र में पिसकर बड़े ही कष्ट से जैसे ही जन्म लेता है कि तुरन्त ही उसे वैष्णव वायु का स्पर्श होता है, और उससे उसके जन्म-मरण की पूर्व स्मृति चली जाती है। और साथ ही वह अपने पूर्वकृत शुभाशुभ कर्मों को भूल जाता है।

शरीरमिति कस्मात्? ज्ञानाग्निः दर्शनाग्निः कोष्ठाग्निरिति। तत्र कोष्ठाग्निर्नामाशितपीतलेह्यचोष्यं पाचयति रूपादीनां दर्शनं करोति ॥19॥

इस देह को 'शरीर' क्यों कहा गया है ? क्योंकि इसमें ज्ञानाग्नि, दर्शनाग्नि और कोष्ठाग्नि—ये तीन अग्नियाँ आश्रित होती हैं। इनमें से कोष्ठाग्नि खाए गए, पीए गए, चाटे गए और चूसे गए अन्नादि का पाचन करता है। (दर्शनाग्नि) रूपों का दर्शन कराता है।

तत्र त्रीणि स्थानानि भवन्ति। हृदये दक्षिणाग्निः उदरे गार्हपत्यं मुखमाहवनीयम्। यजमानाय बुद्धिं पत्नीं निधाय दीक्षा सन्तोषं बुद्धीन्द्रियाणि यज्ञपात्राणि शिरः कपालं केशाः दर्भाः मुखमन्तर्वेदिः षोडश पार्श्वदन्तपटलान्यष्टोत्तरमर्मशतमशीतिसन्धिशतं नवस्नायुशतमष्टसहस्त्ररोमकोट्यः ॥20॥

शरीर में चल रहे यज्ञ की तीन अग्नियों में हृदय में दक्षिणाग्नि, उदर में गार्हपत्य तथा मुख में आहवनीय अग्नि है। इसमें आत्मा यजमान, बुद्धि यजमानपत्नी, संतोष दीक्षा, यज्ञपात्र बुद्धि और इन्द्रियाँ, कपाल मस्तक, केशरूप दर्भ, मुख अन्तर्वेदि है। इसमें सोलह दंष्ट्राएँ हैं, एक सौ आठ मर्म हैं, एक सौ अस्सी सन्धियाँ हैं, एक सौ नौ स्नायु हैं और आठ हजार करोड़ रोंगटे हैं।

हृदयपटलान्यष्टौ द्वादशपला जिह्वा पित्तं प्रस्थं कफस्याढकं शुक्लं कुडुपं मेदः प्रस्थौ। द्वावेव मूत्रपुरीषयोः अहरहः पानपरिमाणम् ॥21॥

आठ पल के भार वाला हृदय है, बारह पल परिमित जिह्वा है, एक प्रस्थ परिमित पित्त है, एक आढक कफ धातु है, एक कुडव वीर्य है, दो प्रस्थ मेद है। मलमूत्र का परिमाण खाए हुए अन्न पर आधारित है।

टिप्पणी—ये प्रस्थ, आढक, कुडुप (कुडव) आदि मान प्राचीन समय में वस्तुओं को नापने के साधन थे। लीलावती के गणित के आधार पर इसका अर्वाचीन रूप इस प्रकार है—पाँच गुञ्जा = 1 मासा, सोलह मासा = 1 कर्ष, पाँच कर्ष = 1 पल, पचास पल = 1 आढक, चार कुडव = 1 प्रस्थ, चार प्रस्थ = 1 आढक।

पैप्पलादं मोक्षशास्त्रं परिसमाप्तं पैप्पलादं मोक्षशास्त्रं परिसमाप्तमित्युपनिषत् ॥22॥

इति गर्भोपनिषत्समाप्ता।

इस प्रकार मुनि पिप्पलाद द्वारा कथित मोक्षशास्त्र यहाँ समाप्त हुआ—इसी वाक्य की पुनरुक्ति उपनिषत् की समाप्ति की सूचक है। इस तरह यह गर्भोपनिषत् यहाँ पर समाप्त होती है।

शान्तिपाठः

ॐ सह नाववतु। सह नौ.......मा विद्विषावहै। (पूर्ववत्)

ॐ शान्तिः शान्तिः शान्तिः ॥

(18) नारायणोपनिषत्

(उपनिषत्परिचय)

यह छोटी-सी उपनिषद् कृष्णयजुर्वेद से सम्बन्ध रखती है। इसका दूसरा नाम 'नारायणाथर्वशिर उपनिषद्' भी है। चारों वेदों का सारतत्त्व इसमें मुख्य (मस्तक के) रूप में प्रतिपादित किया गया है। सबसे पहले 'नारायण' से ही इस समग्र जडचेतन जगत् का निर्माण बताया गया है। उसके बाद नारायण की ही सर्वात्मकस्वरूपता का प्रतिपादन किया गया है। 'ॐ नमो नारायणाय'—यह जो अष्टाक्षर मन्त्र है, इसकी चर्चा की गई है। इसके बाद नारायण और प्रणव की एकता बताई है। बाद में इस उपनिषद् का अध्ययन करने की फलश्रुति दर्शाई गई है। कहा गया है कि इस छोटी सी उपनिषद् के अध्ययन से चारों वेदों के पठन का पुण्यलाभ मिल जाता है।

शान्तिपाठः

ॐ सह नाववतु। सह नौ.........मा विद्विषामवहै। (पूर्ववत्)
शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (ब्रह्मोपनिषद् में) द्रष्टव्य है।

अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति। नारायणात् प्राणो जायते। मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी। नारायणाद्ब्रह्मा जायते। नाराथणाद्रुद्रो जायते। नारायणा-दिन्द्रो जायते। नारायणात्प्रजापतिः प्रजायते। नारायणाद्द्वादशादित्या रुद्रा वसवः सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते। नारायणा-त्प्रवर्तन्ते नारायणे प्रलीयन्ते। एतदृग्वेदशिरोऽधीते ॥1॥

अब पुरुषरूप नारायण ने ही संकल्प किया कि मैं प्रजा का सर्जन करूँ। नारायण से प्राण उत्पन्न होता है, नारायण से मन और सभी इन्द्रियाँ उत्पन्न होती हैं, नारायण से ही आकाश, वायु, तेज, जल और समस्त विश्व को धारण करने वाली पृथ्वी उत्पन्न होती है। नारायण से ब्रह्मा उत्पन्न होते हैं, नारायण से ही रुद्र जन्मते हैं, नारायण से इन्द्र जन्म लेते हैं, नारायण से प्रजापति जन्म लेते हैं। नारायण के द्वारा ही ये बारह आदित्य, रुद्रगण, वसुगण तथा सभी वेद उत्पन्न होते हैं। नारायण के द्वारा ही सब संचालित होते हैं और अन्त में नारायण में ही विलीन हो जाते हैं। यह ऋग्वेदीय उपनिषद् का सारकथन है।

अथ नित्यो नारायणः। ब्रह्मा नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः। कालश्च नारायणः। दिशश्च नारायणः। विदिशश्च नारायणः। ऊर्ध्वं च नारायणः। अधश्च नारायणः। अन्तर्बहिश्च नारायणः। नारायण एवेदं सर्वं यद्भूतं यच्च भव्यम्। निष्कलङ्को

निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित्। य एवं वेद स विष्णुरेव भवति स विष्णुरेव भवति। एतद्यजुर्वेदशिरोऽधीते ॥2॥

वह नारायण नित्य है। ब्रह्मा नारायण है, शिव भी नारायण है, इन्द्रदेव भी नारायण है और काल भी नारायण है। दिशाएँ भी नारायण हैं और उपदिशाएँ भी नारायण ही हैं। ऊपर भी नारायण है और नीचे भी नारायण है। भीतर भी नारायण है और बाहर भी नारायण है। जो कुछ हो चुका है और जो कुछ होनेवाला है, वह सब कुछ पुरुषरूप – नारायणरूप – ही है। वही कलंकरहित, पापरहित, निर्विकल्प, अनिर्वचनीय और विशुद्ध देव है। उनके अतिरिक्त कोई दूसरा है ही नहीं। जो मनुष्य ऐसा जानता है, वह स्वयं विष्णुरूप ही हो जाता है। वह विष्णु ही हो जाता है। ऐसा ही यजुर्वेदीय उपनिषद् का सारकथन है।

ॐ इत्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्। ॐ इत्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणास्याष्टाक्षरं पदम्। यो ह वै नारायणस्याष्टाक्षरं पदमध्येति अनपब्रुवः सर्वमायुरेति। विन्दते प्राजापत्यं रायस्पोषं गौपत्यं ततोऽ-मृतत्वमश्नुते ततोऽमृतत्वमश्नत इति। एतत्सामवेदीयशिरोऽधीते ॥3॥

'ॐ' यह पहले बोलना चाहिए। बाद में 'नमः' ऐसा बोलना चाहिए और इसके बाद में 'नारायणाय' ऐसा बोलना चाहिए। 'ॐ' यह एक अक्षर है। 'नमः' ये दो अक्षर हैं। 'नारायणाय'— ये पाँच अक्षर हैं। इस प्रकार यह अष्टाक्षर नारायण का मन्त्र है। जो मनुष्य नारायण के इस अष्टाक्षर मंत्र का जाप करता है, वह अकथनीय कीर्तिसम्पन्न होकर पूर्ण आयुष्य भोगता है। उसे प्रजापतिपद स्त्री-पुत्र-धन-धान्यादि की वृद्धि और गायों का स्वामित्व मिलता है, तथा वह अमृतत्व का उपभोग करता है—अमर हो जाता है—उसे मोक्ष मिलता है—यह सामवेदीय उपनिषद् का सारतत्त्वकथन है।

प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम्। अकार उकारो मकार इति। ता अनेकधा समभवत्तदेतदोमिति यमुक्त्वा मुच्यते योगी जन्मसंसार-बन्धनात्। ॐ नमो नारायणायेति मन्त्रोपासको वैकुण्ठभुवनं गमिष्यति। तदिदं पुण्डरीकं विज्ञानघनं तस्मात्तडिदाभमात्रम्। ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः। ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरुच्यत इति। सर्वभूतस्थमेकं वै नारायणं कारणपुरुषमकारणं परं ब्रह्मोम्। एतदथर्वशिरोऽधीते ॥4॥

'अ'कार, 'उ'कार और 'म'कार मात्रायुक्त यह प्रत्यक् (आन्तरिक) आनन्दरूप ओम्कार ब्रह्मपुरुष प्रणवरूप है। इन भिन्न-भिन्न तीन मात्राओं के सम्मिलित स्वरूप को ओम्कार कहते हैं। इस प्रणवरूप ऊँकार का जप करके योगी जन्मकरणरूप इस संसार के बन्धनों से मुक्त हो जाता है। 'ॐ नमो नारायणाय'—इस मन्त्र की साधना करने वाला साधक वैकुण्ठधाम में जाता है। यह वैकुण्ठधाम हृदयरूपी पुण्डरीक (कमल) विज्ञानमय है। इस कारण से इसका स्वरूप विद्युत् के समान अतिप्रकाशित है। ब्रह्ममय देवकीपुत्र कृष्ण सर्वदा ब्राह्मणप्रिय हैं। वे ही कमलनयन मधुसूदन विष्णु कहे जाते हैं। वे सबके कारण होते हुए भी स्वयं कारणरहित ही हैं। ऐसे सभी प्राणियों के अन्तर्यामी रूप नारायण हैं। वे ही प्रणव (ओम्कार) हैं। इस प्रकार यह अथर्ववेदीय उपनिषद् का सारकथन है।

प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। तत्सायंप्रातरधीयानः पापोऽपापो भवति। माध्यंदिनमा-दित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात् प्रमुच्यते। सर्ववेद-पारायणफलं लभते। नारायणसायुज्यमवाप्नोति। श्रीमन्नारायणसा-युज्यमवाप्नोति य एवं वेद ॥5॥

इति नारायणोपनिषत् समाप्ता।

इस उपनिषत् का प्रातः में अध्ययन करनेवाला मनुष्य रात्रि में किए हुए पापों से मुक्त हो जाता है और शाम को अध्ययन करनेवाला दिवस में किए हुए पापों से मुक्त हो जाता है। इस प्रकार प्रातः-सायं अध्ययन करनेवाला यदि पापी हो तो वह पापरहित हो जाता है। अर्थात् पूर्व जन्म में किए हुए पापों से भी मुक्त हो जाता है। दुपहर के समय में सूर्य के सामने मुख रखकर इसका पाठ करनेवाला पुरुष पाँच महापातकों से और उपपातकों से भी मुक्त हो जाता है। इसके पाठ से मनुष्य सभी वेदों के पारायण का पुण्य प्राप्त करता है। वह नारायण का सायुज्य (नारायण में स्वयं जुड़ जाने का सौभाग्य) प्राप्त करता है। ऐसा जाननेवाला पुरुष भी श्रीमन्नारायण के सायुज्य को प्राप्त करता है। (वाक्य की पुनरावृत्ति उपनिषत् की समाप्ति का सूचक है)।

यहाँ नारायणोपनिषत् पूरी हुई।

शान्तिपाठः

ॐ सह नाववतु। सह नौ...... मा विद्विषावहै। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

(19) परमहंसोपनिषत्

(उपनिषत्परिचय)

इस शुक्लयजुर्वेदीय उपनिषत् में कुल चार कण्डिकाएँ ही हैं। इसमें श्रीनारदजी ब्रह्माजी से परमहंस की स्थिति के विषय में और मार्ग के विषय में पूछ रहे हैं। ब्रह्माजी ने उत्तर में परमहंस का जो वर्णन किया, वही यह उपनिषद् है। इसमें परमहंस का स्वरूप, उसकी वेशभूषा, उसके व्यवहार आदि के बारे में अच्छे ढंग से समझाया गया है। दीक्षा के बारे में भी कहा गया है। साथ-ही-साथ दंभी परमहंसों के लिए पातकों का बयान करते हुए इसके फलस्वरूप घोर नरकादि का फल भी बताया गया है।

शान्तिपाठः

ॐ पूर्णमदः पूर्णमिदं .... पूर्णमेवावशिष्यते। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (जाबालोपनिषद् में) द्रष्टव्य है।

अथ योगिनां परमहंसानां कोऽयं मार्गस्तेषां का स्थितिरिति नारदो भगवन्तमुपसमेत्योवाच। तं भगवानाह। योऽयं परमहंसमार्गो लोके दुर्लभतरो न नु बाहुल्यो यद्येको भवति स एव नित्यपूतस्थः स एव वेदपुरुष इति विदुषो मन्यन्ते महापुरुषो यच्चित्तं तत्सर्वदा मय्येवावतिष्ठते। तस्मादहं च तस्मिन्नेवावस्थीयते। असौ स्वपुत्रमित्र-कलत्रबन्ध्वादीञ्छिखा यज्ञोपवीतं स्वाध्यायं च सर्वकर्माणि संन्यस्यायं ब्रह्माण्डं च हित्वा कौपीनं दण्डमाच्छादनं च स्वशरीरोपभोगार्थाय लोकस्यैवोपकारार्थाय च परिग्रहेत्। तच्च न मुख्योऽस्ति। कोऽयं मुख्य इति चेदयं मुख्यः ॥1॥

एक बार नारद मुनि ने भगवान् नारायण के पास जाकर पूछा कि—"हे भगवन्! इन योगियों का (परमहंसों का) मार्ग कौन-सा है, उनकी स्थिति कैसी है?" तब भगवान् ने उनसे कहा—'यह जो परमहंसों का मार्ग है, वह लोकों में बहुत ही दुर्लभ है। संसार में ऐसे व्यक्ति बहुत ही कम होते हैं। कोई इक्का-दुक्का ही होता है। वह परमहंस हमेशा पवित्र भावना में अवस्थित होता है। विद्वान् लोग मानते हैं कि वही वेदपुरुष है। वही महापुरुष है कि जिसका चित्त हमेशा मुझमें ही रहता है। इसीलिए मैं भी उस महापुरुष में रहता हूँ। वह परमहंस अपने पुत्र, मित्र, स्त्री, बन्धु आदि स्वजनों को तथा शिखा, यज्ञोपवीत, देहाध्ययन—इन सबका त्याग करके सारे ब्रह्माण्ड के कल्याण के लिए और शरीर की रक्षा के लिए कौपीन, दण्ड और आच्छादन (उपवस्त्र) को धारण करता है। परन्तु, यह भी परमहंस की मुख्य दीक्षा नहीं है।' तब फिर नारद ने पूछा—'तो फिर मुख्य दीक्षा कौन-सी होती है?' तब नारायण ने कहा—'यह मुख्य दीक्षा है, सुनो'—

न दण्डं न शिखां न यज्ञोपवीतं न चाच्छादनं चरति परमहंसो न शीतं न चोष्णं न सुखं न दुःखं न मानावमाने च षड्भिर्वर्जं निन्दागर्वमत्सर-दम्भदर्पेच्छाद्वेषसुखदुःखकामक्रोधलोभमोहहर्षासूयाहङ्कारादींश्च हित्वा स्ववपुः कुणपमिव दृश्यते। यतस्तद्वपुरध्वस्तसंशयविपरीतमिथ्या-ज्ञानानां यो हेतुस्तेन नित्यनिवृत्तस्तन्नित्यबोधस्तत्स्वयमेवं नित्याव-स्थितिस्तं शान्तमचलमद्वयानन्दचिद्घन एवास्मि। तदेव मम परमं धाम, तदेव शिखा च तदेवोपवीतं च। परमात्मात्मनोरेकत्वज्ञानेन तयोर्भेद एव विभग्नः, सा संध्या ॥2॥

परमहंस की मुख्य दीक्षा इस प्रकार है—वह दण्ड, शिक्षा, यज्ञोपवीत, आच्छादन को धारण न करे। इसके सिवा शीत-उष्ण, मान-अपमान, सुख-दुःख—इन छः ऊर्मियों से वह रहित हो जाए। वह निन्दा, गर्व, मत्सर, दम्भ, दर्प, इच्छा, द्वेष, सुख, दुःख, काम, क्रोध, लोभ, मोह, हर्ष, असूया और अहंकार को छोड़कर अपने शरीर को मरे हुए के समान देखता है! संशय, विपरीत ज्ञान और मिथ्याज्ञान का जो कारण है, उससे वह सदा के लिए निवृत्त हो जाए। वह सदैव बोधस्वरूप हो। वह संसार में किसी भी पदार्थ की अपेक्षा न रखते हुए मानता है कि—मैं एकमात्र अचल, अद्वय चिद्घनानन्द हूँ। यही मेरा परमधाम है। यही मेरी शिखा और यही मेरा यज्ञोपवीत है। वह आत्मा और परमात्मा में अभेददृष्टि रखता है। उसके लिए दोनों का भेद मिट जाता है। वही उसकी सन्ध्या है।

सर्वान् कामान् परित्यज्य अद्वैते परमे स्थितिः।
ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते ॥
काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः।
तितिक्षाज्ञानवैराग्यशमादिगुणवर्जितः ॥
भिक्षामात्रेण यो जीवेत् स पापी यतिवृत्तिहा।
स याति नरकान् घोरान् महारौरवसंज्ञकान् ॥
इदमन्तरं ज्ञात्वां स परमहंसः—॥3॥

यह परमहंस सभी कामनाओं को छोड़कर अद्वैत परब्रह्म के स्वरूप में स्थित रहता है। उसे 'एकदण्डी' भी कहा जाता है क्योंकि उसने ज्ञानरूपी दण्ड धारण किया होता है। परन्तु जो मनुष्य काष्ठ का ही दण्ड धारण करता है, जो सभी आशाओं से भरा है, जिसमें ज्ञान है ही नहीं, जिसमें तितिक्षा-ज्ञान-वैराग्य-शम आदि कोई भी गुण नहीं है, जो भीख माँगकर अपना गुजारा करता रहता है, जो पापी सच्चे यतियों की आजीविका को इस तरह छीन लेता है और जीता है, वह महारौरव जैसे भयंकर नरकों में ही जाता है। जो इसको (पापी, संन्यासी और परमहंस की इस भिन्नता को) जानता है वह परमहंस है।

आशाम्बरो यो नमस्कारो न स्वाहाकारो न स्वधाकारो न निन्दा न स्तुति-र्यादृच्छिको भवेद्भिक्षुः। नावाहनं न विसर्जनं न मन्त्रं न ध्यानं नोपासनं च। न लक्ष्यं न चालक्ष्यं न पृथङ् नापृथगहर्न न त्वं न सर्वं च अनिकेतस्थिरमतिरेव स भिक्षुः सौवर्णादीनां नैव परिग्रहेन्न लोकनं नावलोकनं च। न च बाधकः क इति चेद्बाधकोऽस्त्येव। यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टं चेत् स ब्रह्महा भवेत्। यस्माद्भिक्षुर्हिरण्यं

रसेन स्पृष्टं चेत् स पौल्कसो भवेत्। यस्माद्भिक्षुर्हिरण्यं रसेन ग्राह्यं चेत् स आत्महा भवेत्। तस्माद्भिक्षुर्हिरण्यं रसेन न दृष्टं न स्पृष्टं न ग्राह्यं च। सर्वे कामा मनोगता व्यावर्तन्ते। दुःखे नोद्विग्नः सुखे निःस्पृहा। त्यागो रागे सर्वत्र शुभाशुभयोरनभिस्नेहो न द्वेष्टि न मोदं च। सर्वेषामिन्द्रियाणां गतिरुपरमते। य आत्मन्येवावस्थीयते। तत्पूर्णानन्दैकबोधस्तद्-ब्रह्मैवाहमस्मीति कृतकृत्यो भवति कृतकृत्यो भवतीत्युपनिषत् ॥4॥

इति परमहंसोपनिषत् समाप्ता।

वह दिगम्बर परमहंस नमस्कार, स्वाहाकार, स्वधाकार, निन्दा, स्तुति आदि की परवाह नहीं करता हुआ स्वैच्छिक भिक्षाचरण करता रहता है। उसके लिए आवाहन, विसर्जन, मन्त्र, ध्यान, उपासना, लक्ष्य, अलक्ष्य कुछ भी नहीं होता। उसका पृथक्-अपृथक् और मेरे-तेरे का भाव तथा सर्वभाव भी नहीं होता। वह निवासरहित और स्थिर बुद्धिवाला होता है। वह भिक्षु सोने आदि के संग्रह में प्रवृत्त नहीं होता। उसके लिए कोई भी चीज आकर्षक या अपाकर्षक नहीं होती। उसके लिए क्या बाधक (अवरोधक) है अर्थात् उसके लिए कुछ भी बाधक नहीं है। भिक्षु परमहंस होकर यदि वह सोने से प्रेम करे तो उसे ब्रह्महत्या का पाप लगता है। भिक्षु होकर यदि वह सुवर्ण से लगाव करे तो उसे चाण्डाल की तरह माना जाता है। ऐसा भिक्षु परमहंस होकर सोने से प्रेम करने पर आत्महत्या करनेवाला होता है। इसलिए उस परमहंस भिक्षु को चाहिए कि वह न तो सुवर्ण को देखे, न उसका स्पर्श करे और न ग्रहण ही करे। ऐसा परमहंस भिक्षु तो आप्तकाम ही हो जाता है अर्थात् उसकी समस्त कामनाएँ पूर्ण या समाप्त ही हो जाती हैं। वह दुःख में उद्विग्न नहीं होता है और सुख में भी निःस्पृह ही रहता है। राग को छोड़कर वह शुभ और अशुभ के प्रति आसक्तिरहित हो जाता है। वह न द्वेष करता है, न खुशी व्यक्त करता है। उसकी सभी इन्द्रियाँ शान्त हो जाती हैं। वह अपने आत्मतत्त्व में ही स्थित रहता है। वह अपने आपको सदैव पूर्णानन्दस्वरूप और पूर्णबोधस्वरूप ही समझता है। ऐसी भावना तथा अनुभूति से वह कृतार्थ (धन्य) हो जाता है।

यहाँ परमहंसोपनिषद् पूरी हुई।

शान्तिपाठः

ॐ पूर्णमदः पूर्णमिदं। ....पूर्णमेवावशिष्यते। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः॥

❋

(20) ब्रह्मबिन्दूपनिषत्

(उपनिषत्परिचय)

इस उपनिषद् का दूसरा नाम 'अमृतबिन्दूपनिषद्' है। बाईस मंत्रों वाली यह उपनिषद् कृष्णयजुर्वेद से सम्बद्ध है। इसमें ब्रह्मसाक्षात्कार का (आत्मानुसन्धान का) क्रम बताया गया है। 'मनुष्य के बन्ध और मोक्ष का कारण मन ही है'—इस सुप्रसिद्ध और शाश्वत सत्य के कथन से ही उपनिषद् का आरंभ होता है। मन को निर्विषय बनाकर मुक्ति की प्राप्ति का विधान करके उस निर्विषयता की विधि, स्वर-अस्वर द्वारा व्यक्त-अव्यक्त ब्रह्म का अनुसन्धान, तीनों अवस्थाओं में अनुस्यूत आत्मतत्त्व की स्थिति, पारमार्थिक आत्मस्वरूप, माया के द्वारा जीव का आवरण, अज्ञानान्धकार के हट जाने से जीव-ब्रह्म के ऐक्य का बोध, दूध में छिपे हुए घी की तरह चिन्तन-मननरूप मथनी से परमात्मतत्त्व की उपलब्धि और अन्त में परमतत्त्व का साक्षात्कार—ये सब बातें प्रतिपादित की गई है। इस ब्रह्मबिन्दूपनिषत् के सभी विषय प्रासादिक ढंग से बताए गए हैं।

शान्तिपाठः

ॐ सह नाववतु। सह नौ .... मा विद्विषावहै। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (ब्रह्मोपनिषद् में) द्रष्टव्य है।

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥1॥

मन दो प्रकार का है—शुद्ध और अशुद्ध। कामनाओं की इच्छा करनेवाला मन अशुद्ध कहा जाता है और कामनाओं से रहित मन शुद्ध है।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥2॥

मनुष्यों के बन्धन और मोक्ष का कारण केवल एक मन ही है। वह मन जब विषयों में आसक्त हो जाता है, तब बन्धन का कारण बनता है और जब विषयों के जाल (बन्धन) से छूट जाता है, तब वही मुक्ति का कारण हो जाता है।

यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते।
तस्मान्निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ॥3॥

जब मन भोगों की इच्छा का परित्याग कर देता है, तब उस मनुष्य का मोक्ष हो जाता है। इसलिए मुक्ति की इच्छा करनेवाले को चाहिए कि वह अपने मन को विषयासक्ति से रहित रखे।

निरस्तविषयासङ्गं सन्निरुद्धं मनो हृदि ।
यदा भात्युन्मनीभावं तदा तत्परमं पदम् ॥4॥

भोगों का लगाव छूट जाने पर मन जब हृदय में एकाग्र होता है, तब और जब मन का 'मनस्त्व' चला जाता है तब वह परमपदरूप ब्रह्म को प्राप्त हो जाता है।

तावदेव निरोद्धव्यं यावद्धृदि गतं क्षयम् ।
एतज्ज्ञानं च मोक्षं च अतोऽन्यो ग्रन्थविस्तरः ॥5॥

जब तक मन का नाश (विलय) न हो जाए, तब तक उसका हृदय में निरोध करते रहना चाहिए। यही तो पारमार्थिक ज्ञान है, यही तो मोक्ष है, शेष तो सब ग्रन्थविस्तार ही है।

नैव चिन्त्यं न चाचिन्त्यमचिन्त्यं चिन्त्यमेव तत् ।
पक्षपातविनिर्मुक्तं ब्रह्म सम्पद्यते तदा ॥6॥

अशुद्ध मन से ब्रह्म का चिन्तन नहीं किया जा सकता। परन्तु शुद्ध मन से तो उसका चिन्तन किया जा सकता है। इस प्रकार ब्रह्म अचिन्त्य भी है और चिन्त्य भी है। सभी जगह समान रूप से अवस्थित उस ब्रह्म का चिन्तन करनेवाला मनुष्य ब्रह्म को ही प्राप्त हो जाता है। (क्योंकि ब्रह्म कहीं ज्यादा और कहीं कम नहीं अपितु सर्वसमान है)।

स्वरेण सन्धयेद्योगमस्वरं भावयेत् परम् ।
अस्वरेण हि भावेन भावो ना भाव इष्यते ॥7॥

पहले ॐकार से (स्वर से) साधना करनी चाहिए और बाद में ॐकार से भी परे परब्रह्म की अस्वर साधना करनी चाहिए अर्थात् उसका ध्यान करना चाहिए क्योंकि उस निर्गुण ब्रह्म की धारणा होते ही भाव-अभाव, सत्य-मिथ्या का कुछ भी खयाल नहीं रहता।

तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम् ।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म सम्पद्यते ध्रुवम् ॥8॥

वही विकल्पहीन, दोषहीन पूर्ण ब्रह्म है। 'वह ब्रह्म मैं ही हूँ'—ऐसा जानकर साधक अवश्य उस ब्रह्म को प्राप्त करता है।

निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम् ।
अप्रमेयमनाद्यं च ज्ञात्वा च परमं शिवम् ॥9॥

जो विकल्परहित है, अनन्त है, युक्ति और उदाहरण से परे (अगम्य) है, जो नापा नहीं जा सकता जो परम कल्याणकारी है, उस अनादि ब्रह्म को जानकर मनुष्य उसी को प्राप्त होता है।

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥10॥

वास्तविक दृष्टि से देखा जाए तो यहाँ कोई उत्पत्ति भी नहीं है और विनाश भी नहीं है, कोई बद्ध भी नहीं है और कोई साधक भी नहीं है, कोई मुमुक्षु भी नहीं है और कोई मुक्त भी नहीं है—यही पारमार्थिक तत्त्व है।

एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु ।
स्थानत्रयाद्व्यतीतस्य पुनर्जन्म न विद्यते ॥11॥

जाग्रत्, स्वप्न और सुषुप्ति—इन तीनों अवस्थाओं में अनुस्यूत एक ही आत्मा है, ऐसा समझना चाहिए। इन तीनों अवस्थाओं का अतिक्रमण कर लेने वाले साधक को पुनः जन्म नहीं लेना पड़ता।

एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥12॥

हरएक प्राणी में और हरएक वस्तु में एक ही आत्मा स्थित है। जैसे जल से भरे हुए अनेक पात्रों में एक ही चन्द्र भिन्न दिखाई देता है, वैसे ही आत्मा भी हरएक प्राणी में अलग-अलग दिखाई देता है पर स्वयं में एक ही है।

घटसम्भृतमाकाशं लीयमाने घटे यथा।
घटो लीयेत नाकाशं तद्वज्जीवो घटोपमः ॥13॥

घड़े के नाश होने पर घड़े में निहित आकाशतत्त्व नष्ट नहीं होता, सिर्फ घड़े का ही नाश होता है। जीव भी घड़े की तरह ही है जिसमें देह का नाश तो होता है, पर जीव का कभी नाश नहीं होता।

घटवद्विविधाकारं भिद्यमानं पुनः पुनः।
तद्भग्नं न च जानाति स जानाति च नित्यशः ॥14॥

घड़े की तरह एक शरीर का नाश होने पर दूसरे देह और उसका भी नाश होने पर और दूसरे देह को—इस प्रकार विविध प्रकार के देह को जीव बार-बार धारण करता रहता है। देह के नाश को जीव हमेशा जानता तो है, फिर भी नहीं जानता।

शब्दमायावृतो यावत् तावत्तिष्ठति पुष्करे।
भिन्ने तमसि चैकत्वमेकमेवानुपश्यति ॥15॥

जब तक शब्द-नामरूपात्मक माया से जीव आवृत होता है, तब तक ही वह हृदयरूपी पुष्कर-कमल में बँधा रहता है, पर जैसे ही अज्ञानान्धकार नष्ट हो जाता है, वह परब्रह्म के साथ एकता का अनुभव करने लगता है।

शब्दाक्षरं परं ब्रह्म यस्मिन् क्षीणे यदक्षरम्।
तद्विद्वानक्षरं ध्यायेद् यदीच्छेच्छान्तिमात्मनः ॥16॥

यों तो शब्दब्रह्म (प्रणव) और परब्रह्म दोनों ही 'अक्षर' हैं। इन दोनों में से किसी भी एक के क्षीण हो जाने पर भी आश्रय की स्थिति में जो बचा रहता है, वही वास्तविक परब्रह्म है। उस वास्तविक ब्रह्म को जाननेवाला यदि कोई अन्तिम इच्छा रखता हो तो उसे उस अविनाशी ब्रह्म का ही ध्यान करना चाहिए।

द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥17॥

दो विद्याएँ जानने योग्य हैं। उनमें प्रथम विद्या को 'शब्दब्रह्म' कहते हैं और दूसरी 'परब्रह्म' कही जाती है। इनमें से जो मनुष्य शब्दब्रह्म में अर्थात् वेदविद्या में प्रवीण होता है, वह ब्रह्मविद्या को प्राप्त कर सकता है।

ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्त्वतः।
पलालमिव धान्यार्थी त्यजेद् ग्रन्थमशेषतः ॥18॥

बुद्धिमान मनुष्य को शास्त्रग्रन्थों में प्रतिपादित ज्ञान-विज्ञान (मूलतत्त्व) को ग्रहण करने के पश्चात् ग्रन्थ को ठीक उसी प्रकार से त्याग देना चाहिए जैसे धान्य (अन्न) को प्राप्त करने वाला उसकी भूसी का त्याग कर देता है।

गवामनेकवर्णानां क्षीरस्याप्येकवर्णता।
क्षीरवत् पश्यते ज्ञानं लिङ्गिनस्तु गवां यथा ॥19॥

जिस तरह अनेक रंगों वाली गायों का दूध एक ही रंग का (सफेद) होता है, इसी तरह भिन्न-भिन्न शास्त्रों में दिया गया ज्ञान एक ही होता है, ऐसा ज्ञानी लोग (लिंगी) समझते हैं।

घृतमिव पयसि निगूढं भूते भूते च वसति विज्ञानम्।
सततं मन्थयितव्यं मनसा मन्थानभूतेन ॥20॥

दूध में घी की भाँति एक ही विज्ञानात्मा सर्वप्राणियों में निगूढ़ रूप में रहता है। अतः मन की मथनी से सदा आत्मा का मन्थन करना चाहिए। दूध का दही बनाना पड़ता है, फिर मथना पड़ता है, तब जाकर घी निकलता है।

ज्ञाननेत्रं समादाय चरेद्वह्निमतः परम्।
निष्कलं निर्मलं शान्तं तद् ब्रह्माहमिति स्मृतम् ॥21॥

ज्ञानरूपी नेत्र (दृष्टि) को प्राप्त करके अग्नि के सदृश प्रकाशमान आत्मा की चर्या (साधना-ध्यानादि) करनी चाहिए। तब कहीं 'निष्कल, विशुद्ध, शान्त, ऐसा ब्रह्म मैं ही हूँ'—ऐसी स्मृति (ज्ञान) होती है।

सर्वभूताधिवासं च यद्भूतेषु च वसत्यधि।
सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवः तदस्म्यहं वासुदेवः ॥22॥

इत्यमृतबिन्दूपनिषत् समाप्ता।

जिसमें सभी प्राणी निवास करते हैं, और जो स्वयं सभी प्राणियों में निवास करता है वह प्राणिमात्र पर अनुग्रह करनेवाला वासुदेव मैं ही हूँ। वह वासुदेव मैं ही हूँ।

इस तरह यहाँ अमृतबिन्दु उपनिषत् पूरी हुई।

शान्तिपाठः

ॐ सह नाववतु। सह नौ......मा विद्विषावहै। (पूर्ववत्)

ॐ शान्तिः शान्तिः शान्तिः ॥

❈

(21) अमृतनादोपनिषत्

(उपनिषत्परिचय)

यह उपनिषद् कृष्णयजुर्वेद के साथ संलग्न है । इस उपनिषद् में प्रणव की उपासना वर्णित है । और उसके साथ ही योग के छः अंगों का भी विवेचन किया गया है । प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि—इन पाँचों के साथ तर्क (समीक्षा) को भी जोड़ा है । इसमें प्राणायाम की विधि, ॐकार की मात्राओं का ध्यान, पाँचों प्राणों का स्थान, तथा रंगों का निर्देश भी किया गया है । योगसाधक को भयक्रोधादि मानसिक विकारों से रहित होकर आहार-विहारादि चेष्टा तथा सोना-जागना आदि क्रियाओं को सन्तुलित बनाए रखने की सीख दी गई है । साधना के फल के रूप में देवसदृश रूप की प्राप्ति से लेकर ब्रह्मनिर्वाण की प्राप्ति पर्यन्त का दिशासूचन किया गया है ।

शान्तिपाठः

ॐ सह नाववतु । सह नौ .... मा विद्विषावहै । (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (ब्रह्मोपनिषद् में) द्रष्टव्य है ।

शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ।
परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥1॥

मेधावी पुरुष को शास्त्र का अध्ययन करके उनका बार-बार परिशीलन करके फलरूप में ब्रह्मतत्त्व को जानकर फिर उन शास्त्रों को मशाल की तरह छोड़ देना चाहिए ।

ओंकाररथमारुह्य विष्णु कृत्वाऽथ सारथिम् ।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ॥2॥

ओंकाररूपी रथ पर चढ़ कर विष्णु को सारथि बनाकर ब्रह्मलोक के स्थान की खोज करनेवाले मनुष्य को रुद्र भगवान् की आराधना में लग जाना चाहिए ।

तावद्रथेन गन्तव्यं यावद्रथपथि स्थितः ।
स्थात्वा रथपथिस्थानं रथमुत्सृज्य गच्छति ॥3॥

उस ओंकाररूपी रथ के द्वारा तब तक चलते रहना चाहिए जब तक कि रथ द्वारा चलने योग्य मार्ग पूर्ण न हो जाये । जब रथपति का वह मार्ग (लक्ष्य) पूरा हो जाता है, तब स्वयं वह रथ को छोड़कर चलने लगता है ।

मात्रालिङ्गपदं त्यक्त्वा शब्दव्यञ्जनवर्जितम् ।
अस्वरेण मकारेण पदं सूक्ष्मं हि गच्छति ॥4॥

ओंकार की मात्राओं को बताने वाले (लिंगभूत) जो पद हैं, उनको तथा स्थूल शरीरादि पदों को छोड़कर, स्वरविहीन 'म' अर्थात् बिन्दु का ध्यान करके मनुष्य सूक्ष्म ब्रह्मतत्त्व को प्राप्त करता है।

शब्दादिविषयान् पञ्च मनश्चैवातिचञ्चलम्।
चिन्तयेदात्मनो रश्मीन् प्रत्याहारः स उच्यते ॥5॥

शब्द-स्पर्शादि पाँच विषयों को और छठे अतिचञ्चल मन को आत्मतत्त्व की किरणों के रूप में चिन्तन करना ही 'प्रत्याहार' कहलाता है। (आत्मसत्ता से ही उनकी सत्ता है)।

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ॥6॥

प्रत्याहार, ध्यान, प्राणायाम और धारणा तथा तर्क और समाधि—इन छः को 'योग' कहा गया है। (यहाँ पर पतंजलि के अष्टांग योग के कुछ तत्त्वों को क्रमव्यत्यास ढंग से बताया है। केवल 'तर्क' को अधिक कहा है)।

यथा पर्वतधातूनां दह्यन्ते धमनान्मलाः।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणधारणात् ॥7॥

जिस प्रकार पर्वत से निकलती हुई धातुओं की मैल अग्नि में तप्त करने से जल जाती है (धातु विशुद्ध होती है) ठीक उसी प्रकार इन्द्रियों के दोष (मैल) प्राणों की धारणा से अर्थात् प्राणायाम की क्रिया से जल जाते हैं।

प्राणायामैर्देहदोषान् धारणाभिश्च किल्बिषम्।
(प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्।)
किल्बिषं हि क्षयं नीत्वा रुचिरं चैव चिन्तयेत् ॥8॥

प्राणायामों से देह के (इन्द्रियों के भी) दोषों को, तथा धारणा के द्वारा मनोगत पाप (कुसंस्कार) को, एवं प्रत्याहार से विषयों के साथ संसर्गों को और ध्यान से दुर्गुणों को नष्ट करके बाद रमणीय इष्टदेव के रूप का चिन्तन करना चाहिए।

रुचिरं रेचकं चैव वायोराकर्षणं तथा।
प्राणायामास्त्रयः प्रोक्ता रेचपूरककुम्भकाः ॥9॥

रुचिर (कुम्भक), रेचक तथा वायु के आकर्षणरूप पूरक—ये तीन प्रकार के प्राणायाम कहे गए हैं। इनके नाम रेचक, पूरक और कुम्भक हैं।

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥10॥

प्राणशक्ति की वृद्धि करने वाला जो मनुष्य व्याहृतियों (भूः भुवः स्वः) के साथ और प्रणव (ओंकार) के उच्चारण के साथ संपूर्ण गायत्री मंत्र का उसके शीर्ष के साथ तीन बार पढ़ते हुए अपने श्वास का पूरक, कुंभक और रेचन करता है, उस सम्पूर्ण प्रक्रिया को एक 'प्राणायाम' कहा जाता है।

उत्क्षिप्य वायुमाकाशे शून्यं कृत्वा निरात्मकम्।
शून्यभावे नियुञ्जीयाद्रेचकमिति लक्षणम् ॥11॥

घ्राणेन्द्रिय द्वारा वायु को आकाश में निकालकर (फेंककर), हृदय को (मन को) वायु से खाली और विचारशून्य बनाकर शून्यभाव में मन को (हृदय को) जोड़ देना चाहिए। इस प्रक्रिया को रेचक नाम दिया जाता है।

वक्त्रेणोत्पलनालेन तोयमाकर्षयेन्नरः ।
एवं वायुर्गृहीतव्यः पूरकस्येति लक्षणम् ॥12॥

जिस प्रकार पुरुष अपने मुख में नाली लगाकर धीरे-धीरे मुख में पानी को खींचता है, उसी प्रकार नाक से वायु को भीतर लेने की क्रिया को पूरक कहा जाता है। यह पूरक का लक्षण है।

नोच्छ्वसेन्न च निःश्वसेन्नैव गात्राणि चालयेत् ।
एवं भावं नियुञ्जीयात् कुम्भकस्येति लक्षणम् ॥13॥

साँस को भीतर खींचना भी नहीं चाहिए और साँस को बाहर भी नहीं निकालना चाहिए। जब इस प्रकार की स्थिति में मनुष्य अपने को रखता है, तब वह कुंभक है (यह कुंभक का लक्षण है) ऐसा कहा जाता है।

अन्धवत्पश्य रूपाणि शब्दं बधिरवच्छृणु ।
काष्ठवत्पश्य वै देहं प्रशान्तस्येति लक्षणम् ॥14॥

सभी रूपों को अन्धे की तरह देखो और सभी शब्दों को बहेरे की भाँति सुनो तथा अपने शरीर को काष्ठ की तरह ही देखो अर्थात् सभी इन्द्रियविषयों की और अपने शरीर की भी उपेक्षा करो। यही प्रशान्तपुरुष का लक्षण है।

मनः सङ्कल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान् ।
धारयित्वा तथात्मानं धारणा परिकीर्तिता ॥15॥

बुद्धिमान् मनुष्य मन को संकल्पात्मक मानकर उसको आत्मा में लय कर देता है और उस मन को उसी आत्मा में ही धारण करता है। इसे 'धारणा' कहा जाता है।

आगमस्याविरोधेन ऊहनं तर्क उच्यते ।
समं मन्येत यल्लब्ध्वा स समाधिः प्रकीर्तितः ॥16॥

शास्त्रानुसार किए जानेवाले वादविवाद को 'तर्क' कहा जाता है। और जिस अवस्था को प्राप्त करके सर्वत्र समानता का ही अनुभव किया जा सकता है, उस अवस्था को समाधि कहा जाता है।

भूमौ दर्भासने रम्ये सर्वदोषविवर्जिते ।
कृत्वा मनोमयीं रक्षां जप्त्वा वै रथमण्डले ॥17॥

सर्व प्रकार के दोषों से रहित भूमि पर, सुन्दर दर्भासन पर भूतप्रेतादि से मानसिक रक्षा करते हुए रथमण्डल का (प्रणव व्याहृतिसह और अष्टाक्षर गायत्रीमंत्र का) जप करना चाहिए।

पद्मकं स्वस्तिकं वापि भद्रासनमथापि वा ।
बद्ध्वा योगासनं सम्यगुत्तराभिमुखः स्थितः ॥18॥

पद्मासन अथवा स्वस्तिकासन अथवा भद्रासन नामक योगासन को लगाकर उत्तर की ओर मुँह करके अच्छी तरह बैठना चाहिए।

नासिकापुटमङ्गुल्या पिधायैकेन मारुतम् ।
आकृष्य धारयेदग्निं शब्दमेव विचिन्तयेत् ॥19॥

इसके बाद नासिका के दायें छिद्र को अँगूठे से दबाकर वायु को भीतर खींचकर मूलाधार के त्रिकोणाकार में अग्नि को धारण करते हुए शब्द का (ओंकार का) ही चिन्तन करते रहना चाहिए।

ओमित्येकाक्षरं ब्रह्म ओमित्येतन्न रेचयेत् ।
दिव्यमन्त्रेण बहुधा कुर्यादामलमुक्तये ॥20॥

यह प्रणव (ॐ) ही एकाक्षर ब्रह्म है। उस ॐकाररूप एकाक्षर ब्रह्म का भंग (रेचन) नहीं करना चाहिए। उसे सतत जपते रहना चाहिए। उस दिव्य मंत्र के द्वारा सब मलों की मुक्ति के लिए सतत प्रयत्न करते ही रहना चाहिए। (जप का सातत्य रहना चाहिए, उसका रेचन – विच्छेद – नहीं होना चाहिए।)

पश्चाद् ध्यायीत पूर्वोक्तक्रमशो मन्त्रविद् बुधः ।
स्थूलादिस्थूलसूक्ष्मं च नाभेरूर्ध्वमुपक्रमः ॥21॥

इसके बाद मंत्रज्ञ बुद्धिमान मनुष्य को पहले बताए हुए क्रम के अनुसार नाभि के ऊपर के भाग में स्थित स्थूल पदार्थ से लेकर स्थूल से सूक्ष्म तक अर्थात् स्थूल से लेकर क्रमशः (अपेक्षाकृत) स्थूल से सूक्ष्म की ओर जाते-जाते अन्त में सूक्ष्मातिसूक्ष्म ब्रह्मतत्त्व का ध्यान करना चाहिए।

तिर्यगूर्ध्वमधोदृष्टिं विहाय च महामतिः ।
स्थिरस्थायी विनिष्कम्पः सदा योगं समभ्यसेत् ॥22॥

उस बुद्धिमान मनुष्य को चाहिए कि वह अपनी दृष्टि को तिरछी, ऊँची या नीची न रखकर स्थिर रखे, और स्वयं स्थिर और अचल रहकर करके योग का अभ्यास करे।

तालमात्राविनिष्कम्पो धारणायोजनं तथा ।
द्वादशमात्रो योगस्तु कालतो नियमः स्मृतः ॥23॥

ताल (प्राणवायु का पारम्परिक संगठन प्रकार), मात्रा (कालमाप), विनिष्कम्प (स्थैर्य), धारणा (प्राणवायु का स्थिरीकरण) और योजन (प्राणवायु का अग्नि से संयोग)––इन पाँचों बातों को योगी को समझ लेना चाहिए। यह योग बारह मात्रावाला माना जाता है। इस योग को पूर्ण करने में कालिक नियममर्यादा रखनी चाहिए।

अघोषमव्यञ्जनमस्वरं च अतालुकण्ठोष्ठमनासिकं च यत् ।
अरेफजातमुभयोष्मवर्जितं यदक्षरं न क्षरते कथंचित् ॥24॥

घोषव्यंजनों से रहित, व्यंजनों से भी रहित, स्वरविहीन, कण्ठ-तालु-मूर्धा-दन्त्य-औष्ठ्य व्यंजनों से रहित, नासिक्य व्यंजनविहीन तथा रेफ (र कार) और ऊष्माक्षरों (श, ष, स) से भी रहित (ऐसे जो अक्षर ब्रह्म – प्रणव – ॐकार) है, वह कभी विकार को प्राप्त नहीं होता।

येनासौ गच्छते मार्गं प्राणस्तेनाभिगच्छति ।
अतस्तमभ्यसेन्नित्यं यन्मार्गगमनाय वै ॥25॥

योगी पुरुष जिस मार्ग पर जाता है या जाना चाहता है, उसी मार्ग से प्राण भी योगी की इच्छानुसार जाता है। इसलिए जिस किसी वांछित मार्ग पर जाने के लिए सदैव योग का अभ्यास करना चाहिए।

हृद्द्वारं वायुद्वारं च मूर्धद्वारमथापरम् ।
मोक्षद्वारं बिलं चैव सुषिरं मण्डलं विदुः ॥26॥

हृदय का द्वार, वायु का द्वार और मस्तक का द्वार, क्रमशः मोक्षद्वार, बिलद्वार और ब्रह्मरन्ध्र कहा जाता है ।

भयं क्रोधमथालस्यमतिस्वप्नातिजागरम् ।
अत्याहारमनाहारं नित्यं योगी विवर्जयेत् ॥27॥

योगी को सदैव भय, क्रोध, आलस्य, अति सोना, अति जगाना, बहुत खाना, बिल्कुल न खाना—इनको छोड़ देना चाहिए ।

अनेन विधिना सम्यङ् नित्यमभ्यस्यते क्रमात् ।
स्वयमुत्पद्यते ज्ञानं त्रिभिर्मासैर्न संशयः ॥28॥

इस प्रकार से अच्छी तरह से क्रमशः यदि नित्य अभ्यास किया जाए, तो तीन महीनों के भीतर ही ऐसे साधक को ज्ञान उत्पन्न हो जायगा, इसमें संशय नहीं ।

चतुर्भिः पश्यते देवान् पञ्चभिर्विततः क्रमः ।
इच्छयाप्नोति कैवल्यं षष्ठे मासि न संशयः ॥29॥

नित्य-नियमित अभ्यास करनेवाला वह साधक (योगी) चार मास में ही देवों का दर्शन करने लग जाता है । और पाँच महीनों में उसका सामर्थ्य विस्तृत प्रगतिवाला हो जाता है । और छठे महीने में तो अपनी इच्छा के अनुसार उसमें कैवल्यप्राप्ति का सामर्थ्य आ जाता है, इसमें कोई संशय नहीं है ।

पार्थिवः पञ्चमात्रस्तु चतुर्मात्रस्तु वारुणः ।
आग्नेयस्तु त्रिमात्रोऽसौ वायव्यस्तु द्विमात्रकः ॥30॥

पृथ्वी तत्त्व की धारणा करते समय इस ओंकार का उच्चारण पाँच मात्रा तक करना चाहिए, जलतत्त्व की धारणा करते समय चार मात्रा तक उच्चारण करना चाहिए, तेज की धारणा करते समय तीन मात्रा तक का और वायु की धारणा करते समय दो मात्राओं तक का उच्चारण करना चाहिए । (या उन-उन मात्राओं तक ध्यान करना चाहिए) ।

एकमात्रस्तथाकाशो ह्यर्धमात्रं तु चिन्तयेत् ।
संधिं कृत्वा तु मनसा चिन्तयेदात्मनात्मनि ॥31॥

आकाश की धारणा करते समय एक मात्रा तक तथा स्वयं ओंकार (प्रणव) की धारण करते समय अर्धमात्रा के परिमाण में ध्यान या उच्चारण करना चाहिए । मन से फिर उसे जोड़कर आत्मा के द्वारा अन्तःकरण में ही उसका चिन्तन करना चाहिए ।

त्रिंशत्सार्धाङ्गुलः प्राणो यत्र प्राणैः प्रतिष्ठितः ।
एष प्राण इति ख्यातो बाह्यप्राणस्य गोचरः ॥32॥

मूलाधार से कण्ठ तक साढे तीस अंगुलि के परिमाण का यह प्राण श्वासों के रूप में जिसमें प्रतिष्ठित हुआ है, वही वास्तविक प्राण है और बाह्य प्राण का वह विषय है ।

अशीतिश्च शतं चैव सहस्त्राणि त्रयोदश ।
लक्षश्चैको विनिश्वास अहोरात्रप्रमाणतः ॥33॥

इस बाह्य प्राण में एक लाख तेरह हजार छः सौ अस्सी निःश्वासों (श्वास-प्रश्वासों) का आवागमन एक रात और दिन में होता है।

प्राण आद्यो हृदि स्थाने अपानस्तु पुनर्गुदे।
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः ॥34॥

आदि प्राण हृदय में, अपान गुदा में, समान नाभिदेश में और उदान कण्ठ में रहता है।

व्यानः सर्वेषु चाङ्गेषु व्याप्य तिष्ठति सर्वदा।
अथ वर्णास्तु पञ्चानां प्राणादीनामनुक्रमात् ॥35॥

व्यान सदैव सभी अंगों में व्याप्त होकर रहता है। अब पाँचों प्राणों के वर्ण क्रमशः कहे जाते हैं।

रक्तवर्णो मणिप्रख्यः प्राणवायुः प्रकीर्तितः।
अपानस्तस्य मध्ये तु इन्द्रकोपसमप्रभः ॥36॥

प्राणवायु को लाल मणि के समान लाल वर्ण का कहा गया है और अपानवायु को गुदा के बीचोबीच इन्द्रगोप (बीरबहूटी) नामक गाढे लाल रंग वाले एक बरसाती कीड़े के रंग का माना गया है।

समानस्तु द्वयोर्मध्ये गोक्षीरधवलप्रभः।
अपाण्डुर उदानश्च व्यानो ह्यर्चिसमप्रभः ॥37॥

इन दोनों के बाद समान गाय के दूध जैसा सफेद रंगवाला है और उदान फीके पीले रंग वाला है, तथा व्यान अग्निज्वाला जैसे रंगवाला है।

यस्येदं मण्डलं भित्वा मारुतो याति मूर्धनि।
यत्र कुत्र म्रियेद्वापि न स भूयोऽभिजायते ॥
न स भूयोऽभिजायत इत्युपनिषत् ॥38॥

इत्यमृतनादोपनिषत् समाप्ता।

इस वायुमण्डल को भेदकर जिस साधक (योगी) का प्राण ब्रह्मरन्ध्र में पहुँच जाता है, वह जहाँ कहीं पर भी मरे, तो वह फिर से नहीं जन्मता, नहीं जन्मता।

यहाँ अमृतनाद उपनिषत् पूरी हुई।

शान्तिपाठः

ॐ सह नाववतु। सह नौ……… मा विद्विषावहै। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

❉

(22) अथर्वशिर उपनिषत्

(उपनिषत्परिचय)

यह अथर्ववेदीय उपनिषद् है। इसमें देवों की रुद्रस्वरूप के विषय में जिज्ञासा, रुद्रैकत्व का प्रतिपादन, रुद्र की सर्वात्मता, रुद्रज्ञान का फल आदि विषय हैं। देवों की रुद्रस्तुति, देवों की रुद्रप्रार्थना, आदि के साथ शंकर, प्रणव, सर्वव्यापिता, अनन्त, तार, सूक्ष्म, वैद्युत्, परब्रह्म, एक, एकोरुद्र, ईशान, भगवत् महेश्वर महादेव आदि शब्दों के अर्थ भी स्पष्ट किए गए हैं। रुद्र की व्यापकता, उपासना का फल, तृष्णावालों के लिए शान्ति के उपाय, महापाशुपत का व्रत आदि विषय भी दिए गए हैं। छोटी-मोटी 70 गद्यकण्डिकाएँ इस उपनिषत् में शामिल हैं। इसकी तीन-चार प्रकार की वाचनाएँ मिलती हैं।

शान्तिपाठः

ॐ भद्रं कर्णेभिः श‍ृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः॥
ॐ शान्तिः शान्तिः शान्तिः॥

हे देवो ! हम अपने कानों से केवल कल्याणकारी बातें ही सुना करें। जिन्हें हम पूजते है, ऐसे हे देवो ! हम अपनी आँखों से केवल शुभ दृश्यों को ही देखा करें। हम अपने सुदृढ़ अंगों से युक्त शरीर के द्वारा आयुष्यपर्यन्त आपकी स्तुति करते रहें। हम देवों का दिया हुआ जितना आयुष्य है, उसे भोगते रहें।

त्रिविध (आधिभौतिक, आधिदैविक, आध्यात्मिक) तापों की शान्ति हो।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।
ॐ शान्तिः शान्तिः शान्तिः॥

महान् कीर्तिशाली इन्द्र हमारा कल्याण करें। सर्वज्ञ पूषा देवता हमारा कल्याण करें। अरिष्टनेमि, (अप्रतिहतगति) गरुडदेव और बृहस्पति हमारा कल्याण करें। हमारे त्रिविध तापों की शान्ति हो।

देवा ह वै स्वर्ग लोकमगमंस्ते देवा रुद्रमपृच्छन्—को भवानिति॥1॥

देवगण स्वर्गलोक में गए और वहाँ जाकर रुद्र से उन्होंने पूछा—आप कौन हैं ?

सोऽब्रवीदहमेकः प्रथममासं वर्तामि भविष्यामि च। नान्यः कश्चिन्मत्तो व्यतिरिक्त इति॥2॥

उसने कहा—'मैं अकेला ही था, अभी भी हूँ और भविष्य में भी होऊँगा। मुझसे अतिरिक्त कोई है ही नहीं'।

सोऽन्तरादन्तरं प्राविशत् दिशश्चान्तरं प्राविशत्॥3॥

जो भीतर से भी भीतर प्रविष्ट हुआ है, जो दिशाओं के भीतर भी प्रविष्ट है (वह मैं ही हूँ)।

सोऽहं नित्यानित्योऽहं व्यक्ताव्यक्तो ब्रह्माहमब्रह्माहं प्राञ्चः प्रत्यञ्चोऽहं दक्षिणाञ्चोदञ्चोऽहमधश्चोर्ध्वं चाहं दिशश्च प्रतिदिशश्चाहं पुमानपुमान् स्त्रियश्चाहं गायत्र्यहं सावित्र्यहं सरस्वत्यहं त्रिष्टुब्जगत्यनुष्टुप् चाहं छन्दोऽहं गार्हपत्यो दक्षिणाग्निराहवनीयोऽहं सत्योऽहं गौरहं गौर्यहमृगहं यजुरहं सामाहमथर्वाङ्गिरसोऽहं ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमपापोऽहं तेजोऽहं गुह्योऽहमरण्योऽहमक्षरमहं क्षरमहं पुष्करमहं पवित्रमहमग्रं च मध्यं च बहिश्च पुरस्ताज्ज्योतिरित्यहमेव च सर्वे मामेव ॥4॥

नित्य-अनित्य, व्यक्त-अव्यक्त, ब्रह्म-अब्रह्म–सब मैं ही हूँ। मैं ही पूर्व, पश्चिम, उत्तर, दक्षिण, ऊर्ध्व, अधो आदि दिशाएँ तथा विदिशाएँ भी हूँ। पुरुष, अपुरुष और स्त्री भी मैं हूँ। मैं ही गायत्री, सावित्री और सरस्वती हूँ। त्रिष्टुप्, जगती, अनुष्टुप् आदि छन्द भी मैं ही हूँ। गार्हपत्य, दक्षिणाग्नि तथा आहवनीय अग्नि भी मैं ही हूँ। सत्य, गौ, गौरी, ऋग्वेद, यजुर्वेद, सामवेद और अथर्ववेद मैं ही हूँ। ज्येष्ठ, श्रेष्ठ, वरिष्ठ और निष्पाप मैं हूँ। मैं जल हूँ, मैं तेज हूँ, क्षर-अक्षर भी मैं हूँ। छिपाने योग्य और छिपाया हुआ भी मैं हूँ। मैं पवित्र हूँ। अग्र, मध्य, बाहर, सामने, दसों दिशाओं में अवस्थित और अनवस्थित ज्योतिरूप शक्ति मुझे ही मानना चाहिए।

मां यो वेद सर्वान् देवान् वेद। गां गोभिर्ब्राह्मणान् ब्राह्मण्येन हवींषि हविषाऽऽयुरायुषा सत्यं सत्येन धर्मं धर्मेण तर्पयामि तर्पयामि ॥5॥

इस प्रकार जो मुझे जानता है वह समस्त देवों को जानता है। मैं गाय को गोत्व से, ब्राह्मणों को ब्राह्मणत्व से, हवि को हविष्य से, आयु को आयुष से, सत्य को सत्य से और धर्म को धर्म से सन्तुष्ट करता हूँ। (कहीं पर 'देवान् वेद' के पश्चात् 'सर्वांश्च वेदान्सांगानपि'—ऐसा पाठ भी मिलता है, वहाँ पर 'अंग सहित सभी वेदों को भी' इतना अधिक जोड़ देना चाहिए)।

स्वेन तेजसा ततो देवा रुद्रं नापश्यन्। ते देवा रुद्रं ध्यायन्ति। ततो देवा ऊर्ध्वबाहवः स्तुवन्ति–ॐ यो ह वै देवः स भगवान् यश्च ब्रह्मा भूर्भुवः स्वः तस्मै वै नमो नमः। शीर्षञ्जनर्दो विश्वरूपोऽसि ॥6॥

प्रौढ प्रकाशवाले उसके तेज की वजह से देवलोग उस रुद्र को देख न पाए। इसलिए वे उसका ध्यान करने लगे। तब वे अपने हाथ ऊँचे करके ऐसी स्तुति करने लगे—'जो देव रुद्र भगवान् हैं, वे ही ब्रह्मा है, वह विश्वरूप है।' (इस स्तुतिमंत्र के पहले 'ॐ भूर्भुवः स्वः' ऐसी व्याहृतियाँ और अन्त में 'तस्मै नमो नमः'—ऐसा पद जोड़कर मंत्र पूर्ण करना चाहिए)।

ॐ यो वै रुद्रः स भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः ॥7॥
ॐ यो वै रुद्रः स भगवान् यश्च विष्णुः तस्मै वै नमो नमः ॥8॥
ॐ यो वै रुद्रः स भगवान् यश्च स्कन्दः तस्मै वै नमो नमः ॥9॥
ॐ यो वै रुद्रः स भगवान् यश्चेन्द्रः तस्मै वै नमो नमः ॥10॥
ॐ यो वै रुद्रः स भगवान् यश्चाग्निः तस्मै वै नमो नमः ॥11॥
ॐ यो वै रुद्रः भगवान् यश्च वायुः तस्मै वै नमो नमः ॥12॥
ॐ यो ह वै रुद्रः स भगवान् यश्च विनायकः तस्मै वै नमो नमः ॥13॥

ॐ यो ह वै रुद्रः स भगवान् या चोमा तस्मै वै नमो नमः ॥14॥
ॐ यो ह वै रुद्रः स भगवान् यश्च महेश्वरः तस्मै वै नमो नमः ॥15॥
ॐ यो ह वै रुद्रः स भगवान् यश्च भूः तस्मै वै नमो नमः ॥16॥
ॐ यो ह वै रुद्रः स भगवान् यश्च भुवः तस्मै वै नमो नमः ॥17॥
ॐ यो ह वै रुद्रः स भगवान् यश्च सुवः तस्मै वै नमो नमः ॥18॥
ॐ यो ह वै रुद्रः स भगवान् यश्च महः तस्मै वै नमो नमः ॥19॥
ॐ यो ह वै रुद्रः स भगवान् यश्च जनः तस्मै वै नमो नमः ॥20॥
ॐ यो ह वै रुद्रः स भगवान् यश्च तपः तस्मै वै नमो नमः ॥21॥
ॐ यो ह वै रुद्रः स भगवान् यश्च सत्यं तस्मै वै नमो नमः ॥22॥
ॐ यो ह वै रुद्रः स भगवान् या च पृथिवी तस्मै वै नमो नमः ॥23॥
ॐ यो ह वै रुद्रः स भगवान् याश्चापः तस्मै वै नमो नमः ॥24॥
ॐ यो ह वै रुद्रः स भगवान् यच्च तेजः तस्मै वै नमो नमः ॥25॥
ॐ यो ह वै रुद्रः स भगवान् यश्च वायुः तस्मै वै नमो नमः ॥26॥
ॐ यो ह वै रुद्रः स भगवान् यश्च आकाशं तस्मै वै नमो नमः ॥27॥
ॐ यो ह वै रुद्रः स भगवान् यश्च सूर्यः तस्मै वै नमो नमः ॥28॥
ॐ यो ह वै रुद्रः स भगवान् यश्च सोमः तस्मै वै नमो नमः ॥29॥
ॐ यो ह वै रुद्रः स भगवान् यानि च नक्षत्राणि तस्मै वै नमो नमः ॥30॥
ॐ यो ह वै रुद्रः स भगवान् ये चाष्टौ ग्रहाः तस्मै वै नमो नमः ॥31॥
ॐ यो ह वै रुद्रः स भगवान् यश्च प्राणः तस्मै वै नमो नमः ॥32॥
ॐ यो ह वै रुद्रः स भगवान् यश्च कालः तस्मै वै नमो नमः ॥33॥
ॐ यो ह वै रुद्रः स भगवान् यश्च यमः तस्मै वै नमो नमः ॥34॥
ॐ यो ह वै रुद्रः स भगवान् यश्च मृत्युः तस्मै वै नमो नमः ॥35॥
ॐ यो ह वै रुद्रः स भगवान् यश्चामृतं तस्मै वै नमो नमः ॥36॥
ॐ यो ह वै रुद्रः स भगवान् यच्च भूतं, भव्यं वर्तमानं तस्मै वै नमो नमः ॥37॥
ॐ यो ह वै रुद्रः स भगवान् यश्च विश्वं तस्मै वै नमो नमः ॥38॥
ॐ यो ह वै रुद्रः स भगवान् यच्च कृत्स्नं सर्वं सत्यं तस्मै वै नमो नमः ॥39॥

(अब 7 से 39 मंत्रों की स्तुति दी जा रही है—)

हे भगवान् रुद्र ! आप ब्रह्मा, विष्णु, स्कन्द, इन्द्र, अग्नि, वायु, विनायक, उमा, महेश्वर, भूः, भुवः, स्वः, महः, जनः, तपः, सत्य, पृथ्वी, जल, तेज, वायु, आकाश, सूर्य, चन्द्र, नक्षत्र, ग्रह, प्राण, काल, यम, मृत्यु, अमृत, भूत-भव्य-वर्तमान, विश्व, कृत्स्न-सर्व-सत्य स्वरूप हैं। ऐसे आप (सर्वरूप) को हम बार-बार नमस्कार करते हैं।

[अलग-अलग वाचनाओं में इस प्रार्थना के विशेषणों का क्रम अव्यवस्थित-सा (उल्टा-सीधा) मिलता है। प्रार्थना के कुछ विशेषणों में भी भारी भेद देखा गया है। यहाँ किसी विशेषण की पुनरावृत्ति न हो और जो विशेषण सामान्यतः सभी आवृत्तियों में पाए जाते हैं उन्हीं का संग्रह करके यथासम्भव

प्रामाणिक सूची बनाने का प्रयास किया गया है तथा यथासाध्य उनके क्रम का भी रक्षण करने का प्रयास किया गया है।]

ब्रह्मैकस्त्वं द्वित्रिधोर्ध्वमधश्च त्वं शान्तिश्च त्वं पुष्टिश्च त्वं तुष्टिश्च त्वं हुतमहुतं विश्वमविश्वं दत्तमदत्तं कृतमकृतं परमपरं परायणं चेति ॥40॥

तू ही एकमात्र ब्रह्म है। दो-तीन आदि संख्या भी तू ही है। ऊपर-नीचे भी तू ही है। तू ही शान्ति, पुष्टि, तुष्टि, हुत-अहुत, विश्व-अविश्व, दान-अदान, सकाम-निष्काम कर्म और सबका परम आश्रय भी तू ही है। (कुछ वाचनाओं में 'भूस्ते आदिर्मध्यं भुवस्ते स्वस्ते शीर्षम्'—यह अधिक पाठ है। इसका अर्थ यह है—हे भगवन्! ये 'भूर्लोक' आपका आदि, 'भुवः' आपका मध्य और 'स्वः' आपका मस्तक है)।

अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान्।
किं नूनमस्मान् कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥41॥

हे अमृतस्वरूप रुद्र! आपकी कृपा से हम सोमरस का पान करें, हम उससे अमर हो जाएँ, हम ज्ञानरूप ज्योति को प्राप्त करें, हम देवताओं को पहचानें। अब हमारा शत्रु हमें क्या क्षति पहुँचा सकता है? मरणशील मुझे दुष्कृति भी तो (आपका अनुग्रह होने पर) क्या कर सकती है?

(सोमसूर्यपुरस्तात् सूक्ष्मः पुरुषः।) सर्वजगद्धितं वा एतदक्षरं प्राजापत्यं सौम्यं सूक्ष्मं पुरुषमग्राह्यमग्राह्येण वायुं वायव्येन सोमं सौम्येन ग्रसति स्वेन तेजसा तस्मा उपसंहर्त्रे महाग्रासाय वै नमो नमः ॥42॥

(हे देव! आप सोम और चन्द्र से भी पहले के सूक्ष्म पुरुष हैं।) यह अक्षर (आप) सर्व जगत् का हित करनेवाला, प्रजापतियों के द्वारा स्तवनीय, सूक्ष्म सौम्य पुरुष हैं, जो अपने तेज से अग्राह्य को अग्राह्य से, भाव को भाव से, सौम्य को सौम्य से, सूक्ष्म को सूक्ष्म से, वायु को वायु से ग्रस लेते हैं। ऐसे महाग्रास करनेवाले आप रुद्र भगवान् को नमस्कार है। नमस्कार है।

हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः।
हृदि त्वमसि यो नित्यं तिस्रो भावाः परस्तु सः ॥43॥

आपके हृदय में ही सभी देवता निवास करते हैं, प्राण भी आपके हृदय में प्रतिष्ठित हैं। हृदय में रहते हुए आप तीनों (अ, उ, म) मात्राओं से परे ही हैं।

तस्योत्तरतः शिरो दक्षिणतः पादौ य उत्तरतः स ओङ्कारः, स प्रणवः स सर्वव्यापी, यः सर्वव्यापी सोऽनन्तो योऽनन्तो तत्तारं यत्तारं तत् सूक्ष्मं यत् सूक्ष्मं तच्छुक्लं यच्छुक्लं तद्वैद्युतं यद्वैद्युतं तत् परं ब्रह्म यत् परं ब्रह्म स एकः य एकः स रुद्रः यो रुद्रः स ईशानो य ईशानः स भगवान् महेश्वरः (स भगवान् महादेवः) ॥44॥

हृदय में रहते हुए उसका सिर उत्तर में है, दोनों चरण दक्षिण में हैं, वह ओंकार है। उसे ही 'प्रणव' कहते हैं। वही सर्वव्यापी है, सर्वव्यापी ही अनन्त है, अनन्त ही तारक है, जो तारक है वही सूक्ष्म है, जो सूक्ष्म है वही शुक्ल है, जो शुक्ल है वही विद्युत् है, जो विद्युत है वही परब्रह्म है, जो

परब्रह्म है वही एकरूप है जो एकरूप है वही रुद्र है, जो रुद्र है वही ईशान रूप है, जो ईशानरूप है वही भगवान् महेश्वररूप है (वही भगवान् महादेव है)।

अथ कस्मादुच्यत ओङ्कारो यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमाक्रमयति तस्मादुच्यत ओङ्कारः ॥45॥

ठीक, तो उसे 'ओंकार' क्यों कहा जाता है? इसीलिए कि उच्चारण किये जाने से प्राणों को ऊँचे खींचना पड़ता है। इसलिए उसे 'ओङ्कार' कहा जाता है।

अथ कस्मादुच्यते प्रणवो यस्मादुच्चार्यमाण एव ऋग्यजुःसामाथर्वाङ्गि-रसो ब्रह्म ब्राह्मणेभ्यः प्रणामयति नामयति च तस्मादुच्यते प्रणवः ॥46॥

तब उसे 'प्रणव' क्यों कहा जाता है ? इसलिए कि उसका उच्चारण किए जाने पर ऋग्वेद, यजुर्वेद, सामवेद और अथर्ववेदांगिरस और ब्राह्मणों को प्रणाम करवाया जाता है। अर्थात् इसका उपयोग उनको नमस्कार करवाने के लिए किया जाता है, इसलिए उसे प्रणव कहा जाता है।

अथ कस्मादुच्यते सर्वव्यापीति यस्मादुच्चार्यमाण एव सर्वाल्लोकान् व्याप्नोति स्नेहो यथा पललपिण्डमिव शान्तरूपमोतप्रोतमनुप्राप्तो व्यतिषिक्तश्च तस्मादुच्यते सर्वव्यापी ॥47॥

तो फिर वह 'सर्वव्यापी' क्यों कहा जाता है ? इसलिए कि उसका उच्चारण किए जाने पर वह सभी लोकों में व्याप्त हो जाता है। जैसे (काष्ठ में अग्नि या) तिल में तेल के समान वह सबमें व्याप्त हो जाता है, उसी तरह यह आत्मा सबको जोड़े हुए सबमें एक साथ रहता है। इसलिए इसे सर्वव्यापी कहा गया है।

अथ कस्मादुच्यते अनन्तो यस्मादुच्चार्यमाण एवाद्यन्तं नोपलभ्यते। तिर्यगूर्ध्वमधस्तात्तस्मादुच्यते अनन्त इति ॥48॥

इसे 'अनन्त' क्यों कहा जाता है ? इसलिए कि इसका उच्चारण करने से ही उच्चारणरूप अविद्या कार्य का अन्त-आदि होने पर भी उस उच्चरित का आदि और अन्त नहीं देखा जाता है। अतः यह 'अनन्त' ऐसा कहा गया है।

अथ कस्मादुच्यते तारं यस्मादुच्चार्यमाण एव गर्भजन्मजरामरण-संसारमहाभयात् संतारयति तस्मादुच्यते तारम् ॥49॥

इसे 'तार' क्यों कहा जाता है ? इसलिए कि इसके उच्चारण करने मात्र से ही वह गर्भवास, जन्म, जरा, मरण, संसार के महाभय से तार देता है अर्थात् छुटकारा प्राप्त करा देता है, इसलिए उसे 'तार' कहा जाता है।

अथ कस्मादुच्यते सूक्ष्मं यस्मादुच्चार्यमाण एव सूक्ष्मो भूत्वा परशरीरा-ण्येवाधितिष्ठति तस्मादुच्यते सूक्ष्मम् ॥50॥

उसे 'सूक्ष्म' क्यों कहा जाता है ? इसलिए कि उसका उच्चारण करने से साधक सूक्ष्म होकर अन्यों के शरीर में भी अधिष्ठित रह सकता है। इसीलिए वह सूक्ष्म कहा जाता है।

अथ कस्मादुच्यते शुक्लं यस्मादुच्चार्यमाण एव क्लन्दते क्लामयते तस्मादुच्यते शुक्लम् ॥51॥

उसे तब 'शुक्ल' क्यों कहा जाता है ? इसलिए कि उसका उच्चारण करने से अपने रूप से वह प्रकाशित हो जाता है तथा अन्य विषयों को भी प्रकाशित कर देता है, इसलिए उसे शुक्ल (प्रकाशरूप–स्वयंप्रकाश) कहा जाता है।

अथ कस्मादुच्यते वैद्युतं यस्मादुच्चार्यमाण एवातितमसि शरीरं विद्योतयति तस्मादुच्यते वैद्युतम् ॥52॥

उसे 'वैद्युत' क्यों कहा जाता है? इसलिए कि उसका उच्चारण करने से ही गाढ तमस् (अन्धकार) में रहा हुआ शरीर प्रकाशित हो उठता है। गाढ अज्ञानान्धकार में नहीं दीखने वाला आत्मतत्त्व 'नेति नेति' की 'अतद्व्यावृत्ति' से प्रकाशित होता है।

अथ कस्मादुच्यते परं ब्रह्म यस्मादुच्चार्यमाण एव बृहति बृंहयति तस्मा-दुच्यते परं ब्रह्म ॥53॥

तब इसे 'परब्रह्म' क्यों कहा जाता है ? इसलिए कि इसका उच्चारण करने से ही वह अपने से अतिरिक्त बाकी सबका भक्षण कर लेता है, और स्वयं सर्वोत्कृष्ट भाव से रहता है इसलिए उसे परब्रह्म कहा जाता है।

अथ कस्मादुच्यत एको यः सर्वान् लोकानुद्गृह्णात्यजस्त्रं सृजति विसृजति वासयति तस्मादुच्यत एकः ॥54॥

अब उसे 'एक' क्यों कहा जाता है ? इसलिए कि वह सभी लोकों का उपसंहार करता है। बार-बार सर्जन करता रहता है। स्थूल-सूक्ष्म रूप से ऐसा बार-बार करता रहता है और जगत् की स्थूल-सूक्ष्म भाव से स्थिति भी करता रहता है। अर्थात् स्वयं सर्वश्रेष्ठ होकर अन्य का सर्जन-विसर्जन करता ही रहता है।

कहीं-कहीं उक्त मंत्र के बदले नीचे दिया गया मंत्र मिलता है—

[अथ कस्मादुच्यत एको यः सर्वान्प्राणान्सम्भक्ष्य सम्भक्षणेनाजः संसृजति विसृजति च। तीर्थमेके व्रजन्ति तीर्थमेके दक्षिणाः प्रत्यञ्च उदञ्चः प्राञ्चोभिव्रजन्त्येके तेषां सर्वेषामिह संगतिः। साकं एको भूतश्चरति तस्मादुच्यत एकः।]

[इस परमतत्त्व ब्रह्म को 'एक' इसलिए कहा जाता है कि वह सभी प्राणियों का भक्षण करके, स्वयं अजन्मा रहते हुए उत्पत्ति और विनाश करता रहता है। समस्त तीर्थों में वह 'एक' ही विद्यमान तत्त्व होता है। बहुत से लोग पूर्व-पश्चिम-उत्तर-दक्षिण आदि दिशाओं में परिभ्रमण किया करते हैं। वहाँ भी उनकी सद्गति का कारण तो यह 'एक' ही तत्त्व है। समस्त प्राणियों में एकरूप से निवास करते हुए अवस्थित होने से 'एक' कहा जाता है।]

अथ कस्मादुच्यते रुद्रः ? एक एव रुद्रो न द्वितीयाय तस्थुः इमान् लोकानीशत ईशनीयुर्जननीयुः। प्रत्यञ्जनास्तिष्ठति सञ्चुकोचान्तकाले, संसृज्य विश्वा भुवनेषु गोप्ता। तस्मादुच्यत एको रुद्रः ॥55॥

इस रुद्र को 'एकरुद्र' क्यों कहा गया है? इसलिए कि वह एक ही रुद्र है, उसके अतिरिक्त अविद्या कार्य है ही नहीं। फिर भी मूल बीज के अंश के योग से ईश्वरत्व को धारण करके वह इन लोकों के ऊपर शासन चलाता है। ये सब लोक ईश्वर से ही उत्पन्न हों और ईश्वर के द्वारा ही अपने-अपने कार्यों को करने में समर्थ हों। यह ईश्वर प्रत्येक मनुष्य के हृदय में रहता है। प्रलयकाल में विश्व का संहार करके फिर सृष्टिकाल में उसका सर्जन करता है और रक्षण करता है।

कहीं-कहीं यह मंत्र अधिक मिलता है—

[अथ कस्मादुच्यते रुद्रः यस्मादृषिभिर्नान्यैर्भक्तैर्द्रुतमस्य रूपमुपलभ्यते। तस्मादुच्यते रुद्रः ॥]

[अर्थात् इसे रुद्र क्यों कहा जाता है ? इसलिए कि इसका रूप ऋषियों द्वारा ही देखा जा सकता है, भक्तों के द्वारा नहीं, इसलिए इसे रुद्र कहा गया है।]

अथ कस्मादुच्यत ईशानो यः सर्वान् लोकानीशत ईशनीभिः। जननीभिः परमशक्तिभिः ॥56॥

उसे 'ईशान' क्यों कहा जाता है ? इसलिए कि वह समस्त देवों तथा उनकी शक्तियों पर अपना प्रभुत्व रखता है। इसे 'ईशान' क्यों कहा जाता है ? इसलिए कि वह समस्त देवों और मनुष्यों की शक्तियों पर अपना वर्चस् रखता है।

अभि त्वा शूर नो नुमो दुग्धा इव धेनवः।
ईशानमस्य जगतः सुवर्दृशमीशानमिन्द्र तस्थुषः ॥
तस्मादुच्यत ईशानः ॥57॥

इसलिए हे रुद्र ! शूर-वीर ऐसे आपकी हम इस प्रकार स्तुति करते हैं जिस प्रकार दूध प्राप्त करने के लिए गायों को प्रसन्न किया जाता है। हे रुद्र ! आप ही इन्द्ररूप होकर स्थावर-जंगम संसार के ईश हैं और दिव्यदृष्टि से सम्पन्न हैं, इसी कारण आपको 'ईशान' नाम से सम्बोधित किया जाता है।

अथ कस्मादुच्यते भगवान् यः सर्वान् भावान् निरीक्षित्यात्मज्ञानं निरीक्ष्यति योगं गमयति तस्मादुच्यते भगवान् ॥58॥

अब 'भगवान्' क्यों कहा जाता है ? इसलिए कि वह अपने ही अंश से उत्पन्न हुए सभी भावों को (जीवों को जीवभाव से) मुक्त करके फिर अपने साथ ऐक्य की प्राप्ति के लिए योग्य उपदेश और साधना की ओर प्रेरित करते हैं, इसलिए भगवान् कहा गया है।

अथ कस्मादुच्यते महेश्वरो यः सर्वान् लोकान् सम्भक्षः। सम्भक्षयत्यजस्रं सृजति विसृजति वासयति तस्मादुच्यते महेश्वरः ॥59॥

उसे 'महेश्वर' क्यों कहा जाता है ? इसलिए कि वह सभी लोगों का (लोकों का भी) उपसंहर्ता है। वह निरन्तर संहार करता रहता है, निरन्तर सर्जन करता रहता है फिर से बार-बार विसर्जन करता रहता है तथा सब लोगों को टिकाए भी रखता है इसीलिए उसका नाम महेश्वर कहा गया है।

[58, 59 और 60—इन तीन मंत्रों को सम्मिलित करके (एक मंत्र बना करके) कहीं-कहीं पर संयुक्त अर्थ किया गया है, पर उसमें स्पष्टता नहीं दिखती।]

अथ कस्मादुच्यते महादेवो यः सर्वान् भावान् परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेवः ॥60॥

उसे 'महादेव' क्यों कहा गया है ? इसलिए कि वह अपने सिवा सभी अस्तित्वों को छोड़कर आत्मज्ञानरूपी योगैश्वर्य में आनंद लेता है, इसीलिए उसे 'महादेव' कहा गया है।

तदेतद्वृदचरिम्—
एको हि देवः प्रदिशो नु सर्वाः पूर्वो हि जातः स उ गर्भे अन्तः।
स विजायमानः स जनिष्यमाणः प्रत्यङ्‌जनास्तिष्ठति विश्वतोमुखः ॥61॥

एक ही ऐसा देवता है, जो समस्त दिशाओं में निवास करता है। सर्वप्रथम उसी का आविर्भाव हुआ है। मध्य में और अन्त में वही अवस्थित रहता है। वही उत्पन्न होता है और भविष्य में भी वही उत्पन्न होगा। वही सबमें व्याप्त होकर रहा है। वह सभी जगह मुँहवाला है।

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥62॥

चारों ओर आँखों वाला, चारों ओर मुखवाला, चारों ओर हाथोंवाला, चारों ओर पैरों वाला वह रुद्र ही अपने हाथों से सभी प्राणियों का संयोजन (व्यवस्था) अकेला ही करता है। सचमुच ही वह एक ही होकर चलाता है।

एतदुपासितव्यं यद्वाचो वदन्ति तदेव ग्राह्यम्।
अयं पन्था वितत उत्तरेण येन देवा येन ऋषयो येन पितरः प्राप्नुवन्ति
परमपरं नारायणं च ॥63॥

जिसके सम्बन्ध में श्रुतियाँ कहती हैं वही ब्रह्म उपासना करने योग्य है, वही ग्रहण करने योग्य है। यही एकमात्र मार्ग उत्तर का मार्ग सुप्रसिद्ध है कि जिसके द्वारा देव, ऋषि, पितर नारायणरूप परमपद को प्राप्त होते हैं।

बालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं जातवेदं वरेण्यम्।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥64॥

हृदय के बीच बाल की नोंक के समान सूक्ष्म, स्वप्रकाश, विश्व, सर्वज्ञ और वरणीय देव को जो धीर पुरुष देख लेते हैं, उन्हीं को शाश्वत शान्ति मिलती है। अन्य लोगों को ऐसी शान्ति नहीं मिलती।

यो योनिं योनिमधितिष्ठत्येको येनेदं पूर्णं पञ्चविधं च सर्वम्।
तमीशानं पुरुषं देवमीड्यं निदिध्या(या)त्तारं शान्तिमत्यन्तमेति ॥65॥

जो अकेला रहकर भी विविध शरीरों में अधिष्ठित रहता है, जिसके द्वारा यह पंचभूतात्मक जगत् व्याप्त रहता है, ऐसे ईश्वर (शासक) पूजनीय (स्तवनीय) पुरुष का (परमात्मा का) निदिध्यासन (ध्यान) करना चाहिए और वह साधक परमोच्च शान्ति (कैवल्य) को प्राप्त करता है।

प्राणेष्वन्तर्मनसो लिङ्गमाहुर्यस्मिन् क्रोधो या च तृष्णाऽक्षमा च।
तृष्णां छित्त्वा हेतुजालस्य मूलं बुद्ध्या सञ्चिन्त्य स्थापयित्वा तु रुद्र
एकत्वमाहुः ॥66॥

सभी प्राणियों के हृदय में क्रोध, तृष्णा और अक्षमा आदि मन का चिह्न है, ऐसा तत्त्वज्ञानी लोग कहते हैं। उनमें से संसार के हेतुरूप जाल का कारण जो तृष्णा है, उसे काटकर, बुद्धि से सोचकर और मन में जो स्थापित किया जाता है वही हे रुद्र ! एकत्व है।

रुद्र शाश्वतं वै पुराणमिषमूर्जं तपसा नियच्छत। व्रतमेतत् पाशुपतम्। अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म। सर्वं ह वा इदं भस्म मन इत्यानि चक्षूंषि भस्मानीत्य-ग्निरित्यादिना भस्म गृहीत्वा विसृज्याङ्गानि संस्पृशेत्तस्माद् व्रतमेतत् पाशुपतम् ॥67॥

अरे स्वयं को नहीं जानने वाले लोगो ! तुम लोग मन में ऐसा निश्चय कर लो कि–'जो कुछ शाश्वत है, (इषम् =) इच्छामय है, ऊर्जस्वी है, वह सब रुद्र ही है।' यह पाशुपत व्रत है। इस शाश्वत रुद्र—परमात्मा के सिवा अग्नि, वायु, जल, थल, यह समस्त जगत् और मन-इन्द्रियादि सब कुछ भस्म ही है, ऐसा अग्नि आदि मंत्र से सबको भस्म (तुच्छ ही) मानकर इन सबका त्याग करके अपने अंगों का स्पर्श करना चाहिए। इसलिए यह पाशुपत व्रत कहा गया है।

पशुपाशविमोक्षाय योऽथर्वशिरसं ब्राह्मणोऽधीते सोऽग्निपूतो भवति, स वायुपूतो भवति। स आदित्यपूतो भवति। स सोमपूतो भवति। स सत्यपूतो भवति। स सर्वपूतो भवति। स सर्वेषु तीर्थेषु स्नातो भवति। स सर्वेषु वेदेष्वधीतो भवति। स सर्ववेदव्रतचर्यासु चरितो भवति। स सर्वैर्देवैर्ज्ञातो भवति। स सर्वयज्ञक्रतुभिरिष्टवान् भवति। तेनेतिहास-पुराणानां रुद्राणां शतसहस्राणि जप्तानि भवन्ति। गायत्र्याः शतसहस्रं जप्तं भवति। प्रणवानामयुतं जप्तं भवति। रूपे रूपे दश पूर्वान् पुनाति। दशोत्तरानाचक्षुषः पङ्क्तिं पुनातीत्याह भगवानथर्वशिरोऽथर्वशिरः। सकृज्जप्त्वा शुचिः पूतः कर्मण्यो भवति। द्वितीयं जप्त्वा गाणपत्यम-वाप्नोति। तृतीयं जप्त्वा देवमनुप्रविशत्यों सत्यम् ॥68॥

पशु के पाशों से छूटने के लिए जो ब्राह्मण इस अथर्वशीर्ष का पाठ करता है, वह अग्नि के समान, वायु के समान, सूर्य के समान, चन्द्र के समान, पवित्र और निर्मल हो जाता है। वह सत्य की तरह शुद्ध होता है। वह सभी में पवित्र, सभी तीर्थों में स्नान किया हुआ होता है, वह सब वेदों का जानकार होता है, वह वेदों में विहित सभी व्रताचरण का आचरने वाला होता है, सभी देवों के द्वारा वह जाना गया होता है। उसने सब यज्ञ सत्कर्मादि कर लिए हैं, उसने इतिहास-पुराणों और रुद्रमंत्रों के लाख जप किए हैं, पुराणों के अयुतसंख्या में जाप किए हैं, गायत्री के लाख जप उसने किए हैं। उसने ॐकार का अयुत जप किया है, वह अपने पूर्व की दश पीढ़ियों का और आगे की दश की पीढ़ियों का उद्धार कर देता है। उसके दर्शन से लोग पवित्र होते हैं। यह सब भग्रवान् अथर्वशिर ने कहा है। इस उपनिषद् का एक बार पाठ करने से मनुष्य पवित्र, निर्मल और सर्वकर्मकृत होता है। दो बार पाठ करके मनुष्य गाणपत्य को प्राप्त हो जाता है और तीसरी बार जाप करके मनुष्य देव में अनुप्रविष्ट हो जाता है। ऐसा अवश्य होता है, यह सत्य ही है, इसमें किसी प्रकार का सन्देह नहीं किया जा सकता।

यो रुद्रो अग्नौ यो अप्स्वन्तर्य ओषधीर्वीरुध आविवेश।
य इमा विश्वा भुवनानि चक्लृपे तस्मै रुद्राय नमो अस्तु ॥69॥

जो रुद्र अग्नि में रहते हैं, जो पानी में रहते हैं वही औषधियों और लताओं में भी प्रविष्ट रहते हैं। जिसने यह सारा विश्व और अनेक लोक निर्मित किए हुए हैं, उस रुद्र देवता को मैं बार-बार नमस्कार करता हूँ।

अस्य मूर्धानमस्य संशीर्योऽथर्वा हृदयं च मन्मस्तिष्कादूर्ध्वं प्रेरयन् पव-
मानोऽथ शीर्ष्णस्तद्वाऽथर्वशिरो देवकोशः समुज्झितः तत्प्राणोऽभिरक्षतु।
नियमन्नमथो मनःश्रियमन्नमथो मनोविद्यामन्नमथो मनोविद्यामन्नमथो
मनोमोक्षमन्नमथो मनोमोक्षमन्नमथो मन इत्यों सत्यमित्युपनिषत् ॥70॥

इत्यथर्वशिर उपनिषत् समाप्ता।

जिस अथर्वा ने इस ब्रह्माण्ड का और पिण्ड ब्रह्माण्ड का मूल तक पूर्णरूप से शासन किया है, जिस सर्वपावक परमेश्वर ने प्राणसहित अन्तःकरण (हृदय) का और प्रारब्धक्षय के बाद मेरे मस्तक से ऊपर मुझे प्रेरित करके तुर्यावस्था का कोश खोल दिया है, वह परमेश्वर मेरे समाधिस्थ शरीर का रक्षण करे। जहाँ तक मेरा शरीर पृथ्वी पर रहे, वहाँ तक देहधारण के लिए उपयोगी अन्न, सुविधा, मन का स्वास्थ्य आदि परमेश्वर देते रहें। वहाँ तक मेरी ब्रह्म विद्या बनी रहे। मुझे इन सबके साथ अन्त में मोक्ष भी मिले।

इस प्रकार यहाँ अथर्वशिर उपनिषत् पूरी हुई।

शान्तिपाठः

ॐ भद्रं कर्णेभिः........देवहितं यदायुः। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः॥
ॐ स्वस्ति न इन्द्रो.......बृहस्पतिर्दधातु। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः॥

(23) अथर्वशिखोपनिषत्

(उपनिषत्परिचय)

यह अथर्ववेदीय उपनिषद् है। इस उपनिषद् में ॐकार मंत्र, उसके ध्यान की रीति, उसका स्वरूप, इसका अधिकारी आदि का एक निराले ढंग से प्रतिपादन किया गया है। ॐकार के चार पाद, उसकी मात्राएँ, देव, छन्द, अग्नि आदि का भी उल्लेख किया गया है। बाद में उस ॐकार के अनेक नामों की अन्वर्थकता भी बताई गई है। इसमें ॐकार की मात्राओं की जो व्याख्या की गई है, उसमें थोड़ी-सी अस्पष्टता मालूम होती है। चतुर्थ मात्रा के बारे में इसमें कहा गया है—'स्थूलह्रस्वदीर्घप्लुतः।' परन्तु इससे पहले 'चतुर्थ्यर्धमात्रा लुप्तमकारः' ऐसा पाठ निर्णयसागरीय संस्करण में मिलता है।—इन दोनों का मेल नहीं बैठता। इसके लिए ब्रह्मयोगी के विवरण का और उनके द्वारा स्वीकृत पाठ 'सोमलोक ओंकारः' का अवलम्बन करके सभी उपनिषदों के और वेदान्त के अभिमत अर्थ को बिठाने का प्रयत्न किया गया है। इस उपनिषद् के तीन खण्ड हैं।

शान्तिपाठः

ॐ भद्रं कर्णेभिः.........देवहितं यदायुः। (पूर्ववत्)

ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (अथर्वशिर उपनिषद् में) द्रष्टव्य है।

प्रथमः खण्डः

अथ हैनं पैप्पलादोऽङ्गिराः सनत्कुमारश्चाथर्वाणमुवाच-भगवन् किमादौ प्रयुक्तं ध्यानं ध्यायितव्यं किं तद्ध्यानं को वा ध्याता कश्च ध्येयः ॥1॥

तब पिप्पलाद का पुत्र अंगिरा और सनत्कुमार ने अथर्वा के पास जाकर पूछा—हे भगवन्! मुमुक्षुओं को पहले किसका ध्यान करना चाहिए? वह ध्यान क्या है? ध्यानकर्ता कौन होता है? ध्यान का ध्येय (ध्यान-विषय) क्या है?

स एभ्योऽथर्वा प्रत्युवाच—ओमित्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितव्यमित्येतदक्षरं परं ब्रह्मास्य पादाश्चत्वारो वेदाश्चतुष्पादिदमक्षरं परं ब्रह्म ॥2॥

तब उस अथर्वा ने इन सनत्कुमार और पैप्पलाद से कहा—सर्वप्रथम 'ओम्' इस अक्षर का ध्यान करना चाहिए। उस अक्षर को परब्रह्म समझना चाहिए। चार वेद इसके चार पाद हैं। इसलिए इस परब्रह्म को 'चतुष्पाद' कहा जाता है।

पूर्वाऽस्य मात्रा पृथिव्यकारः स ऋग्भिर्ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः ॥3॥

इसकी पहली मात्रा (अर्थात् पाद) पृथिवीरूप अकार है, वह ऋग्वेदस्वरूप है, इसके देव ब्रह्मा है, इसके गणदेवता आठ वसु हैं, इसका छन्द गायत्री है और गार्हस्पत्य अग्नि है।

द्वितीयाऽन्तरिक्षं स उकारः। स यजुर्भिर्यजुर्वेदो विष्णू रुद्रास्त्रिष्टुब्द-क्षिणाग्निः ॥4॥

इसकी दूसरी मात्रा अन्तरिक्षरूप 'उ'कार है। इसका स्वरूप यजुर्वेद है। उसके देव विष्णु हैं, और गणदेवता एकादश रुद्र हैं। इसका छन्द त्रिष्टुप् है और अग्नि दक्षिणाग्नि है।

तृतीया द्यौः स मकारः। स सामभिः सामवेदो रुद्र आदित्या जगत्या-हवनीयः ॥5॥

इसकी तीसरी मात्रा (पाद) द्यौः (द्युलोक) है। वह 'मकार' है। वह सामवेद का स्वरूप है। इसका देव रुद्र है, इसके गणदेवता बारह आदित्य हैं। इसका छन्द जगती है और इसका अग्नि आहवनीय है।

याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोक ओंकारः। साऽथर्वणैर्मन्त्रै-रथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेकर्षिर्भास्वती स्मृता ॥6॥

अन्त में जो चौथी अर्धमात्रा है, वह सोमलोक रूप ओंकार अर्थात् बिन्दुरूप है। वह अथर्ववेदरूप है। उसके देव संवर्तक नाम के अग्नि हैं, गणदेवता सात मरुत् गण हैं, विराट् नाम का छन्द है, एकर्षि नाम का अग्नि है।

प्रथमा रक्तपीता महद्ब्रह्मदैवत्या। द्वितीया विद्युमती कृष्णा विष्णुदैव-त्या। तृतीया शुभाशुभा शुक्ला रुद्रदैवत्या। यावसानेऽस्य चतुर्थ्य-र्धमात्रा सा विद्युमती सर्ववर्णा पुरुषदैवत्या ॥7॥

उनमें से पहली मात्रा धुंधली लालिमायुक्त पीले रंगवाली है, दूसरी मात्रा चमकते हुए काले रंगवाली है और तीसरी शुक्लवर्ण है। पहली मात्रा ब्रह्मदैवत्य - ब्रह्मारूप देवतावाली, दूसरी विष्णुदेव वाली तथा तीसरी रुद्रदेव वाली है और इसके अन्त में चौथी जो अर्धमात्रा है वह चमकीली और सर्ववर्णवाली है और उसका देव आत्मा है।

स एष ह्योंकारश्चतुरक्षरश्चतुष्पादश्चतुःशिरश्चतुश्चतुर्धा मात्रा स्थूलमेत-द्ध्रस्वदीर्घप्लुतम् ॥8॥

वह यह ओंकार इस प्रकार, अ-उ-म-अर्धमात्रा रूप चार अक्षरों वाला, विश्वविराडादि भेद से चार पाद वाला, चार मस्तकवाला तथा चार-चार मात्रावाला है। ये स्थूल, ह्रस्व, दीर्घ और प्लुत हैं। ओंकार की अर्धमात्रा सूक्ष्म है।

ॐ ॐ ॐ इति त्रिरुक्त्वा चतुर्थः शान्त आत्मा प्लुतप्रणवप्रयोगेण समस्तमोमिति प्रयुक्तमात्मज्योतिः सकृदावर्तते ॥9॥

तीन बार ॐ ॐ ॐ ऐसा कहकर फिर चौथी बार प्लुतोच्चारण में आत्मा शान्त हो जाता है और यह सब कुछ ब्रह्म ही है, ऐसा ध्यान करने से आत्मज्योति एकाएक (एकबारगी) फिर से प्रकाशित हो उठती है।

सकृदुच्चारितमात्रेणोर्ध्वमुन्नामयतीत्योंकारः । प्राणान् सर्वान् प्रलीयत इति प्रलयः (प्रणवः) । प्राणान् सर्वान् परमात्मनि प्रणामयतीत्येतस्मात् प्रणवः । चतुर्धाऽवस्थित इति सर्वदेववेदयोनिः सर्ववाच्यवस्तु प्रणवात्मकम् ॥10॥

इति प्रथमः खण्डः ।

केवल एक बार उच्चारण करने से ऊपर उठाता है - उन्नयन करता है, इसीलिए इसे 'ॐकार' कहा गया है । यह सभी प्राणों को अपने में लीन कर देता है इसलिए इसका नाम 'प्रलय' पड़ा है । सभी प्राणों को परमात्मा में प्रणत (वश में) कर देता है इसलिए वह 'प्रणव' कहा जाता है । वह चार प्रकार से अवस्थित है इसलिए उसे 'सर्वदेववेदयोनि' कहा जाता है । सभी वाच्यपदार्थों में अनुस्यूत एक ही वस्तु प्रणवात्मक ही है ।

यहाँ प्रथम खण्ड समाप्त हुआ ।

❋

द्वितीयः खण्डः

देवाश्चेति संधत्तां सर्वेभ्यो दुःखभवेभ्यः सन्तारयतीति तारणात्तारः ॥1॥

सभी देव और सभी वेद भी, जो तुरीय ओंकार के रूप में माना गया है, उसको अपने सभी दुःखों और भयों से मुक्ति पाने के लिए ध्यान करने लगे थे और उनका इसने तारण (उद्धार) किया, इसलिए इसे 'तार' भी कहा जाता है ।

सर्वे देवाः संविशन्तीति विष्णुः ॥2॥

और भी इस तुरीय ओंकार में सभी देवता–प्राणादि इन्द्रियों के साथ प्रवेश कर जाते हैं इसलिए इसको 'विष्णु' नाम से भी कहा जाता है ।

सर्वाणि बृंहयतीति ब्रह्म ॥3॥

और जो अपने अतिरिक्त बाकी के अविद्या और उसके कार्य आदि को खाकर (अपने में समाकर) अपने आश्रय में रखकर वृद्धि करता है (बृंहयति), इसलिए उसे 'ब्रह्म' कहते हैं ।

सर्वेभ्योऽन्तःस्थानेभ्यो ध्येयेभ्यः प्रदीपवत् प्रकाशयतीति प्रकाशः ॥4॥

जो सभी ध्येयों (विषयों) को और सभी मन आदिक आन्तरिक विषयों को भी प्रदीप की तरह प्रकाशित करता रहता है, इसीलिए वह 'प्रकाश' भी कहा जाता है ।

प्रकाशेभ्यः सदोमित्यन्तःशरीरे विद्युद्वद्द्योतयति मुहुर्मुहुरिति विद्युद्वत् प्रतीयां दिशं भित्त्वा सर्वाँल्लोकान् व्याप्नोति व्यापयतीति व्यापनाद् व्यापी महादेव ॥5॥

इति द्वितीयः खण्डः ।

और जो अपने अन्तःशरीर में कामादि प्रकाश्य विषयों को स्वयं अलग होकर प्रकाशित करता रहता है । जैसे विद्युत् दिशाओं को भेदकर मेघों को प्रकाशित करती है, व्याप्त हो जाती है, उसी तरह

यह तुरीय ओंकार भी स्वप्रतीतिभूत - स्वरूपिणी माया नाम की दिशा को भेदकर सब विषयों को व्याप्त कर लेती है। (सच्चिदानन्द रूप से घेर लेती है। इस प्रकार के व्यापन (व्यापकता) से वह 'व्यापी' कहा जाता है और 'महादेव' भी कहा जाता है।

यहाँ द्वितीय खण्ड पूरा हुआ।

❋

तृतीयः खण्डः

पूर्वोऽस्य मात्रा जागर्ति जागरितं द्वितीया स्वप्नं तृतीया सुषुप्तिश्चतुर्थी तुरीयम् ॥1॥

इस ओंकार की 'अ'कार नाम की पूर्व मात्रा जाग्रत् अवस्था है, दूसरी अवस्था स्वप्न है, तीसरी अवस्था सुषुप्ति है और चौथी अवस्था तुरीय है।

मात्रा मात्राः प्रतिमात्रागताः सम्यक् समस्तानपि पादान् जयतीति स्वयंप्रकाशः स्वयं ब्रह्म भवतीत्येष सिद्धिकर एतस्माद्ध्यानादौ प्रयुज्यते। सर्वकरणोपसंहारत्वाद्धार्यधारणाद् ब्रह्म तुरीयम् ॥2॥

इस प्रकार अकारादि मात्राओं में पूर्व-पूर्व मात्रा का उत्तर-उत्तर मात्रा में विलय हो जाने पर सभी पादों पर वह विजय प्राप्त करता है। इस प्रकार वह विद्वान स्वयंप्रकाश हो जाता है। इस प्रकार वह तत्त्वज्ञान की सिद्धि को प्राप्त करता है। इससे वह निर्विकल्प समाधि आदि में प्रयुक्त होता है। उस समय सभी करणों का उपसंहार हो जाने से तत्त्वमात्ररूप धार्य की धारणा से वह तुरीय ब्रह्म अवशिष्ट रहता है।

सर्वकरणानि सम्प्रतिष्ठाप्य ध्यानं विष्णुः प्राणं मनसि सह करणैः मनसि सम्प्रतिष्ठाप्य ध्याता रुद्रः प्राणं मनसि सह करणैर्नादान्ते परमात्मनि सम्प्रतिष्ठाप्य ध्यायीतेशानं प्रध्यायितव्यम् ॥3॥

उस तुर्य ब्रह्म में सभी करणों को अच्छी तरह से प्रस्थापित करके (विलय करके) ध्यान किया जाता है, इसका प्रधान पुरुष विष्णु होता है। और इन्द्रियों के साथ प्राण को मन में प्रतिष्ठापित करके ध्यान किए जाने पर केवल मन ब्रह्माकार रूप में परिणत होने पर वह ध्याता रुद्र होता है और मुमुक्षुओं के द्वारा इन्द्रियसहित प्राण मन में एवं मन ब्रह्मप्रवण नाद के अन्तरूप परमात्मा में प्रतिस्थापित किये जाने पर ईश्वर का ध्यान करना चाहिए।

सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते सम्प्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां ध्याता कारणं तु ध्येयः सर्वैश्वर्यसम्पन्नः सर्वेश्वरः शंभुराकाशमध्ये ध्रुवं स्तब्ध्वाऽधिकं क्षणमेकं क्रतुशतस्यापि चतुःसप्तत्या यत्फलं तदवाप्नोति कृत्स्नमोंकारगतिश्च सर्वध्यानयोगज्ञानानां यत् फलमोंकारो वेद पर ईशो वा शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य ॥4॥

जिससे यह सारा जगत् और ब्रह्मा, विष्णु और रुद्र जन्म लेते हैं, वह सबका कारणरूप ईश्वर नाम का ब्रह्म ही है। उसके अतिरिक्त ये सभी इन्द्रियाँ और पंचमहाभूत कोई कारण नहीं है। इसलिए

ध्याता (परमेश्वर) ही सर्वध्येयरूप होकर सबका कारण बनता है। वह सर्वैश्वर्य से युक्त है, वह सर्वेश्वर है, वही शंभु है। ऐसे शाश्वत आत्मा को जो कोई भी पुरुष अपने हृदयाकाश में एक क्षण या क्षणार्ध भी स्थिर होकर ध्यान करे, तो उसको उसी स्वरूप की प्राप्तिरूप फल ही तो है, पर अन्तराल फल में एक सौ चौहत्तर यज्ञानुष्ठान के फलों की भी प्राप्ति होती है। ओंकार की पूर्ण गति को भी वह जान लेता है। इस प्रकार जो ओंकार को जानता है वह मुनि सभी ध्यान, योग और ज्ञान का जो फल होता है, उसे प्राप्त करता है। इसलिए और सभी वस्तुओं को छोड़कर एकमात्र शिव (ईश) का ही ध्यान करना चाहिए। वही कल्याणकारी है।

समाप्ताऽथर्वशिखा। तामधीत्य द्विजो गर्भवासाद्विमुक्तो मुच्यते। एताम-
धीत्य द्विजो गर्भवासाद् विमुक्तो विमुच्यत इत्योंऽसत्यमित्युपनिषत् ॥5॥

इति तृतीयः खण्डः।

इत्यथर्वशिखोपनिषत्समाप्ता।

यहाँ अथर्वशिखा समाप्त होती है। इसका अध्ययन करके द्विज गर्भवास से छुटकारा पाकर यहाँ भी जीवन्मुक्त हो जाता है। इसका अध्ययन करके द्विज गर्भवास से छुटकारा पाकर यहाँ जीवन्मुक्त हो जाता है। उपनिषत् की समाप्ति के सूचक के रूप में यह वाक्य दुहराया गया है। यहाँ उपनिषत् पूर्ण हुई।

तृतीय खण्ड भी समाप्त हुआ।

शान्तिपाठ

ॐ भद्रं कर्णेभिः......देवहितं यदायुः। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

❋

(24) मैत्रायण्युपनिषत्

(उपनिषत्परिचय)

सामवेद से सम्बद्ध इस उपनिषत् के स्वरूप (आकार) में अनेक प्रकार की विसंगतियाँ देखने में आती हैं; यथा—सन् 1948 के निर्णयसागरीय संस्करण में तथा 1970 वाले मोतीलाल बनारसीदास द्वारा प्रकाशित संस्करण में इस उपनिषत् के **सात** प्रपाठक दिए हैं। सन् 1938 की सर्वहितैशी कम्पनी, रामघाट, काशी के संस्करण में इस उपनिषत् के **चार** प्रपाठक दिए हैं। अड्यार लाईब्रेरी, मद्रास के संग्रह में भी इस उपनिषत् के **चार** ही प्रपाठक दिए गए हैं। ब्रह्मयोगी के विवरण टीका वाले उपनिषत्संग्रह में भी इस उपनिषत् के **चार** प्रपाठक ही दिए हैं। श्रीरामशर्मा आचार्य के उपनिषदों के संग्रह में इस उपनिषद् के **पाँच** प्रपाठक दिए गए हैं। यहाँ चार प्रपाठक देने वालों का बहुमत देखकर चार प्रपाठक वाली उपनिषत् ही ली गई है। इसमें बृहद्रथ राजा को शाकायन्य मुनि उपदेश देते हुए कहते हैं कि पहले इस विषय में भगवान् मैत्रेय को हुए ज्ञान में जो था वही सुनाता हूँ। फिर उन्होंने प्राणों के भेद बताए, आत्मा और भूतात्मा का भेद बताया, जीवनरथ का सुन्दर रूपक भी कहा। जीवनरथ में ज्ञानेन्द्रियों की लगाम कर्मेन्द्रियों के घोड़ों को लगाई है। अन्तःप्रवृत्ति चाबुक है और आत्मा संचालक है। इन्धन समाप्त होने पर जैसे अग्नि शान्त हो जाती है, वैसे ही मनोवृत्तियों के शान्त होने पर चित्त शान्त हो जाता है। इसमें ॐकार और उद्गीथ की एकता समझाई गई है। गायत्री का पदच्छेद और उसकी उपासना का महत्त्व बताया गया है।

शान्तिपाठः

ॐ आप्यायन्तु ममाङ्गानि............ते मयि सन्तु । (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (आरुण्युपनिषद् में) द्रष्टव्य है।

प्रथमः प्रपाठकः

बृहद्रथो ह वै नाम राजा राज्ये ज्येष्ठं पुत्रं निधापयित्वेदमशाश्वतं मन्यमानः शारीरं वैराग्यमुपेतोऽरण्यं निर्जगाम। स तत्र परमं तप आस्थायादित्य-मीक्षमाण ऊर्ध्वबाहुस्तिष्ठत्यन्ते सहस्रस्य मुनिरन्तिकमाजगामाग्निरिवा-धूमकस्तेजसा निर्दहन्निवात्मविद् भगवान् शाकायन्यः। उत्तिष्ठोत्तिष्ठ वरं वृणीष्वेति राजानमब्रवीत्। स तस्मै नमस्कृत्योवाच भगवन् नाहमात्मवित् त्वं तत्त्वविच्छृणुमो वयं स त्वं नो ब्रूहीति। एतद् व्रतं पुरस्तादशक्यं मा पृच्छ प्रश्नमैक्ष्वाकान्यान् कामान् वृणीष्वेति। शाकायन्यस्य चरण-मभिमृश्यमानो राजेमां गाथां जगाद ॥1॥

बृहद्रथ नाम के किसी एक राजा को 'यह शरीर अनित्य है'—ऐसा विचार आने से वैराग्य उत्पन्न

हुआ। इसलिए वह अपने बड़े पुत्र को राज्यभार सौंपकर वन में चला गया। वहाँ लम्बे समय तक उसने तपश्चर्या की। वह हाथ ऊँचा करके सूर्य के सामने देखता रहता था। अन्त में एक हजार वर्ष के बाद, उस तपश्चर्या के फलस्वरूप शाकायन्य नाम के आत्मवेत्ता महामुनि उसके पास आए। वह मुनि निर्धूम अग्नि की तरह तेजस जाज्वल्यमान जैसे लगते थे। उन्होंने राजा से कहा—'हे राजन्! उठो, खड़े हो और वरदान माँगो।' तब राजा ने उनसे कहा—'हे भगवन्! मैं आत्मवेत्ता नहीं हूँ। हमने सुना है कि आप आत्मवेत्ता हैं। इसलिए आप मुझे आत्मज्ञान का वरदान दीजिए।' ऐसा सुनकर मुनि ने उससे कहा—'हे इक्ष्वाकुवंशी राजन्! तुम दूसरा कोई वरदान माँग लो। तुम पहले से ही अशक्य प्रश्न मत पूछो।' यह सुनकर बृहद्रथ राजा शाकायन्य का चरणस्पर्श करके यह गाथा कहने लगा।

भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिते विण्मूत्रवातपित्तकफसंघाते दुर्गन्धे निःसारेऽस्मिन् शरीरे किं कामोपभोगैरिति ॥2॥

(राजा बोला—) हे भगवन्! यह शरीर अस्थियों, चर्म, स्नायुओं, मज्जा, मांस, वीर्य, लहू, श्लेष्मा आदि से दूषित है और विष्टा, मूत्र, पित्त, कफ आदि से युक्त है और सारहीन है, तो विषयोपभोगों की क्या आवश्यकता है?

कामक्रोधलोभमोहभयविषादेर्ष्येष्टवियोगानिष्टसंयोगक्षुत्पिपासाजरामृत्युरोगशोकाद्यैरभिहतेऽस्मिन् शरीरे किं कामोपभोगैः ॥3॥

यह शरीर काम, क्रोध, लोभ, भय, खेद, ईर्ष्या, इष्टवियोग, अनिष्टसंयोग, भूख, प्यास, वृद्धावस्था, मृत्यु, शोक आदि से पीड़ित है। ऐसे शरीर में विषयभोगों की क्या आवश्यकता है?

सर्वं चेदं क्षयिष्णु पश्यामो यथेमे दंशमशकादयस्तृणवन्नश्यतयोद्भूतप्रध्वंसिनः ॥4॥

यह सारा जगत विनाशशील है, मैं सबको मरते हुए देखता हूँ। जैसे दंश, मच्छर आदि जन्तु तो तिनके की तरह जन्मते ही नष्ट होते (मरते) रहते हैं।

अथ किमेतैर्वा परेऽन्ये महाधनुर्धराश्चक्रवर्तिनः केचित् सुद्युम्नभूरिद्युम्नेन्द्रद्युम्नकुवलयाश्वयौवनाश्वबद्धियाश्वाश्वपतिः शशबिन्दुर्हरिश्चन्द्राऽम्बरीष मनूत्थशर्यातिर्ययातिरनरण्योक्षसेनोत्थमरुत्तभरतप्रभृतयो राजानो मिषतो बन्धुवर्गस्य महतीं श्रियं त्यक्त्वाऽस्माल्लोकादमुं लोके प्रयान्ति ॥5॥

उन जन्तुओं को क्या कहें? परन्तु बड़े-बड़े धनुर्धारी और चक्रवर्ती सुद्युम्न, भूरिद्युम्न, इन्द्रद्युम्न, कुवलयाश्व, यौवनाश्व और उसके जैसे धियाश्व, अश्वपति, शशबिन्दु, हरिश्चन्द्र, अम्बरीष, मनु का पुत्र शर्याति, ययाति, अनरण्य, उग्रसेन, उसका पुत्र मरुत्त और भरत आदि चक्रवर्ती राजा भी अपने बन्धुवर्ग सहित देखते-देखते ही इस लोक की विपुल समृद्धि छोड़कर प्रयाण कर गये हैं।

अथ किमेतैर्वा परेऽन्ये गन्धर्वासुरयक्षराक्षसभूतगणपिशाचोरगग्रहादीनां निरोधनं पश्यामः ॥6॥

और तो क्या मनुष्योपरान्त अन्य गन्धर्व, असुर, यक्ष, राक्षस, भूतगण, पिशाच, साँप और ग्रह आदि भी मरते हुए देखे गए हैं।

अथ किमेतैर्वाऽन्यानां शोषणं महार्णवानां शिखरिणां प्रपतनं ध्रुवस्य प्रचलनं स्थानं वा तरूणां निमज्जनं पृथिव्याः स्थानादपसरणं सुराणां सोऽहमित्येतद्विधेऽस्मिन् संसारे किं कामोपभोगैर्यैरेवाश्रितस्यासकृदिहा-वर्तनं दृश्यत इत्युद्धर्तुमर्हसीत्यन्धोदपानस्थो भेक इवाहमस्मिन् संसारे भगवंस्त्वं नो गतिस्त्वं नो गतिः ॥7॥

इति प्रथमः प्रपाठकः ।

अथवा और क्या कहूँ ? बड़े-बड़े समुद्र भी सूख जाते हैं, पर्वत भी टूट-फूट जाते हैं, ध्रुव भी अपने स्थान से चलित हो जाता है, वृक्ष गिर पड़ते हैं, धरती भी अपने स्थान से खिसक जाती है, देव भी नीचे गिर जाते हैं, तो 'यह मैं हूँ'—ऐसे अहंकार से भरे इस संसार में विषयोपभोग से भला क्या लाभ है ? विषयों में लीन रहनेवालों को तो बार-बार जन्म-मरण के फेरे में घूमना ही पड़ता है, ऐसा देखा जाता है । इसलिए हे भगवन् ! अँधेरे कुएँ में पड़े हुए मेढक जैसे मेरा आप उद्धार कीजिए । आप ही मेरी शरण हैं । आप ही मेरे आधार है ।

यहाँ प्रथम प्रपाठक पूरा हुआ ।

❄

द्वितीयः प्रपाठकः

अथ भगवान् शाकायन्यः सुप्रीतोऽब्रवीद्राजानं महाराज बृहद्रथेक्ष्वाकु-वंशध्वजशीर्षात्मजः कृतकृत्यस्त्वं मरुन्नाम्नो विश्रुतोऽसीत्ययं वाव खल्वात्मा ते कतमो भगवान् वर्ण्य इति तं होवाच ॥1॥

यह सुनकर महर्षि शाकायन्य प्रसन्न होकर राजा से कहने लगे—'हे महाराजा बृहद्रथ ! इक्ष्वाकुवंश के ध्वजशीर्ष के तुम पुत्र हो । तुम 'मरुत्' नाम से सुविख्यात हो और कृतकृत्य (धन्य) हो । यह आत्मा कैसा है, वह मैं तुम्हें समझाता हूँ ।' यह सुनकर राजा ने कहा—'भगवन् आप उसका वर्णन कीजिए ।' तब वे मुनि राजा से कहने लगे—

य एषो बाह्यावष्टम्भनेनोर्ध्वमुत्क्रान्तो व्यथमानोऽव्यथमानस्तमः प्रणु-दत्येष आत्मेत्याह भगवानथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतमृतम-भयमेतद् ब्रह्मेति ॥2॥

'बाह्येन्द्रियों का निरोध करने से यह प्राणरूप आत्मा योग द्वारा ऊपर चढ़ता है । वह दुःख भोगता हुआ दीखने पर भी दुःखरहित ही होता है और वह अन्धकार का नाश कर देता है ।' ऋषि ने आगे कहा—'यह आत्मा इस शरीर में से बाहर निकलकर परम ज्योतिरूप ब्रह्म को प्राप्त करके अपने स्वरूप में स्थिर रहता है, वही आत्मा अमृतरूप, अभयरूप और ब्रह्मरूप है ।'

अथ खल्वियं ब्रह्मविद्या सर्वोपनिषद्विद्या वा राजन्नस्माकं भगवता मैत्रेयेण व्याख्याताऽहं ते कथयिष्यामीत्यथापहतपाप्मानस्तिग्मतेजस ऊर्ध्वरेतसो वालखिल्या इति श्रूयन्तेऽथैते प्रजापतिमब्रुवन् भगवन् शकटमिवाचेतनमिदं शरीरं कस्यैष खल्वीदृशो महिमाऽतीन्द्रियभूतस्य

येनैतद्विधमिदं चेतनवत् प्रतिष्ठापितं प्रचोदयिताऽस्य को भगवन्नेतद-स्माकं ब्रूहीति तान् होवाच ॥3॥

हे राजन् ! सभी उपनिषदों ने जिसका उपदेश किया है ऐसी यह ब्रह्मविद्या भगवान् मैत्रेय ने हमको बताई है, वही मैं तुम्हें बताता हूँ। जिनके पाप नष्ट हो गए हैं ऐसे प्रचंड तेजस्वी ब्रह्मचारी वालखिल्य नाम के मुनि तो सुप्रसिद्ध हैं। उन मुनियों ने एक बार ब्रह्माजी से पूछा था—'हे भगवन् ! यह शरीर तो बैलगाड़ी की तरह अचेतन ही है। तो फिर यह सब किसकी महिमा है ? कौन-सा ऐसा अतीन्द्रिय पदार्थ है कि जिसकी वजह से यह जड़ शरीर चेतन की तरह प्रतिष्ठित दिखाई देता है ? उसे प्रेरणा देनेवाला कौन है ? यह हमें बताइए।' तब ब्रह्मा ने उत्तर दिया था (कि—)

यो ह खलु वाचोपरिस्थः श्रूयते स एव वा एष शुद्धः पूतः शून्यः शान्तः प्राणोऽनीशात्माऽनन्तोऽक्षय्यः स्थिरः शाश्वतोऽजः स्वतन्त्रः स्वे महिम्नि तिष्ठत्यनेनेदं शरीरं चेतनवत्प्रतिष्ठापितं प्रचोदयिता चैषोऽस्येति ते होचु-र्भगवन् कथमनेनेदृशेनानिच्छेनैतद्विधमिदं चेतनवत् प्रतिष्ठापितं प्रचो-दयिता चैषोऽस्येति कथमिति तान् होवाच ॥4॥

'जो वाणी से परे विद्यमान है, ऐसा सुना जाता है कि वह शुद्ध, पवित्र, शून्य, शान्त, जीवनदाता, अनीश्वर का आत्मा, अनन्त, अविनाशी, स्थिर, सनातन, जन्मरहित, स्वतंत्र—ऐसा आत्मा अपनी महिमा में अवस्थित है। उसी के कारण यह शरीर चेतन की तरह प्रतिष्ठापित हुआ है। वही इसको प्रेरणा देनेवाला है। ऐसी इसकी महिमा है।' यह सुनकर वालखिल्य ने पूछा—'वह आत्मा इच्छारहित होने पर भी क्यों और कैसे इस शरीर को चेतन जैसा बनाया और उसे टिकाया भी ? वह उसका प्रेरक कैसे हुआ ? और उसकी महिमा कैसी है ?' तब ब्रह्मा ने कहा कि—

स वा एष सूक्ष्मोऽग्राह्योऽदृश्यः पुरुषसंज्ञको बुद्धिपूर्वमिहैवावर्ततेंऽशेन सुषुप्तस्यैव बुद्धिपूर्वं निबोधयत्यथ यो ह खलु वावैतस्यांशोऽयं यश्चे-तनमात्रः प्रतिपूरुषं क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानलिङ्गः प्रजापतिर्वि-श्वाक्षस्तेन चेतनेनेदं शरीरं चेतनवत् प्रतिष्ठापितं प्रचोदयिता चैषोऽस्येति ते होचुर्भवन्नीदृशस्य कथमंशेन वर्तमिति तान् होवाच ॥5॥

'यह आत्मा सूक्ष्म, अग्राह्य और अदृश्य है। इसका नाम 'पुरुष' है। वह अपने एक अंश से यहाँ बुद्धिपूर्वक क्रिया करता है, सुषुप्त मनुष्य को बुद्धि से जगाता है। वह उसका जो अंश है, वही यहाँ जीवरूप बना है। सभी प्राणियों का जीवात्मा वही है। प्रत्येक शरीर में वही क्षेत्रज्ञ रूप से रहा है। और वही संकल्प, प्रयत्न, अभिमान से युक्त प्रजापतिरूप और सबको देखनेवाला है। उस चेतन से ही यह शरीर चेतनमय बना है। वही इस शरीर को क्रिया करने के लिए प्रेरित करता है।' तब वालखिल्य ने पूछा—'भगवन् ! वह आत्मा अखण्ड होने पर भी किस तरह अपने अंश से यहाँ अवस्थित है ?' तब उन्हें ब्रह्माजी ने उत्तर दिया कि—

प्रजापतिर्वा एषोऽग्रेऽतिष्ठत्। स नारमतैकः। स आत्मानमभिध्यायद्बह्वीः प्रजा असृजत्ता अस्यैवात्मप्रबुद्धा अप्राणा स्थाणुरिव तिष्ठमाना अपश्यत् स नारमत। सोऽमन्यतैतासां प्रतिबोधनायाभ्यन्तरं प्राविशानीत्यथ स वायुमिवात्मानं कृत्वाऽभ्यन्तरं प्राविशत् स एको नाविशत्। स पञ्चधा-ऽऽत्मानं प्रविभज्योच्यते यः प्राणोऽपानः समान उदानो व्यान इति ॥6॥

सबसे पहले केवल प्रजापति ही एकमात्र थे। उन्हें अकेले को कुछ चैन न पड़ा अर्थात् अपने को अकेले सन्तुष्ट नहीं कर सके। इसलिए उन्होंने आत्मा का ध्यान करके तरह-तरह की प्रजाएँ उत्पन्न कीं। परन्तु, अपने द्वारा उत्पन्न की गई इन प्रजाओं को प्राणविहीन और खम्भों की भाँति जड़ देखा। वह उन्हें पसन्द न आया। उन्होंने सोचा कि इन सभी प्रजाओं को सचेतन करने के लिए मैं उनमें प्रविष्ट होऊँ। ऐसा सोचकर अपने को वायु जैसा बनाकर उन्होंने उनमें प्रवेश किया। पर उन्होंने एक रूप में नहीं परन्तु पाँच रूपों में अपना विभाजन करके प्रवेश किया। इसलिए एक ही प्राण के प्राण, अपान, समान, उदान और व्यान—ऐसे पाँच भेद हुए।

अथ योऽयमूर्ध्वमुत्क्रामतीत्येष वाव स प्राणोऽथ योऽयमवाञ्चं सङ्क्रामत्येष वाव सोऽपानोऽथ योऽयं स्थविष्ठमन्नधातुमपाने स्थापयत्यणिष्ठं चाङ्गेऽङ्गे समं नयत्येष वाव स समानोऽथ योऽयं पीताशितमुद्गिरति निगिरतीति चैष वाव स उदानोऽथ येनैताः सिरा अनुव्याप्ता एष वाव स व्यानः ॥7॥

जो ऊपर गति करता है वह 'प्राण' है, जो नीचे गति करता है वह 'अपान' है, जो अतिशय स्थूल अन्नधातु (मल) को गुदा स्थान में पहुँचाता है और अतिसूक्ष्म धातु को प्रत्येक अंग में समान रूप से ले जाता है, वह 'समान' कहलाता है; जो यह वायु खाए-पीए हुए पदार्थों को उगलता है या निगलता है वह 'उदान' कहलाता है, और जिसके द्वारा ये शिराएँ घिरी हुई रहती हैं, ऐसा जो वायु है वह 'व्यान' कहलाता है।

अथोपांशुरन्तर्याम्यभिभवत्यन्तर्याममुपांशुमेतयोरन्तराले चौष्णं मासवद्यदौष्ण्यं स पुरुषोऽथ यः पुरुषः सोऽग्निर्वैश्वानरोऽप्यन्यत्राप्युक्तमयमग्निर्वैश्वानरो योऽयमन्तः पुरुषो येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यदेतत् कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोति ॥8॥

जो नजदीक में अन्तर्यामी है वह और जो एक प्रहर में पराभव कर सकता है वह—इन दोनों के बीच जो ग्रीष्म ऋतु जैसी उष्णता है, वह पुरुष ही वैश्वानर अग्नि है। अन्य जगहों पर भी ऐसा ही कहा गया है कि यह भीतर रहा हुआ अग्नि वैश्वानर 'अग्निपुरुष' है, जिसकी वजह से अन्न पचता है। जब कुछ खाया जाता है, तब उसी की (वैश्वानर अग्नि की) यह आवाज होती है। कान बन्द करने पर जो आवाज सुनाई देती है, वह उसी की आवाज है। जब शरीर से प्राण निकल जानेवाले होते हैं, तब यह आवाज नहीं सुनाई देती।

स वा एष पञ्चधाऽऽत्मानं प्रविभज्य निहितो गुहायां मनोमयः प्राणशरीरो बहुरूपः सत्यसङ्कल्प आत्मेति स वा एषोऽस्य हृदन्तरे तिष्ठन्नकृतार्थोऽमन्यतार्थानसानि तत्स्वानीमानि भित्त्वोदितः पञ्चमी रश्मिभिर्विषयानत्तीति बुद्धीन्द्रियाणि यानीमान्येतान्यस्य रश्मयः। कर्मेन्द्रियाण्यस्य हया रथः शरीरं मनो नियन्ता प्रकृतिमयोऽस्य प्रतोदनेन खल्वीरितं परिभ्रमतीदं शरीरं चक्रमिव मृते च नेदं शरीरं चेतनवत् प्रतिष्ठापितं प्रचोदयिता चैषोऽस्येति ॥9॥

वह प्रजापतिरूप आत्मा स्वयं को पाँच रूपों में निर्मित करके हृदयरूपी गुफा में स्थिर हुआ है। और वह आत्मा ही मनरूप में, प्राणरूप में, अनेक रूपों में सत्यसंकल्पवाला है। इस प्रकार हृदय में रहता हुआ वह अपने को अकृतार्थ मानने लगा। अपने को कृतार्थ बनाने के लिए वह अपने पाँच द्वारों (इन्द्रियों) को भेदकर प्रकट हुआ। वे पाँच द्वार ही पाँच इन्द्रियाँ बनी हैं। ये ही पाँच ज्ञानेन्द्रियाँ लगाम है, पाँच कर्मेन्द्रियाँ घोड़े हैं, शरीर रथ है, मन सारथि है और स्वभाव (प्रकृति-सहज रुझान) चाबुक है। इसी चाबुक से प्रेरित शरीर पहियों की तरह गतिशील बनता है और मरण के बाद वह सचेतन दिखाई नहीं पड़ता, क्योंकि आत्मा ही शरीर का प्रेरक है।

स वा एष आत्मेत्यदो वशं नीत इव सितासितैः कर्मफलैरभिभूयमान इव प्रतिशरीरेषु चरतव्यक्तत्वात् सूक्ष्मत्वाददृश्यत्वादग्राह्यत्वान्निर्ममत्वाच्चा-नवस्थोऽकर्ता कर्तेवावस्थितः ॥10॥

यह आत्मा मानो शरीर के वश में आ गया हो, और मानो शुभाशुभ कर्मों के फल से बँध गया हो, इस प्रकार भाँति-भाँति के शरीरों में संचरण करता रहता है (हालाँकि वह वास्तविक नहीं है)। परन्तु वास्तविक दृष्टि से देखने पर तो वह अव्यक्त, अदृश्य, सूक्ष्म, अग्राह्य और ममतारहित है। उसमें कर्तृत्व न होने पर भी और उसकी कोई अवस्था (जाग्रत्-स्वप्न-सुषुप्ति) न होने पर भी वह मानो कर्तारूप हो, ऐसा प्रतीत होता है।

स वा एष शुद्धः स्थिरोऽचलश्चालेपोऽव्यग्रो निःस्पृहः प्रेक्षकवदवस्थितः स्वस्य चरितभुग्गुणमयेन पटेनात्मानमन्तर्धायावस्थित इत्यव-स्थित इति ॥11॥

इति द्वितीयः प्रपाठकः।

वह आत्मा शुद्ध, स्थिर, अचल, निरासक्त, दुःखरहित, इच्छारहित द्रष्टा रूप होने पर भी अपने कर्मों को मानो भोगता हो, ऐसा दिखाई देता है। वही (सत्त्वादि) तीन गुणों रूपी वस्त्र से अपने को आच्छादित रखता हो, ऐसा मालूम होता है।

यहाँ पर दूसरा प्रपाठक पूरा होता है।

❈

तृतीयः प्रपाठकः

ते होचुर्भगवन् यद्येवमस्यात्मनो महिमानं सूचयसीत्यन्यो वा परः कोऽयमात्मा सितासितैः कर्मफलैरभिभूयमानः सदसद्योनिमापद्यत इत्यवाचीं वोर्ध्वां वा गतिं द्वन्द्वैरभिभूयमानः परिभ्रमतीति कतम एष इति तान् होवाच ॥1॥

यह सुनकर वालखिल्य ने प्रश्न किया—'हे भगवन्! यदि आप उस आत्मा की ऐसी महिमा कहते हैं, तो फिर शुभाशुभ कर्मों के नीचे दबा हुआ और तदनुसार अच्छी या बुरी योनियों में भटकता हुआ आत्मा क्या कोई दूसरा आत्मा है? सुख-दुःख से पराभव प्राप्त करके उच्च या नीच गति में भटकनेवाला यह कौन-सा आत्मा है?' यह सुनकर ब्रह्मा ने कहा—

अस्ति खल्वन्योऽपरो भूतात्मा योऽयं सितासितैः कर्मफलैरभिभूयमानः सदसद्योनिमापद्यत इत्यवाचीं वोर्ध्वां गतिं द्वन्द्वैरभिभूयमानः परिभ्रमती-त्यस्योपव्याख्यानं पञ्च तन्मात्राणि भूतशब्देनोच्यन्ते पञ्च महाभूतानि भूतशब्देनोच्यन्तेऽथ तेषां यः समुदायः शरीरमित्युक्तमथ यो ह खलु वाव शरीरमित्युक्तं स भूतात्मेत्युक्तमथास्ति तस्यात्मा बिन्दुरिव पुष्कर इति स वा एषोऽभिभूतः प्राकृतैर्गुणैरित्यतोऽभिभूतत्वात् सम्मूढत्वं प्रयात्यसम्मूढत्वादात्मस्थं प्रभुं भगवन्तं कारयितारं नापश्यद्गुणौघै-स्तृप्यमानः कलुषीकृतश्चास्थिरश्चञ्चलो लोलुप्यमानः सस्पृहो व्यग्रश्चा-भिमानत्वं प्रयात इत्यहं सो ममेदमित्येवं मन्यमानो निबन्ध्नात्यात्म-नाऽऽत्मानं जालेनेव खचरः कृतस्यानुफलैरभिभूयमानः परिभ्रम-तीति ॥2॥

जो शुभाशुभ कर्मों के नीचे दबा हुआ है वह तो दूसरा 'भूतात्मा' कहा जाता है। वह अच्छी-बुरी योनि को प्राप्त करता है, ऊँची-नीची गति में जाता है, राग-द्वेष आदि द्वन्द्वों से परेशान होता है। उसे 'भूतात्मा' कहा जाने का कारण यह है कि जो पाँच तन्मात्राएँ हैं और पाँच महाभूत हैं, उन्हें 'भूत' शब्द से पहचाना जाता है। और उन्हीं भूतों का समुदाय ही तो शरीर है। इसलिए उस शरीर को ही 'भूतात्मा' कहा जाता है। उसमें स्थित आत्मा तो कमलपत्र के ऊपर के जल के बिन्दु के समान ही है। फिर भी अपनी प्रकृति के गुणों से पराजित हो जाने से वह मूढ़ बन गया है। इससे वह अपने भीतर स्थित प्रेरक परमात्मा को देख नहीं पाता और गुणों के समूह से ही सन्तुष्ट होता हुआ, पापों से युक्त होता हुआ, अस्थिर, चंचल, लोलुप और अभिमानी बनता हुआ वह, 'यह मैं हूँ', 'यह मेरा है'—ऐसा मानता हुआ अपने आप वह स्वयं बन्धन में पड़ जाता है। जिस प्रकार जाल में पक्षी फँस जाता है, वैसे ही अपने आप ही कर्मफलों में फँसकर इधर-उधर भटकता रहता है।

अथान्यत्राप्युक्तं यः कर्ता सोऽयं वै भूतात्मा करणैः कारयिताऽन्तः-पुरुषोऽथ यथाऽग्निनायःपिण्डो वाऽभिभूतः कर्तृभिर्हन्यमानो नानात्व-मुपेत्यैवं वाव खल्वसौ भूतात्माऽन्तःपुरुषेणाभिभूतो गुणैर्हन्यमानो नानात्वमुपेत्यथ यत्त्रिगुणं चतुरशीतिलक्षयोनिपरिणतं भूतत्रिगुणमेतद्वै नानात्वस्य रूपं तानि ह वा इमानि गुणानि पुरुषेणेरितानि चक्रमिव चक्रिणेत्यथ यथाऽयःपिण्डे हन्यमाने नाग्निरभिभूयत्येवं नाभिभूयत्यसौ पुरुषोऽभिभूयत्ययं भूतात्मोपसंश्लिष्टत्वादिति ॥3॥

अन्यत्र भी कहा गया है कि कर्तृत्व तो इस भूतात्मा का ही है। भीतर स्थित शुद्ध आत्मा तो केवल प्रेरक ही है। वह इन्द्रियों के द्वारा सब कुछ करवाता है। जैसे अग्नि में तपाया गया लोहे का गोला लोहार द्वारा पीटे जाने पर अनेक आकारवाला बन जाता है, वैसे ही यह भूतात्मा भी अन्तःस्थ शुद्ध आत्मा की अग्नि से तपकर एवं गुणों के द्वारा पीटा जाता हुआ अनेक प्रकार का हो जाता है। अर्थात् तीन गुणों से युक्त ऐसी चौरासी लाख त्रिगुणात्मक योनियों में परिवर्तित हुआ करता है। यही तो अनेकता का स्वरूप है। जैसे चाक को चलानेवाला कुम्हार चाक से अलग ही होता है, वैसे ही तीन गुणों का प्रेरक आत्मा तीन गुणों से अलग ही है। जैसे लोहे के गोले के पीटे जाने से उसमें स्थित अग्नि नहीं पीटी जाती, वैसे ही शुद्ध आत्मा को किसी भी प्रकार का विकार नहीं होता। उसको तो केवल भूतात्मा के साथ सम्पर्क का दोष ही लगता है।

अथान्यत्राप्युक्तं शरीरमिदं मैथुनादेवोद्भूतं संविदपेतं निरय एवं मूत्र-
द्वारेण निष्क्रान्तमस्थिभिश्चितं मांसेनानुलिप्तं चर्मणाऽवबद्धं विण्मूत्र-
पित्तकफमज्जामेदोवसाभिरन्यैश्च मलैर्बहुभिः परिपूर्णं कोश इवावस-
न्नेति ॥4॥

और अन्यत्र कहा भी गया है कि स्त्री-पुरुष के संयोग से ही यह शरीर उत्पन्न होता है। वह चेतनविहीन होता है और मानो नरक ही होता है। मूत्र के द्वार में से वह निकला है और हड्डियों से व्यवस्थापित (आकारित) हुआ है, मांस से वह अवलिप्त हुआ और चमड़ी से मढ़ा गया है। मल, मूत्र, पित्त, कफ आदि से वह भरा-पूरा है। अन्य कई मलिनताओं से वह भरा हुआ है। ऐसा मालूम होता है कि मानो वह दूषित वस्तुओं का खजाना ही हो।

अथान्यत्राप्युक्तं सम्मोहो भयं विषादो निद्रा तन्द्री व्रणो जरा शोकः क्षुत्
पिपासा कार्पण्यं क्रोधो नास्तिक्यमज्ञानं मात्सर्यं वैकारुण्यं मूढत्वं
निर्व्रीडत्वं निकृतत्वमुद्धतत्वमसमत्वमिति तामसान्वितस्तृष्णा स्नेहो रागो
लोभो हिंसा रतिर्दृष्टिव्यावृतत्वमीर्ष्याकाममस्थिरत्वं चञ्चलत्वं जिहीर्षा-
र्थोपार्जनं मित्रानुग्रहणं परिग्रहावलम्बोऽनिष्टेष्विन्द्रियार्थेषु द्विष्टिरिष्टेष्व-
भिष्वङ्ग इति राजसान्वितैः परिपूर्ण एतैरभिभूत इत्ययं भूतात्मा
तस्मान्नानारूपाण्याप्नोतीत्याप्नोतीति ॥5॥

इति तृतीयः प्रपाठकः ॥

और भी अन्य स्थान पर कहा गया है कि मोह, भय, विषाद, निद्रा, तन्द्रा, बूढ़ापन, शोक, भूख, प्यास, दैन्य, क्रोध, नास्तिकता, अज्ञान, ईर्ष्या, विकार, मूढता, निर्लज्जता, उद्धतता, विषमता इत्यादि तमोगुण के विकारों से यह शरीर परिपूर्ण है। इसके उपरान्त तृष्णा, स्नेह, राग, लोभ, हिंसा, कामुकता, व्यापार, ईर्ष्या, स्वेच्छाचारिता, चंचलता, किसी भी वस्तु को हड़प लेने की इच्छा, धनोपार्जन की इच्छा, मित्रों का अनुग्रह, परिग्रह का आश्रय, इन्द्रियों का अप्रिय विषयों से द्वेष, और प्रिय विषयों में आसक्ति आदि रजोगुण से युक्त विकार भी इस भूतात्मा में विद्यमान रहते हैं। इन सभी विकारों के द्वारा यह भूतात्मा पराभव प्राप्त करता रहता है। और बारी-बारी से तरह-तरह के रूपों को धारण करता रहता है, धारण करता रहता है (अन्तिम शब्दसमूह की पुनरावृत्ति प्रपाठक की समाप्तिसूचक है)।

यहाँ तीसरा प्रपाठक पूरा होता है।

❋

चतुर्थः प्रपाठकः

ते ह खल्वथोर्ध्वरेतसो अतिविस्मिता अतिसमेत्योचुर्भगवन्नमस्ते त्वं नः
शाधि त्वमस्माकं गतिरन्या न विद्यत इत्यस्य कोऽतिथिर्भूतात्मनो येनेदं
हित्वात्मन्येव सायुज्यमुपैति। तान् होवाच ॥1॥

यह सुनकर वे ऊर्ध्वरेतस् (ब्रह्मचारी) वालखिल्य बहुत ही विस्मित हो गए और एकदम नजदीक जाकर बोले—'हे भगवन्! आपको हमारा नमस्कार है। आप ही हमारी शरण हैं, दूसरा हमारा कोई आश्रय नहीं है, तो आप हमें समझाइए कि उस भूतात्मा का अतिथि कौन-सा है, जिसकी वजह से वह इस सबको छोड़कर उस आत्मा में ही सायुज्य प्राप्त करता है'? तब ब्रह्मा उत्तर दिया कि—

अथान्यत्राप्युक्तं महानदीषूर्मय इव निवर्तकमस्य यत्पुराकृतं समुद्रवेलेव दुर्निवार्यमस्य मृत्योरागमनं सदसत्फलमयैर्हि पाशैः पशुरिव बद्धं बन्धनस्थस्येवास्वातन्त्र्यं यमविषयस्थस्येव बहुभयावस्थं मदिरोन्मत्त इवामोदमदिरोन्मत्तं पाप्मना गृहीत इव भ्राम्यमाणं महोरगदष्ट इव विपद्दष्टं महान्धकार इव रागान्धमिन्द्रजालमिव मायामयं स्वप्न इव मिथ्यादर्शनं कदलीगर्भ इवासारं नट इव क्षणवेशं चित्रभित्तिरिव मिथ्यामनोरम-मित्यथोक्तम् ।

शब्दस्पर्शादयो येऽर्था अनर्था इव ते स्थिताः ।
येष्वासक्तस्तु भूतात्मा न स्मरेच्च परं पदम् ॥2॥

और भी एक जगह पर कहा गया है कि बड़ी नदियों में जिस तरह तरंगें उछलती हैं इसी तरह इस भूतात्मा में पूर्वकृत कर्म होते हैं, और उनके फल तो उसे भोगने ही पड़ते हैं। जिस प्रकार उन ऊर्मियों के अन्त के लिए समुद्र का किनारा जरूरी होता है, उसी प्रकार भूतात्मा के लिए मृत्यु भी जरूरी ही होती है। उन शुभाशुभ कर्मों के फलस्वरूप बन्धनों में वह एक पशु की तरह ही जकड़ा हुआ है और एकदम परतन्त्र ही हो गया है; जैसे यम के राज्य में रहता हो, वैसे ही वह भूतात्मा सर्वदा भयभीत ही रहता है। विषयसुख रूपी मदिरा पींकर वह पागल बन जाता है और पाप के प्रेत का उसमें आवेश आ गया हो, ऐसे इधर-उधर भटकता ही रहता है। जैसे जहरीले साँप ने काटा हो इस तरह विपत्ति से दुःख भोगता है। विषयों की लालसा रूपी गाढ़ अन्धकार से वह अन्धा बन जाता है। ऐन्द्रजालिक के जादू की तरह वह माया से भरा हुआ है। स्वप्न की तरह मिथ्या दिखावेवाला है। केले के पेड़ के गर्भ की तरह वह सारहीन ही है। नट की तरह वह क्षण-क्षण में नए-नए वेश धारण करता है। चित्रवाली दीवार की तरह वह झूठे ही दिखावे से सुन्दर भासित होता है। और ऐसा भी कहा गया है कि शब्द, स्पर्श आदि विषय असार हैं और उनमें आसक्त हुए भूतात्मा को अपना वास्तविक स्वरूप स्मरण नहीं होता।

अयं वाव खल्वस्य प्रतिविधिर्भूतात्मनो यद्वेव विद्याधिगमस्य धर्मस्या-नुचरणं स्वाश्रमेष्वेवानुक्रमणं स्वधर्म एव सर्वं धत्ते स्तम्भशाखे-वेतराण्यनेनोर्ध्वभाग्भवत्यन्यथाऽधः पतत्येष स्वधर्मोऽभिभूतो यो वेदेषु न स्वधर्मातिक्रमेणाश्रमी भवत्याश्रमेष्वेवावस्थितस्तपस्वी चेत्युत्यत एतदप्युक्तं नातपस्कस्यात्मध्यानेऽधिगमः कर्मशुद्धिर्वेत्येवं ह्याह ।

तपसा प्राप्यते सत्त्वं सत्त्वात्संप्राप्यते मनः ।
मनसा प्राप्यते त्वात्मा ह्यात्मापत्त्या निवर्तते ॥3॥

उसकी मुक्ति का उपाय इस प्रकार है—ज्ञान की प्राप्ति करानेवाले धर्म का आचरण करना चाहिए और अपने आश्रमधर्मों का भी पालन करना चाहिए। क्योंकि स्वधर्माचरण ही सब कुछ कर सकता है। अन्य धर्म तो खम्भे की शाखाओं जैसे झूठे ही हैं। स्वधर्माचरण के द्वारा ही भूतात्मा मुक्ति को प्राप्त होता है। इससे अलग मार्ग पर जाने से तो वह नीचे ही गिरता है। वेदविहित स्वधर्म का त्याग करनेवाला मनुष्य 'आश्रमी' नहीं कहलाता। जो अपने आश्रमधर्मों का पालन करता है, वह तपस्वी है। और यह भी कहा गया है कि जो तपस्वी नहीं है, वह आत्मा में ध्यान नहीं लगा सकता। और उसकी

कर्मशुद्धि भी नहीं होती। तप के द्वारा ज्ञान प्राप्त होता है, ज्ञान होने पर मन वश में आता है, और आत्मा की प्राप्ति होती है। आत्मा की प्राप्ति होने पर संसार से मुक्ति होती है।

अत्रैते श्लोका भवन्ति—
यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति।
तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति ॥4-1॥

यहाँ ये श्लोक हैं—जैसे काष्ठ खत्म होने पर अग्नि आप-ही-आप अपने उत्पत्ति स्थान में बुझ जाती है, ठीक उसी प्रकार जब वृत्तियों का क्षय हो जाता है, तब चित्त आप-ही-आप अपने कारण (उत्पत्तिस्थान) में शान्त हो जाता है।

स्वयोनावुपशान्तस्य मनसः सत्यकामिनः।
इन्द्रियार्थाविमूढस्यानृताः कर्मवशानुगाः ॥4-2॥

अपने उत्पत्तिस्थान में (कारण में) शान्त बना हुआ और ज्ञानप्राप्त किया हुआ चित्त जब सत्य की ओर मोड़ लेता है, तब उसे वे कर्म के वश में रहनेवाले इन्द्रियविषय मिथ्या (तुच्छ झूठे) ही मालूम पड़ते हैं।

चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत्।
यच्चित्तस्तन्मयो भवति गुह्यमेतत्सनातनम् ॥4-3॥

चित्त ही तो संसार है। इसलिए प्रयत्नपूर्वक चित्तशुद्धि करनी चाहिए। जैसा मनुष्य का चित्त होता है, वैसा ही वह मनुष्य होता है। जैसा चित्त वैसी गति होती है। यह तो एक सनातन रहस्य है।

चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम्।
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमव्ययमश्नुते ॥4-4॥

चित्त के शान्त होने से शुभ-अशुभ कर्मों का नाश हो जाता है। और शान्त बना हुआ मनुष्य जब अपने आत्मा में लीन हो जाता है, तब उसे अक्षय आनन्द प्राप्त होता है।

समासक्तं यदा चित्तं जन्तोर्विषयगोचरे।
यद्येवं ब्रह्मणि स्यात्तत् को न मुच्येत बन्धनात् ॥4-5॥

प्राणि का चित्त जितना अधिक विषयों में आसक्त रहता है, उतना ही यदि ब्रह्म में आसक्त हो जाता, तो भला कौन प्राणी बन्धन से मुक्त नहीं होता? अर्थात् सभी मुक्त हो जाते।

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च।
अशुद्धं कामसङ्कल्पं शुद्धं कामविवर्जितम् ॥4-6॥

मन दो प्रकार का होता है—एक शुद्ध और दूसरा अशुद्ध। उनमें अशुद्ध मन कामनाओं और संकल्पों से भरा हुआ होता है, जबकि शुद्ध मन कामनाओं से रहित होता है।

लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम्।
यदा यात्यमनीभावं तदा तत्परमं पदम् ॥4-7॥

मन को लय और विक्षेप से रहित और ठीक तरह से स्थिर करके जब मनुष्य अमनीभाव को अर्थात् निर्विचारता को प्राप्त करता है, तब वह परमपद होता है।

तावदेव निरोद्धव्यं हृदि यावत् क्षयं गतम् ।
एतज्ज्ञानं च मोक्षं च शेषास्तु ग्रन्थविस्तराः ॥4-8॥

जब तक मन का पूर्णतः नाश न हो जाए, तब तक हृदय में मन का निरोध करते ही रहना चाहिए। बस इतना ही ज्ञान है, वही मोक्ष है। शेष तो सब ग्रन्थों के विस्तारमात्र ही है।

समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं लभेत् ।
न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यते ॥4-9॥

समाधि के द्वारा जिसका मल दूर हो गया है और आत्मा में प्रवेश कराए गए चित्त को जो सुख मिलता है उसे वाणी से वर्णन करना तो असम्भव ही है। वह तो केवल अन्तःकरण के द्वारा ही अनुभव किया जानेवाला है।

अपामपोऽग्निरग्नौ वा व्योम्नि व्योम न लक्षयेत् ।
एवमन्तर्गतं चित्तं पुरुषः प्रतिमुच्यते ॥4-10॥

जैसे पानी में पानी, अग्नि में अग्नि और आकाश में आकाश मिल जाने से उसे फिर अलग नहीं देखा जा सकता ठीक उसी तरह चित्त का लय हो जाने से मनुष्य मुक्त हो जाता है।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥4-11॥

मनुष्य के बन्धन और मोक्ष का कारण मन ही होता है। विषयों में आसक्त मन बन्धन का कारण होता है और विषयासक्तिरहित मन मुक्ति के लिए होता है।

अथ यथेयं कौत्सायनिस्तुतिः—
त्वं ब्रह्मा त्वं च वै विष्णुस्त्वं रुद्रस्त्वं प्रजापतिः ।
त्वमग्निर्वरुणो वायुस्त्वमिन्द्रस्त्वं निशाकरः ॥4-12॥

अब यहाँ मुनि कौत्सायनि द्वारा की हुई स्तुति कही जा रही है—तुम ब्रह्मा हो, तुम्हीं विष्णु हो, तुम्हीं रुद्र और तुम्हीं प्रजापति हो। तुम अग्नि हो, वरुण, वायु, इन्द्र और चन्द्र तुम्हीं हो।

त्वं मनुस्त्वं यमश्च त्वं पृथिवी त्वमथाच्युतः ।
स्वार्थे स्वाभाविकेऽर्थे च बहुधा तिष्ठसे दिवि ॥4-13॥

तुम मनु हो, तुम यम हो, तुम पृथ्वी हो, तुम अच्युत हो। तुम्हीं अपने विषयरूप स्वाभाविक अर्थ में हो तथा तुम्हीं अपने अर्थ में रहते हुए भी स्वर्ग में अनेक रूपों को धारण किए हुए हो।

विश्वेश्वर नमस्तुभ्यं विश्वात्मा विश्वकर्मकृत् ।
विश्वभुग्विश्वमायस्त्वं विश्वक्रीडारतः प्रभुः ॥4-14॥

हे सर्वेश्वर ! आपको नमस्कार। तुम सर्व के आत्मा हो, तुम सब कर्म करनेवाले हो। सबके भोक्ता तुम्हीं हो। विविध माया को धारण करनेवाले तुम ही हो। तुम विश्व की लीला में रत हो, तुम सब कुछ करने में समर्थ हो।

नमः शान्तात्मने तुभ्यं नमो गुह्यतमाय च ।
अचिन्त्यायाप्रमेयाय अनादिनिधनाय चेति ॥4-15॥

हे शान्तस्वरूप आपको नमस्कार है। अतिशय रहस्यमय, अचिन्तनीय, अप्रमेय अर्थात् प्रमाणों से अगम्य और आदि-अन्त रहित ऐसे आपको नमस्कार है।

तमो वा इदमेकमास। तत्पश्चात्तत्परेणेरितं विषयत्वं प्रयात्येतद्वै रजसो रूपं तद्रजः खल्वीरितं विषयत्वं प्रयात्येतद्वै तमसो रूपं तत्तमः खल्वीरितं तमसः सम्प्रास्त्रवत्येतद्वै सत्त्वस्य रूपं तत्सत्त्वमेवेरितं तत्सत्त्वात् सम्प्रास्त्रवत् सोंऽशोऽयं यश्चेतनमात्रः प्रतिपुरुषं क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानलिङ्गः प्रजापतिस्तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरित्यथ यो ह खलु वावास्य राजसोंशोऽसौ स योऽयं ब्रह्माऽथ यो ह खलु वावास्य तामसोंऽशोऽसौ स योऽयं रुद्रोऽथ यो ह खलु वावास्य सात्त्विकोंऽशोऽसौ स एव विष्णुः स वा एष एकस्त्रिधाभूतोऽष्टैकादशधा द्वादशधाऽपरिमितधा चोद्भूत उद्भूतत्वाद्भूतेषु चरति। प्रतिष्ठा सर्वभूतानामधिपतिर्बभूवेत्यसावात्माऽन्तर्बहिश्चान्तर्बहिश्च ॥5॥

इति चतुर्थः प्रपाठकः।
इति मैत्रायण्युपनिषत्समाप्ता।

स होवाच प्रजापतिः। अग्निर्वै देवा इदं सर्वं विश्वा भूतानि प्राणा वा इन्द्रियाणि पशवोऽन्नममृतं सम्राट् स्वराड् विराट् तत्साम्नः प्रथमं पादं जानीयात्। ऋग्यजुःसामाथर्वरूपः सूर्योऽन्तरादित्ये हिरणमयः पुरुषस्तत् साम्नो द्वितीयं पादं जानीयात्। य ओषधीनां प्रभुर्भवति ताराधिपतिः सोमस्तत्साम्नस्तृतीयं पादं जानीयात्। स ब्रह्मा स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् तत्साम्नश्चतुर्थं पादं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥8॥

वह प्रजापति बोले—अग्नि, सभी देव, यह जो कुछ है वह सब, सभी प्राणी, सभी प्राण, सभी इन्द्रियाँ, पशु, अन्न, अमृत, सम्राट्, स्वराट् है—उसे इस साम का प्रथम पाद जानना चाहिए। ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद, सूर्य, सूर्य के भीतर स्थित हिरणमय पुरुष—यह सब उस साम का द्वितीय पाद जानना चाहिए। जो औषधियों का स्वामी है ऐसा ताराओं का अधिपति सोम है उसे साम का तीसरा पाद जानना चाहिए और जो ब्रह्मा है, जो शिव है, जो हरि है, इन्द्र है वह अक्षर परम स्वराट् है, उसे साम का चौथा पाद जानना चाहिए। जो मनुष्य इस प्रकार से जानता है वह अमृतत्व को प्राप्त करता है।

उग्रं प्रथमस्याद्यं ज्वलं द्वितीयस्याद्यं नृसिं तृतीयस्याद्यं मृत्युं चतुर्थस्याद्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति। तस्मादिदं साम यत्र कुत्रचिन्नाचष्टे। यदि दातुमपेक्षते पुत्राय शुश्रूषवे दास्यत्यन्यस्मै शिष्याय वा चेति ॥9॥

इस मन्त्रराज के प्रथम चरण के आरम्भ का अंश (स्वर) 'उग्रम्' कहलाता है। दूसरे चरण का आद्य अंश (स्वर) 'ज्वलम्' कहलाता है। तृतीय चरण का आद्य अंश (स्वर) 'नृसिम्' कहलाता है, और चौथे चरण का आद्य अंश (स्वर) 'मृत्युम्' कहलाता है। ये चारों चरण (क्रमशः उग्रम्, ज्वलम्, नृसिम्, और मृत्युम्) साम के ही रूप हैं। इसलिए इसे जहाँ-तहाँ उच्चारित नहीं करना चाहिए। जो इस प्रकार जानता है, वह अमृतत्व को प्राप्त करता है। इस साम को यदि किसी को देना हो, तो सेवा करने वाले पुत्र को या शिष्य को ही देना चाहिए (अनधिकारियों को नहीं)।

क्षीरोदार्णवशायिनं नृकेसरिं योगिध्येयं परमं पदं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥10॥

क्षीरसागर में शयन करने वाले नरकेसरी का ही रूप है, योगियों के लिए वे ही ध्यान के विषय हैं। वह परम पद है, वही परम साम है, ऐसा जानना चाहिए। ऐसा जो जानता है, वह अमृतत्व को प्राप्त होता है।

वीरं प्रथमस्याद्यार्धान्त्यं तं स द्वितीयस्याद्यार्धान्त्यं हंभी तृतीयस्याद्यार्धान्त्य मृत्युं चतुर्थस्याद्यार्धान्त्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति। तस्मादिदं साम येन केनचिदाचार्यमुखेन यो जानीते स तेनैव शरीरेण संसारान्मुच्यते मोचयति मुमुक्षुर्भवति। जपात्तेनैव शरीरेण देवतादर्शनं करोति। तस्मादिदमेव मुख्यद्वारं कलौ नान्येषां भवति तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥11॥

इस मंत्रराज के प्रथम चरण के पूर्वार्ध के अन्त्य भाग को 'वीरम्' कहते हैं। इसके द्वितीय चरण के पूर्वार्ध के अन्त्य भाग को 'हंभी' कहते हैं। इसके तीसरे चरण के पूर्वार्ध के अन्त्य भाग को 'मृत्युम्' कहते हैं और चौथे चरण के पूर्वार्ध के अन्त्य भाग को 'साम' कहते हैं। इस साम रूप मन्त्र को इस तरह जानना चाहिए। इस तरह जो जानता है, वह अमृतत्व को प्राप्त करता है। इसलिए इस सामरूप मन्त्रराज को किसी एक आचार्य के मुख से सुनकर जो जानता है, वह उसी शरीर से संसार से मुक्त हो जाता है। और दूसरों को भी मुक्त कर देता है। वह मुमुक्षु हो जाता है। इसके जप से उसी शरीर से वह देवताओं के दर्शन कर सकता है। इसलिए कलियुग में यही मुक्ति का बड़ा द्वार है। अन्य लोगों के लिए और कोई द्वार नहीं है। इसलिए सभी अंगपूर्वक यही सामरूप मन्त्रराज जानना चाहिए। जो यह जानता है, वह अमृतत्व को प्राप्त कर लेता है।

ऋतं सत्यं परं ब्रह्म पुरुषं नरकेसरीविग्रहं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं शङ्करं नीललोहितम्। उमापतिः पशुपतिः पिनाकी ह्यमितद्युतिः। ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्यो वै यजुर्वेदवाच्यस्तं हि साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥12॥

साक्षात् ऋतस्वरूप, सत्यरूप परब्रह्म पुरुष नरसिंह ही हैं। उनका वर्ण कृष्ण और पिंगल (भूरा) है, वे ऊर्ध्वरेता हैं, विकराल आँखों वाले हैं फिर भी कल्याणकारी हैं। उमापति, पशुपति, पिनाकी, भी वही हैं। उनका तेज नापा नहीं जा सकता। सब विद्याओं के वे स्वामी हैं। सभी प्राणियों के वे अधिपति हैं। वे ब्रह्माजी के भी अधिपति हैं, ब्रह्म के भी अधिपति हैं वे नृसिंह यजुर्वेद के वाच्यार्थ हैं, उन्हीं को साम जानना चाहिए। जो ऐसा जानता है वह अमृतत्व को प्राप्त हो जाता है।

महा प्रथमान्तार्धस्याद्यं र्वतो द्वितीयान्तार्धस्याद्यं षणं तृतीयान्तार्धस्याद्यं नमा चतुर्थान्तार्धस्याद्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति। तस्मादिदं साम सच्चिदानन्दमयं परं ब्रह्म तमेवं विद्वानमृत इह भवति। तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥13॥

इस अनुष्टुभ् मन्त्रराज के प्रथम चरण के उत्तरार्ध का आदि भाग 'महा' कहलाता है। इसके द्वितीय चरण के उत्तरार्ध के आदि भाग को 'र्वतो' कहते हैं। और इसके तृतीय चरण के उत्तरार्ध का आदि भाग 'षणम्' कहा जाता है और चतुर्थ चरण के उत्तरार्ध के प्रथम भाग को 'नमा' कहते हैं। इस प्रकार साम को जानना चाहिए। जो इस प्रकार साम को जानता है, वह अमृतत्व को प्राप्त करता है। इसीलिए यह साम सच्चिदानन्दमय परब्रह्म ही है। इसे इस प्रकार जानने वाला यहाँ अमृतत्व को प्राप्त होता है। उसे ऐसा ही जानना चाहिए। जो इसे ऐसा जानता है, वह अमृतत्व को प्राप्त होता है।

विश्वसृज एतेन वै विश्वमिदमसृजन्त। यद् विश्वमसृजन्त तस्माद् विश्वसृजो विश्वमेनाननु प्रजायते। ब्रह्मणः सलोकतां सार्ष्टितां सायुज्यं यान्ति। तस्मादिदं साङ्गं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥14॥

इसी मन्त्रराज से विश्व का सर्जन करने वाले प्रजापतियों ने सृष्टि का निर्माण किया है। इसीलिए तो उन्हें 'विश्वसृष्टा' कहा जाता है। यह सारा विश्व उनके पीछे ही उत्पन्न हुआ है। इसे जानने वाले ब्रह्मा के लोक में ब्रह्मा के साथ सायुज्य प्राप्त करते हैं। ऐसे ही उसे जानना चाहिए। यह जानने वाला अमृतत्व को प्राप्त करता है।

विष्णुं प्रथमान्त्यं मुखं द्वितीयान्त्यं भद्रं तृतीयान्त्यं म्यहं चतुर्थान्त्यं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति। योऽसौ वेद यदिदं किञ्चात्मनि ब्रह्मण्येवानुष्टुभं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति। स्त्रीपुंसयोर्वा। य इहैव स्थातुमपेक्षते तस्मै सर्वैश्वर्यं ददाति। यत्र कुत्रापि म्रियते देहान्ते देवाः परमं ब्रह्म तारकं व्याचष्टे येनासावमृतीभूत्वा सोऽमृतत्वं च गच्छति ॥15॥

इस मन्त्रराज के प्रथम चरण के अन्तिम पद को 'विष्णुम्' कहते हैं, द्वितीय चरण के अन्तिम पद को 'मुखम्' कहा जाता है, तृतीय चरण के अन्तिम पद को 'भद्रम्' कहा जाता है और चतुर्थ चरण के अन्तिम पद को 'म्यहम्' कहते हैं। इस प्रकार इस साम को जानना चाहिए। ऐसा जो जानता है, वह अमृतत्व को प्राप्त होता है। जो यह प्रजापति है वही यह जानता है। जो यहाँ सब कुछ है, सब की आत्मा रूप ब्रह्म में यह अनुष्टुभ् रहा है – अनुस्यूत है, ऐसा जानना चाहिए। और ऐसा जो जानता है वह अमृतत्व को प्राप्त कर लेता है। चाहे वह स्त्री हो या पुरुष हो। इन मन्त्रज्ञों में जो यहाँ रहने की

इच्छा करते हों, उन्हें भगवान् नृसिंह सब ऐश्वर्य देते हैं। और वह जहाँ कहीं भी मरता है, भगवान् नृसिंह उसे वहाँ पर ही परब्रह्मरूप तारक मन्त्र का बोध कराते हैं, जिससे वह अमृतरूप होकर अमृतत्व को प्राप्त करता है।

तस्मादिदं साममध्यगं जपति तस्मादिदं सामाङ्गं प्रजापतिस्तस्मादिदं सामाङ्गं प्रजापतिर्य एवं वेदेति महोपनिषत्। य एतां महोपनिषदं वेद स कृतपुरश्चरणो महाविष्णुर्भवति महाविष्णुर्भवति ॥16॥

इति प्रथमोपनिषत्।

इसलिए सामों में अवस्थित इस तारकमन्त्र का जप मनुष्य करता है। साम का अंगरूप यह मन्त्रराज स्वयं प्रजापति का ही स्वरूप है। इसलिए यह साम का अंग प्रजापति का ही रूप है, ऐसा जानने वाला मनुष्य महोपनिषत् को जान लेता है। परमतत्त्व को यथार्थ बताने वाली इस महोपनिषत् को जानने वाला साधक पुरश्चरण किया हुआ ही माना जाता है। वह महाविष्णुरूप ही हो जाता है। वाक्य की पुनरुक्ति प्रथमोपनिषत् की समाप्ति को सूचित करती है।

यहाँ प्रथम उपनिषत् पूर्ण होती है।

द्वितीयोपनिषत्

देवा ह वै मृत्योः पाप्मभ्यः संसाराच्च बिभीयुस्ते प्रजापतिमुपाधावंस्तेभ्य एवं मन्त्रराजं नारसिंहमानुष्टुभं प्रायच्छत्तेन वै ते मृत्युमजयन्। पाप्मानं चातरन्संसारं चातरंस्तस्माद्यो मृत्योः पाप्मभ्यः संसाराच्च बिभीयात्स एतं मन्त्रराजं नारसिंहमानुष्टुभं प्रतिगृह्णीयात्स मृत्युं जयति पाप्मानं जयति संसारं तरति ॥1॥

पहले के काल में देवलोग मृत्यु से, पापों से और संसार से भयभीत हुए और दौड़कर प्रजापति के पास पहुँच गए। प्रजापति ने उन्हें यह नारसिंह मन्त्रराज, जो अनुष्टुभ् में निबद्ध था, दिया। उसी से वे मृत्यु को जीत गए और पाप को एवं संसार को पार कर गए। इसलिए जो कोई मनुष्य मृत्यु से, पाप से और संसार से डर जाए उसे इस अनुष्टुभ् में बँधा हुआ नारसिंह मन्त्रराज ग्रहण करना चाहिए। जिससे वह मृत्यु को जीत सकता है, पाप को जीत सकता है और संसार को पार कर सकता है।

तस्य ह वै प्रणवस्य या पूर्वा मात्रा पृथिव्यकारः स ऋग्भिर्ऋग्वेदो ब्रह्मा वसवो गायत्री गार्हपत्यः स साम्नः प्रथमः पादो भवति। द्वितीयाऽन्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदो विष्णुः रुद्रास्त्रिष्टुब्दक्षिणाग्निः स साम्नो द्वितीयः पादो भवति। तृतीया द्यौः स मकारः स सामभिः सामवेदो रुद्रा आदित्या जगत्याहवनीयः स साम्नस्तृतीयः पादो भवति। याऽवसाने-ऽस्य चतुर्थ्यर्धमात्रा सा सोमलोक ओङ्कारः सोऽथर्वणैर्मन्त्रैरथर्ववेदः संवर्तकोऽग्निर्मरुतो विराडेकर्षिर्भास्वती स्मृता सा साम्नश्चतुर्थो पादो भवति ॥2॥

इस मन्त्रराज का अंगभूत जो प्रणव (ओंकार) है उसकी पहली मात्रा 'अ'कार है। इसका लोक पृथ्वी है, वह (अकार) ऋचाओं में रक्षित ऋग्वेद वाला है – इसका वेद ऋग्वेद है, इसका देव ब्रह्मा है, इसका देवगण आठ वसु और गायत्री है, इसका अग्नि गार्हपत्य है, यह साममन्त्र का प्रथम चरण बनता है। प्रणव की दूसरी मात्रा 'उ'कार है। इसका लोक अन्तरिक्ष है, यजुषों से रक्षित यजुर्वेद उसका वेद है, उसका देव विष्णु है, उसका देवगण ग्यारह रुद्र हैं, उसका छन्द त्रिष्टुभ् है, उसका अग्नि दक्षिणाग्नि है। इस तरह वह साम का द्वितीय चरण बनता है। प्रणव की तीसरी मात्रा 'म'कार है। इसका लोक द्यौः है, इसका वेद साममन्त्रों से पोषित सामवेद है, उसका देव रुद्र है, उसका देवगण बारह आदित्य हैं, उसका छन्द जगती है, उसका अग्नि आहवनीय है, इस तरह यह साममन्त्र का तीसरा चरण बनता है। और इसके अन्त में जो चौथी आधी मात्रा है, वह सोमलोक वाला ओंकार है। वह अथर्वणमन्त्रों से पोषित अथर्ववेद वाला है (अर्थात् उसका लोक सोमलोक, उसका वेद अथर्ववेद है), उसका अग्नि संवर्तक है, उनचास मरुत् उसके देव हैं, विराट् उसका छन्द है। इसके एक ही ऋषि हैं (ब्रह्मा)। वह स्वप्रकाशित मात्रा ही इस मन्त्रराज का चौथा पाद होता है।

अष्टाक्षरः प्रथमः पादो भवत्यष्टाक्षरास्त्रयः पादा भवन्त्येवं द्वात्रिंशद-क्षराणि सम्पद्यन्ते। द्वात्रिंशदक्षरा वा अनुष्टुब्भवत्यनुष्टुभा सर्वमिदं सृष्ट-मनुष्टुभा सर्वमुपसंहृतम् ॥3॥

अनुष्टुभ् छन्द के प्रथम चरण में आठ अक्षर होते हैं, ऐसे ही आठ-आठ अक्षरों वाले अन्य तीन पाद भी होते हैं। इस प्रकार कुल मिलाकर बत्तीस अक्षर होते हैं। अनुष्टुभ् छन्द बत्तीस अक्षरों वाला होता है। इस अनुष्टुभ् के द्वारा ही यह सब निर्मित होता है और अनुष्टुभ् द्वारा ही सभी का उपसंहार भी होता है।

तस्य हैतस्य पञ्चाङ्गानि भवन्ति चत्वारः पादाश्चत्वार्यङ्गानि भवन्ति। सप्रणवं सर्वं पञ्चमं भवति। हृदयाय नमः शिरसे स्वाहा शिखायै वषट् कवचाय हुं अस्त्राय फडिति प्रथमं प्रथमेन संयुज्यते द्वितीयं द्वितीयेन तृतीयं तृतीयेन चतुर्थं चतुर्थेन पञ्चमं पञ्चमेन व्यतिषजति व्यतिषिक्ता वा इमे लोकास्तस्माद् व्यतिषिक्तान्यङ्गानि भवन्ति ॥4॥

इस मन्त्र के पाँच अंग होते हैं। चार बताए गए पाद ही इसके चार अंग हैं और पाँचवाँ अंग प्रणव होता है, प्रणव से ही मन्त्र पूरा होता है, अतः वह पाँचवाँ अंग होता है। मन्त्र के इन पाँच अंगों से शरीर के पाँच अंगों का संयोजन करना चाहिए। शरीर के पाँच अंग ये हैं—हृदय, सिर, शिखा, बाहुमूल और ललाट। अतः क्रमशः "हृदयाय नमः, शिरसे स्वाहा, शिखायै वषट्, कवचाय हुम् और अस्त्राय फट्"—इनके साथ अनुष्टुप् के अंगों का संयोग करना चाहिए। प्रथम से प्रथम, द्वितीय से द्वितीय, तृतीय से तृतीय, चौथे से चौथे और पाँचवें से पाँचवें का संयोग बिठाना चाहिए। सभी लोक जिस प्रकार परस्परावलम्बी हैं, इसी प्रकार ये भी परस्पर सम्बद्ध हैं।

ओमित्येतदक्षरमिदं सर्वं तस्मात्प्रत्यक्षरमुभयत ओङ्कारो भवति। अक्षराणां न्यासमुपदिशन्ति ब्रह्मवादिनः ॥5॥

यह जो कुछ भी है, वह ओंकार रूप यह अक्षर ही है। इसलिए अनुष्टुप् के हर एक अक्षर से

पहले और बाद में ओंकार का उच्चारण करके सम्पुट बनाना चाहिए। ब्रह्म को जानने वाले इन अक्षरों का शरीर के अंगों में न्यास करने का उपदेश देते हैं।

तस्य ह वा उग्रं प्रथमं स्थानं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति। घोरं द्वितीयं स्थानं महाविष्णुं तृतीयं स्थानं ज्वलन्तं चतुर्थं स्थानं सर्वतोमुखं पञ्चमं स्थानं नृसिंहं षष्ठं स्थानं भीषणं सप्तमं स्थानं भद्रमष्टमं स्थानं मृत्युमृत्युं नवमं स्थानं नमामि दशमं स्थानमहमेकादशं स्थानं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥6॥

इस मन्त्र का जो प्रथम 'उग्र' पद है, वह पहला स्थान है, ऐसा जानना चाहिए! ऐसा जो जानता है वह अमृतत्व को प्राप्त होता है। 'घोरम्' द्वितीय स्थान है, 'महाविष्णुम्' तृतीय स्थान है, 'ज्वलन्तम्' चौथा स्थान है, 'सर्वतोमुखम्' पाँचवाँ स्थान है, 'नृसिहम्' छठा स्थान है, 'भीषणम्' सातवाँ स्थान है, 'भद्रम्' आठवाँ स्थान है, 'मृत्युमृत्युम्' नवाँ स्थान है, 'नमामि' दसवाँ स्थान है, 'अहम्' ग्यारहवाँ स्थान है—ऐसा जानना चाहिए। ऐसा जो जानता है, वह अमृतत्व को प्राप्त करता है। (पूरा मन्त्र इस तरह बनेगा—'ॐ उग्रं घोरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्। नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्')।

एकादशपदा वा अनुष्टुब्भवत्यनुष्टुभा सर्वमिदं सृष्टमनुष्टुभा सर्वमिदमुपसंहृतं तस्मात्सर्वमानुष्टुभं जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥7॥

अथवा यह एकादश पदों वाली अनुष्टुप् होती है। ऐसी इस अनुष्टुप् से ही यह सबकुछ उत्पन्न हुआ है और सब कुछ उपसंहृत भी होता है। इसलिए यह सब कुछ अनुष्टुभ्मय ही (आनुष्टुभ् ही) है, ऐसा जानना चाहिए। और जो ऐसा जानता है, वह अमृतत्व को प्राप्त कर लेता है।

देवा ह वै प्रजापतिमब्रुवन्नथ कस्मादुच्यत उग्रमिति। स होवाच प्रजापतिर्यस्मात्स्वमहिम्ना सर्वाँल्लोकान्सर्वान्देवान्सर्वानात्मनः सर्वाणि भूतान्युद्गृह्णात्यजस्रं सृजति विसृजति वासयत्युद्ग्राह्यत उद्गृह्यते। स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम्। मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्निवपन्तु सेनाः ॥ तस्मादुच्यत उग्र इति ॥8॥

देवों ने प्रजापति (ब्रह्मा) से पूछा—'उन्हें 'उग्र' क्यों कहा जाता है?' तब वह (प्रजापति बोले)—इसीलिए कि वह (नृसिंह भगवान्) अपनी महिमा से सभी लोकों को, सभी देवों को, सभी आत्माओं को और सभी भूतों को (प्राणियों को) उठाकर अर्थात् ग्रहण कर निरन्तर उनका सर्जन किया करते हैं, विसर्जन भी किया करते हैं, पूरी सृष्टि को अपने में निविष्ट करा लेते हैं – लीन कर देते हैं, वही संसार का अनुग्रह करते और करवाते हैं। इसीलिए उन्हें उग्र कहा गया है। ऋग्वेद में कहा गया है कि श्रुतियाँ जिनकी प्रार्थना करती हैं उन्हीं परमात्मा की स्तुति करो। वह परमात्मा सिंह का रूप धारण किए हुए होने पर भी भयंकर नहीं हैं। वह साधकों के सम्मुख जाकर अनुग्रह करने वाले हैं और वह 'उग्र' है (क्योंकि दुष्टों का वे संहार करते हैं)। हे नृसिंह! हम आपकी स्तुति करते हैं, आप हमारा कल्याण करें। आपकी सेना हम पर आक्रमण न करके अन्यत्र ही चली जाए। इसीलिए उसे 'उग्र' कहा जाता है। अथवा सर्वत्र जरणशील कालात्मा ऐसे आपको मैं नमस्कार करता हूँ।

अथ कस्मादुच्यते वीरमिति। यस्मात्स्वमहिम्ना सर्वाँल्लोकान्सर्वान्देवान्सर्वानात्मनः सर्वाणि भूतानि विरमति विरामयत्यजस्रं सृजति

विसृजयति वासयति। यतो वीरः कर्मण्यो सुदक्षो युक्तग्रावा जायते देवकामस्तस्मादुच्यते वीरमिति ॥9॥

देवों ने फिर पूछा—'हे भगवन् ! उन्हें 'वीरम्' क्यों कहा गया है ?' प्रजापति ने इसका उत्तर दिया कि—वह नृसिंह भगवान् सभी लोकों को, सभी देवों को, सभी आत्माओं को, सब प्राणियों को अपनी महिमा से क्रीडा करवाते भी हैं और उनसे क्रीडा करते भी हैं। वे ऐसा निरन्तर किया ही करते हैं। वे उन्हें बनाते हैं, उनका उपसंहार (नाश) भी करते हैं और उन्हें निवासस्थान भी देते हैं। ऋग्वेद में भी कहा गया है कि, चूँकि वे कर्मठ हैं, वह दक्ष हैं, वह देवों को उत्पन्न करने की कामना करने वाले हैं, सोमयाग में पाषाणयुक्त होकर वे अध्वर्यु आदि के रूप में सोम निकालने में सुदक्ष हैं, इसलिए वे 'वीर' कहलाते हैं।

अथ कस्मादुच्यते महाविष्णुमिति। यस्मात्स्वमहिम्ना सर्वांल्लोकान्सर्वान्देवान्सर्वानात्मनः सर्वाणि भूतानि व्याप्नोति व्यापयति स्नेहो यथा पललपिण्डं शान्तमूलमोतं प्रोतमनुव्याप्तं व्यतिषिक्तो व्याप्यते व्यापयति। यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा। प्रजापतिः प्रजया संविदानः त्रीणि ज्योतींषि सचते स षोडशीं तस्मादुच्यते महाविष्णुमिति ॥10॥

देवों ने आगे पूछा—तब 'महाविष्णुम्' ऐसा विशेषण उन्हें क्यों दिया गया है ? ब्रह्माजी ने उत्तर दिया—इसलिए कि वे अपनी महिमा से सभी लोकों को, सभी देवों को, सभी आत्माओं को, सभी प्राणियों को व्याप्त करके स्थित हैं, और अपने ज्ञान से उपासकों में व्यापकता लाते हैं। जिस प्रकार मांसपिण्ड में चिकनाहट व्याप्त होकर रहती है, वैसे ही वे सावयव शरीर में सर्वत्र व्याप्त रहते हैं। यह जगत् उन्हीं से ओत-प्रोत होने से प्रलयकाल में उन्हीं में लीन भी हो जाता है। ऋचा कहती है कि इससे भिन्न चारों भुवनों को व्याप्त करके रहने वाला कोई भी उत्पन्न नहीं हुआ। वे ही प्रजाओं के स्वामी हैं, वे ही प्रजाओं के द्वारा पूजित होते हैं। वह नृसिंह तीनों प्रकार की ज्योतियों में सोलह कलाओं से युक्त होकर छाए रहते है (व्याप्त रहते हैं), इसीलिए उन्हें 'महाविष्णुम्' ऐसा विशेषण दिया गया है।

अथ कस्मादुच्यते ज्वलन्तमिति। यस्मात्स्वमहिम्ना सर्वांल्लोकान्सर्वान्देवान् सर्वानात्मनः सर्वाणि भूतानि स्वतेजसा ज्वलति ज्वलयति ज्वाल्यते ज्वालयते। सविता प्रसविता दीप्तो दीपयन्दीप्यमानः ज्वलञ्ज्वलिता तपन्वितपन्सम्पतन्रोचनो रोचमानः शोभनः शोभमानः कल्याणस्तस्मादुच्यते ज्वलन्तमिति ॥11॥

तब देवों ने आगे पूछा—'तो उन्हें 'ज्वलन्तम्' यह विशेषण क्यों दिया गया है ?' तब प्रजापति ब्रह्मा ने कहा कि—वे अपनी महिमा से सभी लोकों को, सभी देवों को, सभी आत्माओं को सभी प्राणियों को अपने तेज के द्वारा स्वयं जलते हैं, जलाते हैं, ज्वलित किए जाते हैं, ज्वलित कराए जाते हैं, अर्थात् वह स्वयंप्रकाश हैं, अन्यप्रकाशक हैं, उनसे प्रकाशित हुआ जाता है, इनके द्वारा अन्य प्रकाशित किए और कराए जाते हैं। ऋचा कहती है कि वे ही सविता के रूप में प्रकाश फैलानेवाले और उत्पन्न करनेवाले हैं। वे स्वयं तपते हैं और दूसरों को तपाते हैं, स्वयं तेजोयुक्त होकर अन्यों को तेजोयुक्त बनाते हैं। स्वयं परमकल्याणकारक हैं, स्वयं शोभमान हैं, और अन्यों से कल्याण करवाते हैं और अन्यों को शोभित करते हैं, इसीलिए ये 'ज्वलन्तम्' हैं।

अथ कस्मादुच्यते सर्वतोमुखमिति। यस्मात्स्वमहिम्ना सर्वांल्लोकान्स-र्वान्देवान्सर्वानात्मनः सर्वाणि भूतानि स्वयमनिन्द्रियोऽपि सर्वतः पश्यति सर्वतः शृणोति सर्वतो गच्छति सर्वत्र आदत्ते सर्वगः सर्वगतस्तिष्ठति। एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः। यमप्येति भुवनं सांपराये नमामि तमहं सर्वतोमुखमिति॥ तस्मादुच्यते सर्वतोमुख-मिति ॥12॥

देवों ने फिर आगे पूछा—'उन्हें 'सर्वतोमुखम्' विशेषण क्यों दिया गया है ?' तब प्रजापति ने कहा—वे अपनी महिमा से सभी लोकों को, सभी देवों को, सभी आत्माओं को और सभी प्राणियों को, स्वयं इन्द्रियरहित होते हुए भी चारों ओर देखते हैं, चारों ओर से सुन सकते हैं, चारों ओर जा सकते हैं, चारों ओर से सब कुछ ले सकते हैं, वे सभी जगह रहने वाले हैं और समानरूप से रहने वाले हैं। ऋचा कहती है कि वे ही एकमात्र इस जगत् के पहले विद्यमान थे। भुवनों के रक्षक उस एक तत्त्व से ही यह जगत् उत्पन्न हुआ है। और प्रलयकाल में इन्हीं में यह सब कुछ विलीन हो जाता है। उस 'सर्वतोमुख' को मैं प्रणाम करता हूँ। इसीलिए इसे 'सर्वतोमुखम्' कहा गया है।

अथ कस्मादुच्यते नृसिंहमिति। यस्मात्सर्वेषां भूतानां ना वीर्यतमः श्रेष्ठतमश्च सिंहो वीर्यतमः श्रेष्ठतमश्च। तस्मान्नृसिंह आसीत्परमेश्वरो जगद्धितं वा एतद्रूपं यदक्षरं भवति। प्रतद्विष्णुः स्तवते वीर्याय मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा। तस्मादुच्यते नृसिंहमिति ॥13॥

देवों ने आगे पूछा—'तो उन्हें 'नृसिंहम्' विशेषण क्यों दिया गया ?' प्रजापति ब्रह्मा ने उत्तर दिया कि—सभी जीवों में मनुष्य ही (नर ही) वीर्यतम – सबसे ज्यादा बलशाली और उत्तम भी है और सभी प्राणियों में सिंह ही सबसे ज्यादा शक्तिशाली और श्रेष्ठ माना जाता है। इसलिए भगवान् ने नरसिंह का रूप धारण किया था। अथवा यह रूप जगत् के हित के लिए ही है। यह स्वरूप अक्षर (अविनाशी) है। ऋचा कहती है—'ये भगवान् विष्णु सिंह का स्वरूप धारण करके भक्तों के द्वारा स्तवनीय बनते हैं। भक्तजन शक्ति प्राप्त करने के लिए इस स्वरूप की स्तुति करते हैं। भक्तों के लिए सिंह का रूप धारण करते हुए भी वे भयंकर नहीं होते। ये भगवान् पृथ्वी पर यथेच्छ भ्रमण करते हैं, पर्वतों के ऊपर भी रहते हैं। उनके तीन विशाल कदमों में तीनों लोक समा जाते हैं, इसलिए 'नृसिंहम्' कहा गया है।

अथ कस्मादुच्यते भीषणमिति। यस्माद् भीषणं यस्य रूपं दृष्ट्वा सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि भीत्या पलायन्ते स्वयं यतः कुतश्च न बिभेति। भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः। तस्मादुच्यते भीषणमिति ॥14॥

देवों ने फिर पूछा—'तब उन्हें 'भीषणम्' विशेषण क्यों दिया गया है ?' ब्रह्माजी ने उत्तर दिया कि—इनके भयंकर रूप को देखकर सभी लोक, सभी देव और सभी प्राणी भय से भागने लगते हैं, पर वह स्वयं किसी से और कहीं से भयभीत नहीं होते। श्रुति कहती है कि इसके भय से ही वायु प्रवहनशील होता है, इन्हीं के भय से सूर्य उदित होता है। अग्नि और इन्द्र भी इन्हीं के भय से अपने-अपने काम जल्दी से (दौड़कर) करते हैं और पाँचवाँ मृत्यु भी इन्हीं के डर से दौड़ता रहता है। इसलिए 'भीषणम्' कहा गया है।

अथ कस्मादुच्यते भद्रमिति। यस्मात्स्वयं भद्रो भूत्वा सर्वदा भद्रं ददाति। रोचनो रोचमानः शोभनो शोभमानः कल्याणः। भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः। तस्मादुच्यते भद्रमिति ॥15॥

देवों ने पूछा—'तब उन्हें 'भद्रम्' क्यों कहा गया है ?' प्रजापति बोले कि—वह स्वयं भद्र (मंगल) रूप होकर दूसरों का मंगल करनेवाले हैं। वे स्वयं कान्तिमान हैं और दूसरों को कान्तिमान बनाने वाले भी हैं। स्वयं शोभन है और अन्यों को शोभायमान करनेवाले भी हैं। श्रुतिवचन है कि—'हम अपने कानों से सभी शुभ शब्दों को सुनें। हे देवो ! यज्ञ करनेवाले हम अपनी आँखों से शुभ वस्तुओं को देखें और अपने स्वस्थ शरीरों के द्वारा दैव द्वारा दी हुई आयु भोगें।' इसीलिए उन्हें 'भद्रम्' कहा गया है।

अथ कस्मादुच्यते मृत्युमृत्युमिति। यस्मात्स्वमहिम्ना स्वभक्तानां स्मृत एव मृत्युमपमृत्युं च मारयति। य आत्मदा बलदा यस्य विश्वं उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यो मृत्युमुत्युः कस्मै देवाय हविषा विधेम। तस्मादुच्यते मृत्युमृत्युमिति ॥16॥

देवों ने आगे पूछा—'उन्हें 'मृत्युमृत्युम्' ऐसा क्यों कहा गया है ?' ब्रह्माजी ने उत्तर दिया कि—अपनी महिमा से, वे अपने भक्तों के स्मरण करते ही उनकी मृत्यु वा अपमृत्यु को मार डालते हैं। श्रुति कहती है कि जो भक्तों को अपना दान (अपना स्वरूपदान) देते हैं और अपने से विमुखों को अपने सम्मुख लाने का बल देते है (अथवा जो भक्तों को आध्यात्मिक और भौतिक – दोनों शक्तियाँ देते हैं) जिनके आशीष के लिए सभी देव जिनकी उपासना करते हैं, उस मृत्यु के मृत्युरूप नृसिंह की छाया ही अमृत है, अर्थात् नृसिंह के साथ अमृत है (मोक्ष का अविनाभाव सम्बन्ध है)। ऐसे परमात्मा के प्रति हम आहुतियों से होम करते हैं। इस आधार पर उसे 'मृत्युमृत्युम्' कहा गया है।

अथ कस्मादुच्यते नमामीति। यस्माद्यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्म-वादिनश्च। प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्। यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे। तस्मादुच्यते नमामीति ॥17॥

देवों ने पूछा—'तो 'नमामि' ऐसा क्यों कहा गया है ?' ब्रह्माजी ने उत्तर दिया—इसलिए कि इन्हें सभी देवलोग, ब्रह्मवादी और मुमुक्षु नमस्कार करते हैं। वेद का वचन है कि—वेदों के पालयिता ब्रह्माजी अवश्य ही उनकी स्तुति का उक्थ्यमन्त्र बोलते हैं कि जिसमें इन्द्र, वरुण, मित्र, अर्यमा और अन्य सभी देव अपना निवास करते हैं। (भावार्थ यह है कि ब्रह्माजी ऐसा स्तुतिमन्त्र बोलते हैं कि जिसमें इन्द्रादि देवों की स्तुतियों का स्वयं ही समावेश हो जाता है)। इसीलिए 'नमामि' ऐसा उनके लिए कहा गया है।

अथ कस्मादुच्यतेऽहममिति। अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाभिः। यो मा ददाति स इ देवभावाः। अहमन्नमन्नम-दन्तमद्मि। अहं विश्वं भुवनमभ्यभवां सुवर्णज्योतीः। य एवं वेदेति महोपनिषत् ॥18॥

इति द्वितीयोपनिषत्।

देवलोग पूछते हैं—'उन्हें 'अहम्' क्यों कहा गया है ?' ब्रह्माजी कहते हैं कि—वेद कहता है कि मैं इस सृष्टिरूपी शाश्वत यज्ञ से पहले उत्पन्न हुआ था। मैं अमृत का उत्पत्तिस्थान हूँ। मैं ही तो अन्न हूँ। मैं सभी ज्योतियों और शक्तियों को देने वाला हूँ। जो सत्पात्रों को दान करते हैं उससे सबका कल्याण होता है। पर जो स्वयं अकेले ही अन्न खाते हैं, उन्हें मैं खा जाता हूँ।' इस ज्ञान को जानने वाले ही सच्चे साधक हैं। यह महोपनिषत् है।

यहाँ दूसरी उपनिषत् पूरी हुई।

❋

तृतीयोपनिषत्

देवा ह वै प्रजापतिमब्रुवन्नानुष्टुभस्य मन्त्रराजस्य नारसिंहस्य शक्तिं बीजं नो ब्रूहि भगव इति ॥1॥

देवलोग प्रजापति ब्रह्माजी के पास गए और पूछने लगे कि—'हे भगवन्! इस अनुष्टुभ् छन्दवाले नृसिंह भगवान् के मन्त्रराज की शक्ति और उसके बीज के बारे में हमें बताइए'।

स होवाच प्रजापतिर्माया वा एषा नारसिंही सर्वमिदं सृजति सर्वमिदं रक्षति सर्वमिदं संहरति। तस्मान्मायामेतां शक्तिं विद्याद्य एतां मायां शक्तिं वेद स पाप्मानं तरति स मृत्युं तरति स संसारं तरति सोऽमृतत्वं च गच्छति महतीं श्रियमश्नुते ॥2॥

तब प्रजापति ने उन देवों से कहा कि यह जो नरसिह की माया है, वह सभी कुछ उत्पन्न करती है, सभी का रक्षण करती है और सभी का संहार करती है। इसलिए इस माया को उनकी शक्ति समझना चाहिए। इस माया को जो जानता है, वह पाप से मुक्त हो जाता है, मृत्यु को पार कर लेता है, वह इस संसार को तैर जाता है और अमृतत्व को प्राप्त करता है एवं सभी प्रकार की समृद्धि का उपभोग करता है।

मीमांसन्ते ब्रह्मवादिनो ह्रस्वा दीर्घा प्लुता चेति। यदि ह्रस्वा भवति सर्वं पाप्मानं दहत्यमृतत्वं च गच्छति यदि दीर्घा भवति महतीं श्रियमाप्नोत्यमृतत्वं च गच्छति यदि प्लुता भवति ज्ञानवान्भवत्यमृतत्वं च गच्छति ॥3॥

ब्रह्मवादी लोग विचार-विमर्श करते हैं कि यह नारसिंही माया ह्रस्व है या दीर्घ है या प्लुत है ? यदि ह्रस्व है तो वह पाप को जला देती है और इससे साधक को अमृतत्व की उपलब्धि होती है। यदि दीर्घ है तो साधक महान् ऐश्वर्य को भोगता है और अमृतत्व को प्राप्त करता है। अगर प्लुत है तो साधक ज्ञानवान् हो जाता है और अमृतत्व को प्राप्त करता है।

तदेतदृषिणोक्तं निदर्शनम्—स ई पाहि य ऋजीषी तरुत्रः श्रियं लक्ष्मीमौपलामम्बिकां गां षष्ठीं च यामिन्द्रसेनेत्युदाहुः। तां विद्यां ब्रह्मयोनिं सरूपामिहायुषे शरणं प्रपद्ये ॥4॥

इस विषय में ऋषि कहते हैं—'तुम नृसिंह स्वयं मायारहित होकर भी भक्तजनों का रक्षण करते हो। मैं तुम्हारी उस ईश्वरात्मक मायारूप शक्ति श्रीस्वरूपा, लक्ष्मीस्वरूपा, (श्रीमन्त्रानुगत धनधान्यरूपिणी तथा

लक्ष्मीमन्त्रानुगत हस्ति-अश्व-रथादि रूपिणी) एवं हिमालयपुत्री अम्बिका (भवानी), वाणीरूपिणी, उस ब्रह्मयोनिरूप विद्या और छठी जो इन्द्रसेना कही जाती है उसकी शरण में आया हूँ।

सर्वेषां वा एतद्भूतानामाकाशः परायणं सर्वाणि ह वा इमानि भूतान्याकाशादेव जायन्त आकाशादेव जातानि जीवन्त्याकाशं प्रयन्त्यभिसंविशन्ति तस्मादाकाशं बीजं विद्यात् ॥5॥

इन सभी भूतों का आकाश ही आश्रयीभूत है, ये सभी भूत आकाश से ही उत्पन्न होते हैं। आकाश से उत्पन्न होकर ही जीते हैं और अन्त में आकाश में ही विलीन हो जाते हैं। इसलिए आकाश ही को बीज समझना चाहिए।

तदेतदृषिणोक्तं निदर्शनम्—हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणासत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं महत्। य एवं वेदेति महोपनिषत् ॥6॥

इति तृतीयोपनिषत्।

इसके बारे में ऋषि का यह कथन है कि यह जो प्रत्यगात्माभिन्न परमात्मारूप हंस है, वह शुचिसद् – हृदयादि पवित्र प्रदेशों में रहने वाला है, वसुरूप है, अन्तरिक्ष में रहने वाला है। वही होता और वही अतिथि है, वही पृथ्वीलोक में और वही उससे श्रेष्ठ स्वर्गलोक में भी है। सर्वश्रेष्ठ सत्यलोक में भी उन्हीं का निवास है। आकाश में भी वही रहते हैं। सबसे उत्तम परमतत्त्व के रूप में पृथ्वी, जल, पर्वत और सभी सत्कार्यों में वे ही आविर्भूत होते हैं। इस प्रकार ज़ान लेने से उपर्युक्त फल प्राप्त होता है। यही महोपनिषद् है।

यहाँ तृतीय उपनिषत् पूरी होती है।

चतुर्थोपनिषत्

देवा ह वै प्रजापतिमब्रुवन्नानुष्टुभस्य मन्त्रराजस्य नारसिंहस्याङ्गमन्त्रान्नो ब्रूहि भगव इति ॥1॥

देवलोग प्रजापति के पास गए और पूछने लगे कि हे भगवन्! इस आनुष्टुभ नारसिंह मन्त्रराज के अंगभूत मन्त्रों को बताइए।

स होवाच प्रजापतिः प्रणवं सावित्रीं यजुर्लक्ष्मीं नृसिंहगायत्रीमित्यङ्गानि जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति ॥2॥

तब प्रजापति ने कहा—प्रणव को, सावित्री को (ॐकार को और गायत्रीमन्त्र को), यजुर्लक्ष्मी को और नृसिंहगायत्री को इसके अंग जानना चाहिए। जो यह जानता है वह अमृतत्व को प्राप्त होता है।

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एव सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ॥3॥

'ओम्' यह एक अक्षर (अविनाशी) ही सब कुछ है, उसी की महिमा से यह भूत, वर्तमान और भविष्य है। जो तीनों कालों से अतीत है वह भी तो ओंकार ही है। यह सब कुछ ब्रह्म है। यह आत्मा भी ब्रह्म ही है। ऐसा यह आत्मा चार पाद वाला है।

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥4॥

जागरित स्थान में रहने वाला, बाहर के दृश्य जगत् को विषय करने वाला, सात लोकरूपी सात अंगों वाला, उन्नीस मुखवाला (5 ज्ञानेन्द्रिय, 5 कर्मेन्द्रिय, 5 प्राण और 4 अन्तःकरण मिलाकर उन्नीस मुख) और भौतिक जगत् के भोगों को भोगने वाला जो है और यह विश्व जिसका शरीर है, ऐसा वैश्वानर नामधारी इसका प्रथम पाद है।

स्वप्नस्थानोऽन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक् तैजसो द्वितीयः पादः ॥5॥

और जिसका निवासस्थान स्वप्न में है, जो सूक्ष्म जगत् को व्याप्त कर रहा है, जिसका ज्ञान आन्तरिक है अर्थात् जिसका ज्ञान सूक्ष्म जगत् को व्याप्त करता है, जिसके पूर्वोक्त प्रकार से ही सात अंग हैं (सात अंग—द्युलोक, वायु, आकाश, सूर्य, पृथ्वी, जल और आहवनीय अग्नि–भी लिए जा सकते हैं।) और जिसके पूर्वोक्त प्रकार से ही उन्नीस अंग हैं, जो सूक्ष्म जगत् के भोगों को भोगता और पालता है, वह तैजस (हिरण्यगर्भ) इस आत्मा का दूसरा पाद है।

यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः। एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥6॥

जहाँ पर सोया हुआ पुरुष किसी प्रकार का स्वप्न नहीं देखता, वह सुषुप्तावस्था है। इस सुषुप्त स्थान में एकीभूत (प्रलयकाल में समष्टि चैतन्य भी सभी के साथ एकीभूत हो जाता है—यह यहाँ उपलक्षित है), सर्वांगपूर्ण विज्ञानस्वरूप, केवल आनन्दमय आनन्द को ही भोगनेवाला जो चिन्मय मुखवाला है, वह इस आत्मा का तीसरा पाद है। (आत्मा - ब्रह्म ही है और उसे यहाँ नृसिंह कहा गया है इसलिए नृसिंह भगवान का यह तृतीय पाद है, ऐसा कह सकते हैं)। यह ब्रह्मात्मा या ये परमात्मा नृसिंह सब कुछ जानने वाले हैं, सर्वान्तर्यामी हैं, जगत् की उत्पत्ति, स्थिति और लय के कारण भी वही हैं।

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञं नाप्रज्ञं न प्रज्ञानघन-मदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमैकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥7॥

जो स्थूलज्ञानरहित, जो सूक्ष्मज्ञानरहित, स्थूल-सूक्ष्म-उभयज्ञानरहित, ज्ञातृत्व और अज्ञातृत्व से विहीन, जो प्रज्ञान का घनीभूत रूप भी नहीं है, जो अदृश्य है, जो किसी की पकड़ के बाहर है, जो व्यवहार में नहीं लाया जा सकता, जो निराकार, अचिन्त्य, अनिर्वाच्य, जो आत्मसत्ता के रूप में ही अनुभूत हो सकता है, जो प्रपंचरहित है, शान्त है, मंगलकारी है, एक (अद्वितीय) है, वह इस आत्मरूप ब्रह्म का (नृसिंहरूप ब्रह्म का) चौथा पाद है, ऐसा ज्ञानी लोग मानते हैं। वही आत्मा है और वही जानने लायक है।

अथ सावित्री। गायत्र्या यजुषा प्रोक्ता तया सर्वमिदं व्याप्तं घृणिरिति द्वे अक्षरे सूर्य इति त्रीणि आदित्य इति त्रीणि एतद्वै सावित्र्यस्याष्टाक्षरं पदं श्रियाभिषिक्तं य एवं वेद श्रिया हैवाभिषिच्यते ॥8॥

अब सावित्रीमन्त्र के विषय में कहा जाता है—यह यजुर्वेद का मन्त्र है और गायत्री छन्द में निबद्ध है। इस मन्त्र में 'घृणि' ये दो अक्षर हैं, 'सूर्य' (सूरिय) ये तीन अक्षर हैं और 'आदित्य' ये तीन अक्षर हैं। इस मन्त्र से सबकुछ व्याप्त है। आठ अक्षरों वाला यह सावित्री मन्त्र श्री से विभूषित है (विभूतिमण्डित है)। यह जो जानता है वह विभूति से शोभित हो जाता है।

तदेतदृचाभ्युक्तम्—
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥ इति ॥9॥

यह बात ऋचा में भी कही गई है—सभी ऋचाएँ स्वयंप्रकाश शाश्वत ब्रह्मरूपी परमाकाश में ही प्रतिष्ठित हैं। सभी देवताएँ भी वहाँ निवास करती हैं। जो मनुष्य यह नहीं जानता उसे ऋचाओं के केवल पाठ से भला क्या लाभ हो सकता है ? (कुछ नहीं)। जो यह रहस्य जान लेते हैं वे आनन्दपूर्वक वहाँ (परमधाम में) प्रविष्ट हो जाते हैं।

न ह वा एतस्यर्चा न यजुषा न साम्नाऽर्थोऽस्ति यः सावित्रं वेदेति ॥10॥

जिसने इस सावित्रीमन्त्र को जान लिया है, उसे फिर ऋग्वेद, यजुर्वेद और सामवेद की कोई आवश्यकता नहीं पड़ती (अर्थात् इस सावित्रीमन्त्र में ही सब कुछ समाविष्ट है)।

ॐ भूर्लक्ष्मीर्भुवर्लक्ष्मीः स्वर्लक्ष्मीः कालकर्णी तन्नो महालक्ष्मीः प्रचोदयात् इत्येषा वै महालक्ष्मीर्यजुर्गायत्री चतुर्विंशत्यक्षरा भवति ॥11॥

जो भूलोक की लक्ष्मी, भुवः लोक की लक्ष्मी, स्वः लोक की लक्ष्मी, सर्वैश्वर्यमयी लक्ष्मी है, उसका नाम कालकर्णी है। ऐसी महालक्ष्मी हमको उत्तम कार्यों की ओर प्रेरित करे। यह यजुर्वेद में कही गई गायत्री महालक्ष्मी की गायत्री है, और इसमें चौबीस अक्षर होते हैं।

गायत्री वा इदं सर्वं यदिदं किंच तस्माद्य एतां महालक्ष्मीं 'याजुषीं' वेद महतीं श्रियमश्नुते ॥12॥

यह जो सब-कुछ है, वह गायत्री ही है। इसलिए जो मनुष्य इस महालक्ष्मी की यजुर्वेद कथित गायत्री को जानता है वह महान् ऐश्वर्य को भोगता है।

ॐ नृसिंहाय विद्महे। वज्रनखाय धीमहि। तन्नः सिंहः प्रचोदयात्। इत्येषा वै नृसिंहगायत्री देवानां वेदानां निदानं भवति य एवं वेद निदानवान्भवति ॥13॥

हम भगवान् नृसिंह को जानते हैं। वज्र जैसे नखवाले उस देव का हम ध्यान करते हैं। वह नृसिंह हमें प्रेरित करें। यह नृसिंह गायत्री है। यह देवों और वेदों का कारण (मूलस्रोत) है। जो यह जानता है वह उस मूलस्रोत को अर्थात् परमात्मा को ही प्राप्त कर लेता है।

देवा ह वै प्रजापतिमब्रुवन्नथ कैर्मन्त्रैः स्तुतो देवः प्रीतो भवति स्वात्मानं दर्शयति तन्नो ब्रूहि भगवन्निति ॥14॥

देवलोग प्रजापति ब्रह्माजी से पूछने लगे—'हे भगवन् ! किन-किन मन्त्रों के द्वारा स्तुति करने से ये देव (नृसिंह) प्रसन्न होते हैं और अपने स्वरूप को हमारे सामने प्रकट करते हैं, वह हमें बताइए'।

स होवाच प्रजापतिः ।
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च ब्रह्मा भूर्भुवः स्वस्तस्मै वै नमो नमः (1)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च विष्णुः '' '' '' (2)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च महेश्वरः '' '' '' (3)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च पुरुषः '' '' '' (4)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्चेश्वरः '' '' '' (5)
ॐ यो ह वै नृसिंहो देवो भगवान्या सरस्वती '' '' '' (6)
ॐ यो ह वै नृसिंहो देवो भगवान्या श्रीः '' '' '' (7)
ॐ यो ह वै नृसिंहो देवो भगवान्या गौरी '' '' '' (8)
ॐ यो ह वै नृसिंहो देवो भगवान्या प्रकृतिः '' '' '' (9)
ॐ यो ह वै नृसिंहो देवो भगवान्या विद्या '' '' '' (10)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्चोंकारः '' '' '' (11)
ॐ यो ह वै नृसिंहो देवो भगवान्याश्चतस्त्रोऽर्धमात्राः '' '' (12)
ॐ यो ह वै नृसिंहो देवो भगवान्ये वेदाः साङ्गा सशाखाः सेतिहासाः (13)
ॐ यो ह वै नृसिंहो देवो भगवान्ये च पंचाग्नयः '' '' '' (14)
ॐ यो ह वै नृसिंहो देवो भगवान्याः सप्त महाव्याहृतयः'' '' (15)
ॐ यो ह वै नृसिंहो देवो भगवान्ये चाष्टौ लोकपालाः '' '' (16)
ॐ यो ह वै नृसिंहो देवो भगवान्ये चाष्टौ वसवः'' '' '' (17)
ॐ यो ह वै नृसिंहो देवो भगवान्ये चैकादश रुद्राः '' '' (18)
ॐ यो ह वै नृसिंहो देवो भगवान्ये च द्वादशादित्याः '' '' (19)
ॐ यो ह वै नृसिंहो देवो भगवान्ये चाष्टौ ग्रहाः '' '' '' (20)
ॐ यो ह वै नृसिंहो देवो भगवान्यानि च पंच महाभूतानि '' (21)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च कालः '' '' '' (22)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च मनुः '' '' '' (23)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च मृत्युः '' '' '' (24)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च यमः '' '' '' (25)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्चान्तकः '' '' '' (26)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च प्राणः '' '' '' (27)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च सूर्यः '' '' '' (28)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च सोमः '' '' '' (29)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च विराट् पुरुषः '' '' (30)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च जीवः '' '' '' (31)
ॐ यो ह वै नृसिंहो देवो भगवान्यश्च सर्वम् '' '' '' (32)
इति द्वात्रिंशत् इति तान्प्रजापतिरब्रवीदेतैर्मन्त्रैर्नित्यं देवं स्तुवध्वम् ॥15॥

यह सुनकर प्रजापति ने कहा—इस मन्त्रराज के हर एक मन्त्र में बत्तीस अक्षर हैं और हर एक मन्त्र में एक स्तुति है। इन्ही मन्त्रों से स्तुति करनी चाहिए।

[यहाँ ऊपर बत्तीस मन्त्र प्रजापति ने बताए हैं। नृसिंह भगवान् को अनुष्टुभ् का स्वरूप माना गया है। ये बत्तीस मन्त्र इसलिए हैं कि अनुष्टुभ् छंद के बत्तीस अक्षर होते हैं। और एक-एक अक्षर के लिए एक मन्त्र दिया गया है अर्थात् अनुष्टुभ् नृसिंहमय होने से उसका एक-एक अक्षर नृसिंह स्वरूप ही है। और ऐसा करके उनकी बत्तीसों शक्तिधाराओं के साथ तादात्म्य प्राप्त करना इसका हेतु है।]

ततो देवः प्रीतो भवति स्वात्मानं दर्शयति। तस्माद्य एतैर्मन्त्रैर्नित्यं देवं स्तौति स देवं पश्यति। सोऽमृतत्वं च गच्छति य एवं वेदेति महोपनिषत् ॥16॥

इति चतुर्थोपनिषत्।

ऐसा करने से देव (नृसिंह भगवान्) प्रसन्न होते हैं और अपना स्वरूप प्रकट करते हैं। इसलिए जो मनुष्य इन (बत्तीस) मन्त्रों द्वारा हमेशा उन देव की स्तुति करता है वह उनका साक्षात्कार करता है और अमृतत्व को प्राप्त करता है, ऐसा जो जानता है वह भी अमृतत्व को प्राप्त होता है। ऐसी यह महोपनिषत् है।

यहाँ पर चतुर्थ उपनिषत् पूरी हुई।

❈

पञ्चमोपनिषत्

देवा ह वै प्रजापतिमब्रुवन्नानुष्टुभस्य मन्त्रराजस्य नारसिंहस्य महाचक्रं नाम चक्रं नो ब्रूहि भगव इति सार्वकामिकं मोक्षद्वारं यद्योगिन उपदिशन्ति ॥1॥

एक समय देवताओं ने प्रजापति से प्रश्न किया—हे भगवन्! अनुष्टुप् में निबद्ध नारसिंह मन्त्रराज जो 'महाचक्र' नाम से कहा जाता है, उसके बारे में हमें कहिए। वह महाचक्र सभी कामनाओं को पूरा करने वाला है और योगी लोग उसे मोक्ष का द्वार बताते हैं।

स होवाच प्रजापतिः षडक्षरं वा एतत्सुदर्शनं महाचक्रं तस्मात्षडरं भवति। षट् पत्रं चक्रं भवति। षड्वा ऋतवः। ऋतुभिः सम्मितं भवति। मध्ये नाभिर्भवति। नाभ्यां वा एते अराः प्रतिष्ठिता मायया एतत्सर्वं वेष्टितं भवति। नात्मानं माया स्पृशति तस्मान्मायया बहिर्वेष्टितं भवति ॥2॥

तब ब्रह्माजी बोले—यह सुदर्शन नाम का महाचक्र छः अक्षरों वाला होने से छः अरों वाला है। छः पत्रों वाला चक्र होता है। अथवा जो छः ऋतुएँ हैं, वे अरों के समान हैं। इसके मध्य में नाभि है और उस नाभि में ये अरे प्रतिष्ठित हुए हैं। मायारूपी नेमि से यह सब घिरा हुआ रहता है। माया आत्मा का स्पर्श नहीं करती। माया की चेष्टा बाहर की ही होती है।

अथाष्टाक्षरमष्टपत्रं चक्रं भवत्यष्टाक्षरा हि गायत्री। गायत्र्या सम्मितं भवति। बहिर्माययया वेष्टितं भवति। क्षेत्रं क्षेत्रं वै मायैषा सम्पद्यते ॥3॥

इसके बाद आठ अक्षर वाला अष्टदलीय चक्र भी हो सकता है क्योंकि गायत्री के प्रत्येक चरण में आठ अक्षर होते हैं, अत: क्योंकि आठ अरों की समानता गायत्री के आठ अक्षरों से होती है। इसको भी माया ने बाहर से घेर रखा है। माया तो प्रत्येक क्षेत्र में व्याप्त ही होती है।

अथ द्वादशारं द्वादशपत्रं चक्रं भवति। द्वादशाक्षरा वै जगती। जगत्या सम्मितं भवति बहिर्माययया वेष्टितं भवति ॥4॥

फिर बारह अरों वाला द्वादशदलीय चक्र बनता है। जगती छन्द बारह अक्षरों वाला है अत: जगती के साथ इसका इस तरह साम्य माना जाता है। यह चक्र भी बाहर से ही माया से आवेष्टित होता है।

अथ षोडशारं षोडशपत्रं चक्रं भवति। षोडशकलो वै पुरुषः। पुरुष एवेदं सर्वं पुरुषेण सम्मितं भवति। मायया बहिर्वेष्टितं भवति ॥5॥

फिर सोलह अरों वाला षोडशदलीय चक्र भी बनता है। वह पुरुष सोलह कलाओं वाला है। यह सब कुछ वह पुरुष ही है। पुरुष के सोलह कला वाला होने से इस षोडशदलीय चक्र के साथ उसका तादात्म्य बैठता है। यह चक्र भी बाहर से माया द्वारा वेष्टित होता है।

अथ द्वात्रिंशदरं द्वात्रिंशत्पत्रं चक्रं भवति। द्वात्रिंशदक्षरा वा अनुष्टुब्भ-वत्यनुष्टुभा सर्वमिदं भवति। मायया बहिर्वेष्टितं भवति ॥6॥

और भी बत्तीस अरों वाला बत्तीस दलों वाला भी चक्र होता है। क्योंकि अनुष्टुप् बत्तीस अक्षरों वाला छन्द है। अनुष्टुभ् से ही सब कुछ उत्पन्न होता है। यह भी माया के द्वारा बाहर से ही आवेष्टित है।

अरैर्वा एतत्सुबद्धं भवति। वेदा वा एते अराः। पत्रैर्वा एतत्सर्वतः परिक्रामति। छन्दांसि वा पत्राणि ॥7॥

यह चक्र अरों से अच्छी तरह बँधा हुआ रहता है। वेद ही इस चक्र के अरे हैं, छन्दरूपी पत्तों के द्वारा यह चारों ओर घूमता रहता है। छन्द ही इसके पत्ते हैं।

एतत्सुदर्शनं महाचक्रं तस्य मध्ये नाभ्यां तारकं यदक्षरं नारसिंहमेकाक्षरं तद् भवति। षट्सु पत्रेषु षडक्षरं सुदर्शनं भवत्यष्टसु पत्रेष्वष्टाक्षरं नारायणं भवति। द्वादशसु पत्रेषु द्वादशाक्षरं वासुदेवं भवति। षोडशसु पत्रेषु मातृकाद्याः सबिन्दुकाः षोडश स्वरा भवन्ति। द्वात्रिंशत्सु पत्रेषु द्वात्रिंश-दक्षरं मन्त्रराजं नारसिंहमानुष्टुभं भवति। तद्वा एतत्सुदर्शनं नाम चक्रं महाचक्रं सर्वकामिकं मोक्षद्वारमृङ्मयं यजुर्मयं साममयं ब्रह्ममयममृतमयं भवति। तस्य पुरस्ताद्वसव आसते। रुद्रा दक्षिणत आदित्याः पश्चाद् विश्वेदेवा उत्तरतो महाविष्णुमहेश्वरा नाभ्यां सूर्याचन्द्रमसौ पार्श्वयोः ॥8॥

यह (बत्तीस दलों वाला) सुदर्शन महाचक्र है। इसके मध्य में नाभि में जो नारसिंह तारक है, वह एकाक्षर कहा जाता है। अर्थात् वहाँ एकाक्षरी तारक मन्त्र 'ॐ' का न्यास (स्थापन) करना चाहिए। षड्दलीय में छ: अक्षर वाले सुदर्शन मन्त्र का न्यास (स्थापन) करना चाहिए। ('सहस्रार हुँ फट्'— यह षडक्षर मन्त्र है)। अष्टदलीय में अष्टाक्षरी नारायण मन्त्र का और बारह दल वाले में द्वादशाक्षरी

वासुदेव मन्त्र का न्यास (स्थापन) करना चाहिए। (अष्टाक्षरी मन्त्र है 'ॐ नमो नारायणाय' और द्वादशाक्षरी मन्त्र है, 'ॐ नमो भगवते वासुदेवाय')। सोलह दलों में प्रारंभ के बिन्दु सहित सोलह अक्षरों की स्थापना करनी चाहिए, और बत्तीस दलों में बत्तीस अक्षरवाले मन्त्रराज नारसिंह, जो कि अनुष्टुभ् में निबद्ध है, उसकी स्थापना करनी चाहिए। यह सुदर्शचक्र नाम का महाचक्र सर्वकामनाओं को पूर्ण करने वाला, मोक्ष का द्वाररूप, ऋग्वेदमय, यजुर्वेदमय, सामवेदमय, ब्रह्ममय और अमृतमय है। इसके आगे आठ वसु बैठते हैं, दक्षिण की ओर ग्यारह रुद्र बैठते हैं, पीछे बारह आदित्य बैठते हैं, उत्तर की ओर विश्वदेवा, नाभि में ब्रह्मा, विष्णु और महेश्वर तथा पार्श्वभागों में सूर्य, चन्द्र अवस्थित हैं।

तदेतदृचाभ्युक्तम्—
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत। इति ॥9॥

एक ऋचा यह भी कहती है कि परमाकाशस्वरूप भगवान् नृसिंह, जो कि अक्षर (अच्युत) हैं, उन्हीं में सभी वेद उपस्थित हैं, सभी देव भी तो उन्हीं में स्थित हैं। जो उन भगवान् को और उनके चक्र को नहीं जानता, वह वेदों को पढ़-पढ़कर भला क्या करेगा ? जो इसे (नृसिंह को) और उनके चक्र को जानते हैं, वे परमगति को प्राप्त करते हैं।

तदेतत्सुदर्शनं महाचक्रं बालो वा युवा वा वेद स महान्भवति। स गुरुः सर्वेषां मन्त्राणामुपदेष्टा भवत्यनुष्टुभा होमं कुर्यादनुष्टुभार्चनं कुर्यात्तदेतद्रक्षोघ्नं मृत्युतारकं गुरुणा लब्धं कण्ठे बाहौ शिखायां वा बध्नीत। सप्तद्वीपवती भूमिर्दक्षिणार्थं नावकल्पते तस्माच्छ्रद्धया या कांचिद् गां दद्यात्सा दक्षिणा भवति ॥10॥

इस सुदर्शन नाम के महाचक्र को जो कोई बालक या युवा जानता है, तो वह महान् हो जाता है। वह सभी मन्त्रों का गुरु और उपदेशक होता है। इस अनुष्टुभ् मन्त्र से होम करना चाहिए, इस अनुष्टुभ् मन्त्र की पूजा करनी चाहिए। यह राक्षसों को मारने वाला है और मृत्यु से पार ले जाने वाला है। गुरु के द्वारा ही प्राप्त इस सुदर्शन महाचक्र को कण्ठ में, हाथ में, या शिखा में बाँधना चाहिए। इस मन्त्र के मूल्य (दक्षिणा) में सप्त द्वीपवाली यह भूमि भी पर्याप्त नहीं हो सकती (कम होती है)। इसलिए इस मन्त्र के बदले में श्रद्धा से थोड़ी-सी भी दान में दी गई भूमि दक्षिणा होगी।

देवा ह वै प्रजापतिमब्रुवन्नानुष्टुभस्य मन्त्रराजस्य नारसिंहस्य फलं नो ब्रूहि भगव इति ॥11॥

देवताओं ने प्रजापति से पूछा—हे भगवन्। इस नारसिंह मन्त्रराज, जो अनुष्टुभ् में निबद्ध है इसका फल हमें बताइए।

स होवाच प्रजापतिर्य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आदित्यपूतो भवति स सोमपूतो भवति स सत्यपूतो भवति स ब्रह्मपूतो भवति स विष्णुपूतो भवति स रुद्रपूतो भवति स देवपूतो भवति। स सर्वपूतो भवति स सर्वपूतो भवति ॥12॥

प्रजापति ने कहा—जो मनुष्य इस नारसिंह आनुष्टुभ् मन्त्रराज को सर्वदा पढ़ता है वह अग्नि जैसा

पवित्र, वायु जैसा पवित्र, आदित्य जैसा पवित्र हो जाता है। वह सोम जैसा पवित्र, वह सत्य जैसा पवित्र हो जाता है, वह ब्रह्मा, विष्णु, रुद्र जैसा पवित्र होता है, वह देवों की तरह पवित्र हो जाता हैं वह इन सबकी तरह पवित्र हो जाता है। [यहाँ 'जैसा' शब्द के स्थान पर 'के द्वारा' शब्द रखकर भी अनुवाद पढ़ा जा सकता है।]

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स मृत्युं तरति स पाप्मानं तरति स ब्रह्महत्यां तरति स भ्रूणहत्यां तरति स वीरहत्यां तरति स सर्वहत्यां तरति स संसारं तरति स सर्वं तरति स सर्वं तरति ॥13॥

जो इस नारसिंह आनुष्टुभ् मन्त्रराज का हमेशा पाठ करता है वह मृत्यु को पार कर जाता है, वह पापों को पार कर लेता है, वह ब्रह्महत्या को पार कर लेता है, वह भ्रूणहत्या को पार कर लेता है, वह वीरहत्या को पार कर लेता है। वह सर्वहत्या से भी बच जाता है। वह संसार को पार कर लेता है। वह सबको तैर जाता है, वह सबको तैर जाता है।

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निं स्तम्भयति स वायुं स्तम्भयति स आदित्यं स्तम्भयति स सोमं स्तम्भयति स उदकं स्तम्भयति स सर्वान्देवान्स्तम्भयति स सर्वान्ग्रहांस्तम्भयति स विषं स्तम्भयति स विषं स्तम्भयति ॥14॥

जो मनुष्य इस नारसिंह आनुष्टुभ् मन्त्रराज का नित्य पाठ करता है, वह अग्नि को स्थिर कर सकता है, वह वायु को रोक सकता है, वह सूर्य को स्थगित कर सकता है, वह सोम को अवरुद्ध कर सकता है, वह पानी के प्रवाह को रोक सकता है, वह सभी देवों को रोक सकता है, वह सभी ग्रहों को रोक सकता है, वह जहर को भी रोक सकता है, जहर को भी रोक सकता है।

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स देवानाकर्षयति स यक्षानाकर्षयति स नागानाकर्षयति स ग्रहानाकर्षयति स मनुष्यानाकर्षयति स सर्वानाकर्षयति स सर्वानाकर्षयति ॥15॥

जो मनुष्य इस नारसिंह आनुष्टुभ् मन्त्रराज का सदैव पाठ करता है, वह देवों को आकर्षित करता है, वह यक्षों को आकर्षित करता है, वह नागों को आकर्षित करता है, वह ग्रहों को आकर्षित करता है, वह मनुष्यों को आकर्षित करता है, वह सबको आकर्षित करता है वह सबको ही आकर्षित कर लेता है।

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स भूर्लोकं जयति स भुवर्लोकं जयति स स्वर्लोकं जयति स महर्लोकं जयति स जनोलोकं जयति स तपोलोकं जयति स सत्यलोकं जयति स सर्वांल्लोकाञ्जयति स सर्वांल्लोकाञ्जयति ॥16॥

जो कोई भी इस नारसिंह आनुष्टुभ् मन्त्रराज का नित्य ही पाठ करता है वह भूर्लोक को जीतता है, वह भुवर्लोक को जीतता है, वह स्वर्लोक को जीतता है, वह महर्लोक को जीतता है, वह जनलोक को जीतता है, वह तपोलोक को भी जीतता है, वह सत्यलोक को भी जीतता है, वह सभी लोकों को जीत लेता है, वह सभी लोकों को जीत लेता है।

स एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते सोऽग्निष्टोमेन यजते स उक्थ्येन यजते स षोडशिना यजते स वाजपेयेन यजते सोऽतिरात्रेण

यजते सोऽप्तोर्यामेण यजते सोऽश्वमेधेन यजते स सर्वैः क्रतुभिर्यजते स सर्वैः क्रतुभिर्यजते ॥17॥

जो कोई भी इस नारसिंह आनुष्टुभ् मन्त्रराज का प्रतिदिन पाठ करता है वह अग्निष्टोम से होम करता है, वह उक्थ्ययाग, षोडशीयाग, वाजपेयीयाग, अत्रिरात्रयाग, अप्तोर्योमयाग, अश्वमेधयाग करता है, वह सभी याग करता है, सभी याग वह करता है। अर्थात् सभी यज्ञों का फल उसे इस मन्त्रराज के पाठ से मिल ही जाता है।

य एतं मन्त्रराजं नारसिंहमानुष्टुभं नित्यमधीते स ऋचोऽधीते स यजूंष्यधीते स सामान्यधीते सोऽथर्वणमधीते सोऽङ्गिरसमधीते स शाखा अधीते स पुराणान्यधीते स कल्पानधीते स गाथामधीते स नाराशंसीरधीते स प्रणवमधीते स यः प्रणवमधीते स सर्वमधीते स सर्वमधीते ॥18॥

जो इस नारसिंह आनुष्टुभ् मन्त्रराज का प्रतिदिन पाठ करता है वह ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद, आंगिरस, वेदों की सभी शाखाओं के स्वाध्याय का फल प्राप्त करता है वह पुराणों के, कल्पों के, गाथाओं के, नारायणी और प्रणव के स्वाध्याय फल प्राप्त करता है। अर्थात् इस मन्त्रराज के नियमित पाठ से वह सभी का अध्ययन कर लेता है।

अनुपनीतशतमेकमेकेनोपनीतेन तत्सममुपवीतशतमेकमेकेन गृहस्थेन तत्समं गृहस्थशतमेकमेकेन वानप्रस्थेन तत्समं वानप्रस्थशतमेकमेकेन यतिना तत्समं यतीनां तु शतं पूर्णमेकमेकेन रुद्रजापकेन तत्समं रुद्रजापकशतमेकमेकेनाथर्वशिरःशिखाध्यापकेन तत्सममथर्वशिरःशाखाध्यापकशतमेकमेकेन तापनीयोपनिषदध्यापकेन तत्समं तापनीयोपनिषदध्यापकशतमेकमेकेन मन्त्रराजाध्यापकेन तत्समम् ॥19॥

सौ उपवीत विहीन के बराबर एक उपवीती होता है, सौ उपवीतियों के तुल्य एक गृहस्थ होता है, सौ गृहस्थों के समान एक वानप्रस्थी होता है, सौ वानप्रस्थियों के समान एक यति होता है, सौ यतियों के समान एक रुद्रजापक होता है, सौ रुद्रजापकों के समान एक अथर्वशिरःशाखा का अध्यापक होता है, सौ अथर्वशिरःशाखाध्यापकों के तुल्य एक तापनीयोपनिषद् का अध्यापक होता है और सौ तापनीयोपनिषद् के अध्यापकों के समान एक इस मन्त्रराज का अध्यापक होता है। अर्थात् मन्त्रराजाध्यापक की महिमा सबसे बढ़ी-चढ़ी है।

तद्वा एतत्परमं धाम मन्त्रराजाध्यापकस्य यत्र न सूर्यस्तपति यत्र न वायुर्वाति यत्र न चन्द्रमा भाति यत्र न नक्षत्राणि भान्ति यत्र नाग्निर्दहति यत्र न मृत्युः प्रविशति यत्र न दुःखं सदानन्दं परमानन्दं शान्तं शाश्वतं सदाशिवं ब्रह्मादिवन्दितं योगिध्येयं परमं पदं यत्र गत्वा न निवर्तन्ते योगिनः ॥20॥

उस मन्त्रराज का अध्यापक (साधक) उस धाम को प्राप्त होता है जहाँ सूर्य नहीं तपता, वायु निर्वहण नहीं करता, चन्द्रमा नहीं प्रकाशित होता, नक्षत्र नहीं चमकते, अग्नि नहीं जलती, मृत्यु वहाँ आ नहीं सकती, वहाँ दुःख नहीं होता। सदानन्द, परमानन्द, शान्त, शाश्वत, सदाशिव ब्रह्मादि के द्वारा वन्दित, योगियों के ध्येय वह परमपद है, जहाँ जाकर योगि लोग फिर से यहाँ मर्त्यलोक में नहीं आते।

तदेतदृचाभ्युक्तम्—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् । तदेतन्निष्कामस्य भवति । तदेतन्निष्कामस्य भवति य एवं वेदेति महोपनिषत् ॥21॥

इति पञ्चमोपनिषत् ।

इति नृसिंहपूर्वतापिन्युपनिषत्समाप्ता ।

ऋचा कहती है—ज्ञानीलोग विष्णु के उस परमपद को सदैव देखते हैं, मानो आकाश में फैलाये गए नेत्र जैसा है । जागरूक विद्वान् स्तोतागण उस परमपद को प्रकाशित करते हैं । जो ऐसा जानता है, ऐसे निष्कामी को यह दिव्य पद प्राप्त होता है । यह महोपनिषत् है ।

यहाँ पाँचवीं उपनिषत् पूरी हुई है और नृसिंहपूर्वतापनी भी पूर्ण हुई ।

शान्तिपाठः

ॐ भद्रं कर्णेभिः.........देवहितं यदायुः । (पूर्ववत्)

ॐ शान्तिः शान्तिः शान्तिः ॥

(28) नृसिंहोत्तरतापिन्युपनिषत्

(उपनिषत्परिचय)

परम्परा से अथर्ववेद से सम्बद्ध मानी गई इस उपनिषद् के नव खण्ड हैं। इसमें शुरू में माण्डूक्योपनिषद् की तरह की ॐकार और उसकी चार मात्राएँ तथा आत्मा के वैश्वानर, तैजस, प्राज्ञ और साक्षी—इन चार पादों का वर्णन आता है। बाद में आत्मा के साक्षी स्वरूप का प्रतिपादन है। आत्मा चक्षु आदि इन्द्रियों तथा मन, बुद्धि, अहंकारादि और प्राणों का केवल द्रष्टा ही है, साक्षी ही है, वह अविकारी है, चैतन्यस्वरूप, आनन्दमय, स्वयंप्रकाश, एकरस, अजर-अमर और अभय है। काष्ठ को जलाने के बाद जैसे अग्नि शान्त हो जाती है, ठीक उसी प्रकार वाणी और मन के विषय दूर हो जाने पर चित्स्वरूप में वही शेष रहता है। नृसिंह के मन्त्र द्वारा जो मनुष्य जाग्रदादि अवस्थात्रयरहित आत्मा को जान लेता है, वह सदा उज्ज्वल, अज्ञानरहित, बन्धनरहित, द्वैतरहित, आनन्दरूप और मोहशून्य हो जाता है। यह सारा जगत् आत्ममय ही है क्योंकि इसमें ईश्वर व्याप्त होकर रहता है। इस व्यापक नृसिंहरूप ईश्वर को जानने वाला आत्माराम निष्कामकर्मी ब्रह्मरूप हो जाता है। आत्मा ब्रह्मरूप, सच्चिदानन्द, पूर्ण, अद्वैत, शब्द-स्पर्श-रूप-रस-गन्धहीन, प्राण-मन-बुद्धि-चित्त-अहंकार से परे, असंग, निर्गुण एवं स्वयंप्रकाश है।

शान्तिपाठः

ॐ भद्रं कर्णेभिः..........देवहितं यदायुः। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (अथर्वशिर उपनिषद् में) द्रष्टव्य है।

प्रथमः खण्डः

देवा ह वै प्रजापतिमब्रुवन् अणोरणीयांसमिममात्मानमोंकारं नो व्याचक्ष्वेति ॥1॥

देवलोग प्रजापति से एक बार कहने लगे—अणु से भी अणु इस आत्मा के स्वरूप ओंकार के विषय में हमें आप बताइए।

तथेत्योमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्वमोंकार एव। यच्चान्यत् त्रिकालातीतं तदप्योंकार एव सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म ॥2॥

प्रजापति ने 'अच्छा' ऐसा कहकर बताया कि यह सब जो कुछ है वह 'ओम्' यह एक अक्षर रूप ही है। इसका विवरण यह है कि जो भूतकाल में था, वर्त्तमान में होता है और भविष्य में होगा, वह सब ओंकार ही है। इतना ही नहीं, इन तीन कालों से जो परे है, वह भी ओंकार ही है। यह सब कुछ ब्रह्म ही है। यह आत्मा ब्रह्म ही है।

तमेतमात्मानमोमिति ब्रह्मणैकीकृत्य ब्रह्म चात्मनमोमित्येकीकृत्य तदेकमजरममृतमभयमोमित्यनुभूय तस्मिन्निदं सर्वं त्रिशरीरमारोप्य तन्मयं हि तदेवेति संहरेदोमिति ॥3॥

इस आत्मा को 'ओम्' अक्षर के द्वारा ब्रह्म के साथ तादात्म्य करके तथा ब्रह्म को आत्मा के साथ एकीभाव करके उस एक को ही अजर, अमर, अमृत, अभय को, ओम् के द्वारा अनुभूति में लाकर उसी ब्रह्मात्मैक्य में तीनों शरीरों को—त्रिगुणात्मक, अवस्थात्रयात्मक, आधिभौतिकादि तापत्रयात्मक, स्थूलादि तीनों शरीरों को अथवा विश्वादि तीनों जीवों को—अर्थात् त्रित्ववाली सभी वस्तुओं का आरोपण करके वह तद्रूप ही है और ये तीनों शरीर, अवस्था, गुण आदि मिथ्या है, ऐसा अनुसन्धान करना चाहिए। (यहाँ अध्यारोप और अपवाद की बात कही गई है)।

तं वा एतं त्रिशरीरमात्मानं त्रिशरीरं परं ब्रह्मानुसन्दध्यात्। स्थूलत्वात्स्थूल-भुक्त्वाच्च सूक्ष्मत्वात्सूक्ष्मभुक्त्वाच्चैक्यादानन्दभोगाच्च ॥4॥
सोऽयमात्मा चतुष्पात् ॥5॥

उसी तीन शरीरवाले माने गए आत्मा को तीन शरीरवाले ब्रह्म के रूप में ही, जहाँ तक उन दोनों के ऐक्य की अनुभूति हो जाए, तब तक ध्यान करना चाहिए। ब्रह्म का इन तीन शरीरों के अधिकरण रूप में चिन्तन करना चाहिए। स्वयं स्थूल होकर स्थूल पदार्थों का भोग करने से तथा वही स्वयं सूक्ष्म होकर सूक्ष्म वस्तुओं का भोग करने से दोनों की एकता समान ही दीखती है अर्थात् जाग्रदभिमानी स्थूल आत्मा स्थूल भोगों को भोगता है और स्वप्नाभिमानी सूक्ष्म आत्मा सूक्ष्म भोग भोगता है, उन दोनों की एकता दीखती ही है। जैसे ये अवस्थाएँ व्यष्टिचैतन्य की हैं वैसे ही समष्टिचैतन्य की भी हैं। जैसे विश्व-विराट् का अर्थात् तैजस-सूत्रात्मा का ऐक्य ही है, उसी प्रकार प्राज्ञ-ईश्वर का भी ऐक्य है। आनन्द भोग भी दोनों के समान हैं। यह आत्मा चार पाद वाला है।

जागरितस्थानः स्थूलप्रज्ञः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुक् चतुरात्मा विश्वो वैश्वानरः प्रथमः पादः ॥6॥

जाग्रत् अवस्था में रहने वाला, स्थूल (बाह्य) ज्ञान को जानने वाला, सात लोकरूप अंगों वाला (अथवा स्वर्ग, सूर्य, आकाश, पृथ्वी, जल, वायु और आहवनीय अग्निरूप सात अंगों वाला), उन्नीस मुखवाला (5 ज्ञानेन्द्रिय + 5 कर्मेन्द्रिय + 5 प्राण + 4 अन्तःकरण = 19); यह उस चार पाद वाले आत्मा का प्रथम पाद है, वह समष्टि में वैश्वानर और व्यष्टि में विश्व कहा जाता है।

स्वप्नस्थानः सूक्ष्मप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः सूक्ष्मभुक् चतुरात्मा तैजसो हिरण्यगर्भः द्वितीयः पादः ॥7॥

स्वप्नावस्था में रहने वाला, सूक्ष्म (अन्तः) ज्ञान को जानने वाला, सात लोकरूप अंगों वाला (पूर्वोक्त प्रकार से सात अंग हैं), पूर्वोक्त प्रकार से ही उन्नीस मुखवाला यह पाद, उस चारपाद वाले आत्मा का दूसरा पाद है। वह व्यष्टि में तैजस और समष्टि में हिरण्यगर्भ कहा जाता है।

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतो-मुखश्चतुरात्मा प्राज्ञ ईश्वरस्तृतीयः पादः ॥8॥

यथाश्वत्थदले सूक्ष्माः स्थूलाश्च विततास्तथा ॥76॥

कन्द के नीचे की ओर पैर के अँगूठे तक गई हुई नाडी का नाम 'कौशिकी' है। यह उपर्युक्त दस नाड़ियाँ कन्द से निकली हुई कही गई है। और उन नाडियों के मूल से स्थूल और सूक्ष्म अनेकानेक नाडियाँ निकलती हैं। ये सूक्ष्म और स्थूल सब नाडियाँ मिलकर बहत्तर हजार बताई जाती हैं। इनमें स्थूल और सूक्ष्म नाडियों को पृथक्-पृथक् गिनना तो संभव नहीं है। यह तो पिप्पल के पत्ते की स्थूल और सूक्ष्म नसों को गिनने की भाँति ही अशक्य है।

प्राणापानौ समानश्च उदानो व्यान एव च ।
नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ॥77॥
चरन्ति दशनाडीषु दश प्राणादिवायवः ।
प्राणादिपञ्चकं तेषु प्रधानं तत्र च द्वयम् ॥78॥
प्राण एवाऽथवा ज्येष्ठो जीवात्मानं बिभर्ति यः ।
आस्यनासिकयोर्मध्यं हृदयं नाभिमण्डलम् ॥79॥
पादाङ्गुष्ठमिति प्राणस्थानानि द्विजसत्तम ।
अपानश्चरति ब्रह्मन् ! गुदमेढ्रोरुजानुषु ॥80॥

प्राण, अपान, समान, उदान, व्यान, नाग, कूर्म, कृकर, देवदत्त और धनंजय—ये दश प्राण भी दस नाडियों में विचरण करते रहते हैं। उनमें पहले पाँच प्राणवायु मुख्य हैं और उनमें भी पहले दो—प्राण और अपान प्रधान हैं। अथवा प्राण ही सबसे प्रधान है, जो जीवात्मा को धारण करता है। हे द्विजश्रेष्ठ ! उस महान् प्राण के पाँच निवासस्थान बताए गए हैं। वे हैं—मुख, नासिका का मध्यभाग, हृदय, नाभिमण्डल और पैर का अँगूठा। हे ब्रह्मन् ! अब अपानवायु जो है, वह गुदा, मेढ़, जंघा एवं घुटनों में विचरता है।

समानः सर्वगात्रेषु सर्वव्यापी व्यवस्थितः ।
उदानः सर्वसन्धिस्थः पादयोर्हस्तयोरपि ॥81॥
व्यानः श्रोत्रोरुकट्यां च गुल्फस्कन्धगलेषु च ।
नागादिवायवः पञ्च त्वगस्थ्यादिषु संस्थिताः ॥82॥
तुन्दस्थजलमन्नं च रसादीनि समीकृतम् ।
तुन्दमध्यगतः प्राणस्तानि कुर्यात्पृथक्पृथक् ॥83॥
इत्यादिचेष्टनं प्राणः करोति च पृथक् स्थितम् ।
अपानवायुर्मूत्रादेः करोति च विसर्जनम् ॥84॥

समानवायु शरीर के सभी अवयवों में सर्वव्यापी होकर विद्यमान है। उदानवायु हाथों, पैरों और शरीर के सभी सन्धिस्थलों में रहता है। व्यानवायु कान, जंघाएँ और कटि प्रदेश में रहता है तथा एडी, कन्धों और गले में भी वह रहता है। नाग आदि पाँच उपप्राण त्वगिन्द्रिय एवं अस्थि आदि में रहते हैं। प्राणवायु आमाशयस्थ जल, अन्न, रस आदि का पहले समीकरण (मिश्रण) करता है और बाद में उसका पृथक्करण करता है। प्राणवायु इन सभी कार्यों को स्वयं पृथक् रहकर करता है। और जो अपानवायु है, वह मल-मूत्रादि का विसर्जन करता है।

प्राणापानादिचेष्टादि क्रियते व्यानवायुना ।
उज्जीर्यते शरीरस्थमुदानेन नभस्वता ॥85॥
पोषणादिशरीरस्य समानः कुरुते सदा ।
उद्गारादिक्रियो नागः कूर्मोऽक्षादिनिमीलनः ॥86॥
कृकरः क्षुतयोः कर्त्ता दत्तो निद्रादिकर्मकृत् ।
मृतगात्रस्य शोभादेर्धनञ्जय उदाहृतः ॥87॥
नाडीभेदं मरुद्भेदं मरुतां स्थानमेव च ।
चेष्टाश्च विविधास्तेषां ज्ञात्वैव द्विजसत्तम ॥88॥

प्राण और अपान आदि वायुओं की चेष्टाएँ व्यानवायु के संयोग से ही सम्पन्न होती हैं। और शरीरस्थ उदान वायु से नभोगामी (ऊँचे उठने की क्रिया) की जा सकती है। शरीर की पोषण आदि क्रियाएँ समानवायु करता है। नागवायु द्वारा डकार आदि क्रियाएँ होती है। आँख की पलकों का मीलनोन्मीलन कूर्मवायु करता है। कृकरवायु का कार्य भूख लगाना है और देवदत्तवायु निद्रा आदि कार्य करता है। मृत व्यक्ति के देह की थोड़ी देर तक शोभा ज्यों-की-त्यों रखने का काम धनंजय वायु करता है, ऐसा कहा गया है। हे द्विजश्रेष्ठ ! इस प्रकार नाड़ी, वायु आदि के स्थान तथा उनके प्रकार और उनके विविध कार्यों को जानने का प्रयत्न चाहिए।

शुद्धौ यतेत नाडीनां पूर्वोक्तज्ञानसंयुतः ।
विविक्तदेशमासाद्य सर्वसम्बन्धवर्जितः ॥89॥
योगाङ्गद्रव्यसम्पूर्णं तत्र दारुमये शुभे ।
आसने कल्पिते दर्भकुशकृष्णाजिनादिभिः ॥90॥
तावदासनमुत्सेधे तावद् द्वयसमायते ।
उपविश्यासनं सम्यक् स्वस्तिकादि यथारुचि ॥91॥

उपर्युक्त ज्ञानविधि से नाडीशोधन कर लेना चाहिए। बाद में सभी सम्बन्धों को छोड़कर किसी एकान्त स्थान में रहते हुए योगांग के लिए सभी सामग्री एकत्रित करके, दर्भ, कुश अथवा काले हिरन

के चर्म आदि का दारुमय आसन बनाकर जब तक दोनों ओर के अंग समान न हो जाएँ, तब तक आसन की साधना करते रहना चाहिए। इसके लिए आसन-स्थान पर बैठकर अपनी-अपनी रुचि के अनुसार स्वस्तिक आदि किसी आसन का अभ्यास करते रहना चाहिए।

बद्ध्वा प्रागासनं विप्र ऋजुकायः समाहितः।
नासाग्रन्यस्तनयनो दन्तैर्दन्तानसंस्पृशन् ॥92॥
रसनां तालुनि न्यस्य स्वस्थचित्तो निरामयः।
आकुञ्चितशिरः किञ्चिन्निबध्नन्योगमुद्रया ॥93॥
हस्तौ यथोक्तविधिना प्राणायामं समाचरेत्।
रेचनं पूरणं वायोः शोधनं रेचनं तथा ॥94॥

पहले तो आसन लगाकर सीधे बैठना चाहिए। हे ब्रह्मन्! बाद में नाक के अग्र भाग पर दृष्टि रखनी चाहिए। फिर दाँतों को दाँतों से स्पर्श किए बिना ही जीभ को तालु में लगाकर चित्त को स्वस्थ करके निरामय भाव से सिर को थोड़ा आगे झुकाकर, हाथों को एक-दूसरे से जोड़कर योगमुद्रा में प्राणायाम का परिशीलन करना चाहिए। रेचक-पूरक-कुम्भक के द्वारा वायु का शोधन करके बारी-बारी से रेचन की क्रिया करनी चाहिए।

चतुर्भिः क्लेशनं वायोः प्राणायाम उदीर्यते।
हस्तेन दक्षिणेनैव पीडयेन्नासिकापुटम् ॥95॥
शनैः शनैरथ बहिः प्रक्षिपेत्पिङ्गलानिलम्।
इडया वायुमापूर्य ब्रह्मन् षोडशमात्रया ॥96॥
पूरितं कुम्भयेत्पश्चाच्चतुःषष्ट्या तु मात्रया।
द्वात्रिंशन्मात्रया सम्यग्रेचयेत्पिङ्गलानिलम् ॥97॥

इस तरह चार प्रक्रियाओं से वायु का क्लेशन (गतिमान) करने की विधि को प्राणायाम कहा जाता है। दाहिने हाथ से नासापुट को दबाकर पिंगला से (दायीं नासिका से) वायु को पहले बाहर निकालना चाहिए। बाद में सोलह मात्रा से इडा (बाँयी नासिका) से वायु को भीतर की ओर खींचना चाहिए। और चौंसठ मात्रा से कुम्भक करना चाहिए। तथा बत्तीस मात्रा से उस वायु को पिंगला (दायीं नासिका) से बाहर कर देना चाहिए।

एवं पुनः पुनः कार्यं व्युत्क्रमानुक्रमेण तु।
सम्पूर्णकुम्भवद्देहं कुम्भयेन्मातरिश्वना ॥98॥
पूरणान्नाडयः सर्वाः पूर्यन्ते मातरिश्वना।
एवं कृते सति ब्रह्मंश्चरन्ति दश वायवः ॥99॥
हृदयाम्भोरुहं चापि व्याकोचं भवति स्फुटम्।
तत्र पश्येत्परात्मानं वासुदेवमकल्मषम् ॥100॥
प्रातर्माध्यन्दिने सायमर्धरात्रे च कुम्भकान्।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत् ॥101॥

इस प्रकार बार-बार परिवर्तित क्रम से सर्वदा अभ्यास करते रहना चाहिए और शरीर के भीतर भरी हुई वायु को घड़े की भाँति स्थिर करके रोकते रहना चाहिए। इस क्रिया में हे ब्रह्मन्! सभी नाडियाँ वायु से भर जाती हैं। उन नाडियों में दसों वायु ठीक तरह से चलते रहते हैं। इसके बाद हृदयरूपी

कमल स्वच्छ, विकसित एवं स्पष्ट हो जाता है। और उस स्थान पर परमात्मरूप निष्कलंक वासुदेव के स्पष्टरूप से दर्शन होने लगते हैं। इस तरह के अभ्यास से प्रात:काल, मध्याह्नकाल, सायंकाल तथा अर्धरात्रि में चार बार कुम्भक करना चाहिए और धीरे-धीरे क्रमशः उसे अस्सी मात्रा तक बढ़ाना चाहिए।

एकाहमात्रं कुर्वाणः सर्वपापैः प्रमुच्यते।
संवत्सरत्रयादूर्ध्वं प्राणायामपरो नरः ॥102॥
योगसिद्धो भवेद्योगी वायुजिद्विजितेन्द्रियः।
अल्पाशी स्वल्पनिद्रश्च तेजस्वी बलवान्भवेत् ॥103॥
अपमृत्युमतिक्रम्य दीर्घमायुरवाप्नुयात्।
प्रस्वेदजननं यस्य प्राणायामस्तु सोऽधमः ॥104॥
कम्पनं वपुषो यस्य प्राणायामेषु मध्यमः।
उत्थानं वपुषो यस्य स उत्तम उदाहृतः ॥105॥

जो मनुष्य केवल एक दिन ऐसा प्राणायाम करता है, वह सभी पापों से छुटकारा पाता है। जो लगातार तीन साल तक इस प्रकार प्राणायामपरायण रहता है, वह मनुष्य योगसिद्ध योगी बन जाता है। इस वायु को जीतने वाला इन्द्रियों को वश में रखने वाला, कम खाने वाला, कम निद्रा लेने वाला, तेजस्वी और बलवान होता है। वह अपमृत्यु को पार करके लम्बी आयु को प्राप्त करता है। जिसे प्राणायाम में पसीना होता है, उसका प्राणायाम अधम है। जिस प्राणायाम से शरीर में कँपकँपी आती है, वह मध्यम प्राणायाम होता है, और जिसका शरीर प्राणायाम से ऊपर उठता है, वह उत्तम प्राणायाम कहा जाता है।

अधमे व्याधिपापानां नाशः स्यान्मध्यमे पुनः।
पापरोगमहाव्याधिनाशः स्यादुत्तमे पुनः ॥106॥
अल्पमूत्रोऽल्पविष्टश्च लघुदेहो मिताशनः।
पट्विन्द्रियः पटुमतिः कालत्रयविदात्मवान् ॥107॥
रेचकं पूरकं मुक्त्वा कुम्भीकरणमेव यः।
करोति त्रिषु कालेषु नैव तस्यास्ति दुर्लभम् ॥108॥
नाभिकन्दे च नासाग्रे पादाङ्गुष्ठे च यत्नवान्।
धारयेन्मनसा प्राणान् सन्ध्याकालेषु वा सदा ॥109॥
सर्वरोगैर्विनिर्मुक्तो जीवेद्योगी गतक्लमः।
कुक्षिरोगविनाशः स्यान्नाभिकन्देषु धारणात् ॥110॥

अधम कोटि के प्राणायाम से आधि-व्याधि और संपूर्ण पाप नष्ट हो जाते हैं। मध्यम कोटि के प्राणायाम से पापों का, महारोगों का और पीड़ाओं का नाश होता है। और उत्तम कोटि के प्राणायाम से तो वह सचेत योगी अल्प मूत्रवाला अल्प बिष्टावाला, लघुदेहवाला, कम खाने वाला, तेजस्वी इन्द्रिय शक्तियों वाला, तेजस्वी बुद्धिवाला तथा तीनों काल को जानने वाला हो जाता है। जो योगी रेचक और पूरक को छोड़कर केवल कुम्भक को ही करने के लिए तत्पर रहता है, उसके लिए तीनों काल में कुछ भी दुर्लभ नहीं होता। योग में सतत प्रयत्नशील योगी को सन्ध्यावन्दन के समय में नाभिकन्द में (मूल में), नासिका के अग्रभाग में तथा दोनों पैरों के अँगूठों में अपने मन से प्राणतत्त्व की धारणा करनी चाहिए। इस प्रकार की धारणा करने से योगी सभी रोगों से मुक्त होकर आनन्दपूर्वक जीवन गुजारता है। नाभिकन्द में प्राणों को धारण करने से कुक्षि (पेट) के सभी रोग नष्ट हो जाते हैं।

नासाग्रे धारणाद्दीर्घमायुः स्याद्देहलाघवम् ।
ब्राह्मे मुहूर्ते सम्प्राप्ते वायुमाकृष्य जिह्वया ॥111॥
पिबतस्त्रिषु मासेषु वाक्सिद्धिर्महती भवेत् ।
अभ्यासतश्च षण्मासान्महारोगविनाशनम् ॥112॥
यत्र यत्र धृतो वायुरङ्गे रोगादिदूषिते ।
धारणादेव मरुतस्तत्तदारोग्यमश्नुते ॥113॥
मनसो धारणादेव पवनो धारितो भवेत् ।
मनसः स्थापने हेतुरुच्यते द्विजपुङ्गव ॥114॥

नासिका के अग्रभाग में प्राण को धारण करने से लम्बी आयु और देह का लाघव होता है। ब्राह्ममुहूर्त में जीभ से वायु को भीतर खींचकर तीन महीनों तक पीने से वाणी की महान् सिद्ध प्राप्त होती है और छः मास के ऐसे अभ्यास से महारोग भी नष्ट हो जाते हैं। रोग आदि से दूषित शरीर में जहाँ-जहाँ वायु धारण किया जाता है, वहाँ वायु के धारण से ही उस-उस रोग का नाश हो जाता है। हे द्विजश्रेष्ठ ! मन की धारणा से ही वायु की धारणा उत्पन्न होने लगती है। मन को स्थापन (एकाग्र) करने के लिए प्राण की साधना (प्राणायाम का परिशीलन) अनिवार्य हेतु (कारण) कहा गया है।

करणानि समाहृत्य विषयेभ्यः समाहितः ।
अपानमूर्ध्वमाकृष्येदुदरोपरि धारयेत् ॥115॥
बध्नन्कराभ्यां श्रोत्रादिकरणानि यथातथम् ।
युञ्जानस्य यथोक्तेन वर्त्मना स्ववशं मनः ॥116॥

इन्द्रियों को विषयों से हटाकर, सावधान होकर, अपानवायु को ऊर्ध्व में अर्थात् पेट के ऊपर धारण करना चाहिए और दोनों हाथों की अँगुलियों से दोनों कानों को बन्द कर लेना चाहिए। इस क्रिया से मन को वश में लाया जा सकता है। (इसको षण्मुखी मुद्रा कहा जाता है। इसमें दोनों हाथों की अँगुलियों से आँख, कान, नाक, मुख आदि छिद्रों को बन्द करके मन को वश में लाने का प्रयत्न किया जाता है)।

मनोवशात्प्राणवायुः स्ववशे स्थाप्यते सदा ।
नासिकापुटयोः प्राणः पर्यायेण प्रवर्तते ॥117॥
तिस्रश्च नाडिकास्तासु स यावन्तं चरत्ययम् ।
शङ्खिनीविवरे याम्ये प्राणः प्राणभृतां सताम् ॥118॥
तावन्तं च पुनः कालं सौम्ये चरति सन्ततम् ।
इत्थं क्रमेण चरता वायुना वायुजिन्नरः ॥119॥
अहश्च रात्रिश्च पक्षं च मासमृत्वयनादिकम् ।
अन्तर्मुखो विजानीयात्कालभेदं समाहितः ॥120॥

इस प्रकार मनोजय प्राप्त कर लेने के बाद, प्राणवायु नियमित हो जाता है अर्थात् सदैव अपने वश में आ जाता है और दोनों नथुनों से उसका आना-जाना व्यवस्थित रूप में होने लगता है। इडा आदि तीन नाडियाँ हैं। इन इडादि तीन नाडियों में जितने काल तक यह प्राणियों का प्राणवायु याम्य में (शंखिनीविवर में अर्थात् पिंगला नाम से प्रख्यात दाहिने नथुने में) घूमता है उतने ही काल तक योगियों के सौम्य में (सुषुम्ना में) सतत घूमा करता है। इस तरह जिस योगी का प्राण समान समय में

दोनों में घूमता है इससे वह 'वायुजित्' (वायु को जीतने वाला) हो जाता है और वह दिवस, रात, पक्ष, मास, ऋतु, अयन आदि के कालभेद को अन्तर्मुखी होकर सावधानतया पहचान लेता है।

अङ्गुष्ठादिस्वावयवस्फुरणादर्शनैरपि ।
अरिष्टैर्जीवितस्यापि जानीयात्क्षयमात्मनः ॥121॥
ज्ञात्वा यतेत कैवल्यप्राप्तये योगवित्तमः ।
पादाङ्गुष्ठे कराङ्गुष्ठे स्फुरणं यस्य न श्रुतिः ॥122॥
तस्य संवत्सरादूर्ध्वं जीवितस्य क्षयो भवेत् ।
मणिबन्धे तथा गुल्फे स्फुरणं यस्य नश्यति ॥123॥
षण्मासावधिरेतस्य जीवितस्य स्थितिर्भवेत् ।
कूर्परे स्फुरणं यस्य तस्य त्रैमासिकी स्थितिः ॥124॥

अपने अंगुष्ठ आदि अंगों का फड़कना रुक जाने पर अपने जीवन की समाप्ति जल्द से जल्द समझ लेनी चाहिए। उन अरिष्टों को जानकर श्रेष्ठ योगी को कैवल्य की प्राप्ति के लिए प्रयत्न करना चाहिए। जिसके पैरों के और हाथों के अंगुष्ठों में धडकन (स्फुरण) बन्द हो जाए तो उसका एक वर्ष के बाद जीवन का अन्त होगा, ऐसा जानना चाहिए। जिसके मणिबन्ध में (कलाई में) और गुल्फ में (टखने में) स्फुरण नष्ट हो जाए तो उसके जीवन की अवधि छः मास की होगी, ऐसा समझना चाहिए। और जिसकी कोहनी में स्फुरण बन्द हो जाए उसका जीवन तीन मास ही रहेगा, ऐसा समझना चाहिए।

कुक्षिमेहनपार्श्वे च स्फुरणानुपलम्भने ।
मासावधिर्जीवितस्य तदर्धस्य तु दर्शने ॥125॥
आश्रिते जठरद्वारे दिनानि दश जीवितम् ।
ज्योतिः खद्योतवद्यस्य तदर्धं तस्य जीवितम् ॥126॥
जिह्वाग्रादर्शने त्रीणि दिनानि स्थितिरात्मनः ।
ज्वालाया दर्शने मृत्युर्द्विदिने भवति ध्रुवम् ॥127॥
एवमादीन्यरिष्टानि दृष्टायुःक्षयकारणम् ।
निःश्रेयसाय युञ्जीत जपध्यानपरायणः ॥128॥

कुक्षि, उपस्थ और पार्श्व भाग में स्फुरण न हो तो केवल एक मास तक जीवन रहेगा और आँख में स्फुरण के अभाव में सिर्फ पंद्रह दिन तक जीवन रह सकता है। जठर के मुँह पर यदि स्फुरण नहीं होता, तो जीवन दस दिन तक रहता है और सूर्य-चन्द्र की ज्योति जब पतंगे की भाँति दिखाई दे, तब पाँच दिन ही जीवन टिक सकता है। जीभ के अग्र भाग में यदि स्फुरण का अभाव हो, तब आत्मा की स्थिति तीन दिन तक रहती है और यदि ज्वाला का दर्शन होने लगे, तब दो ही दिनों में मृत्यु अवश्य आ जाती है। ये सब अरिष्ट (अनिष्टकारक तत्त्व) आयु को क्षीण करने के कारणरूप हैं। इन सभी को जानने वाले साधक को अर्थात् अपनी आयु को पहचानने वाले योगी को अपने कल्याण के लिए स्वयं को जप, तप, ध्यानपरायण होकर कल्याण में प्रवृत्त होना चाहिए।

मनसा परमात्मानं ध्यात्वा तद्रूपतामियात् ।
यद्यष्टादशभेदेषु मर्मस्थानेषु धारणम् ॥129॥
स्थानात्स्थानं समाकृष्य प्रत्याहारः स उच्यते ।
पादाङ्गुष्ठं तथा गुल्फं जङ्घामध्यं तथैव च ॥130॥

मध्यमूर्वोश्च मूलं च पायुर्हृदयमेव च।
मेहनं देहमध्यं च नाभिं च गलकूर्परम् ॥131॥
तालुमूलं च मूलं च घ्राणस्याक्ष्णोश्च मण्डलम्।
भ्रुवोर्मध्यं ललाटं च मूलमूर्ध्वं च जानुनी ॥132॥
मूलं च करयोर्मूलं महान्त्येतानि वै द्विज।
पञ्चभूतमये देहे भूतेष्वेतेषु पञ्चसु ॥133॥

मन के द्वारा परमात्मा का ध्यान करके तद्रूप बनने का प्रयत्न करना चाहिए। उसकी चेतना को शरीर के अठारहों मर्मस्थानों में धारण करना चाहिए। एक स्थान से दूसरे स्थान में खींचने की प्रक्रिया को प्रत्याहार कहा जाता है। पूर्वोक्त अठारह मर्मस्थान ये हैं—पैर का अँगूठा, एड़ी, जाँघ का मध्यभाग, ऊरु का मध्यभाग, गुदा का मध्यभाग, हृदय, उपस्थ, देह का मध्यभाग, नाभि, गला, कोहनी, तालु का मूल, नासिका का मूल, नेत्रमण्डल, भौंहों के बीच का भाग, ललाट, मस्तक का मूल भाग, दोनों घुटने तथा हाथों का मूलभाग—ये सभी स्थल, हे द्विज! पाँचों भूतों से युक्त इस पाँचभौतिक शरीर में महान् (मर्मस्थान) कहे जाते हैं।

मनसो धारणं यत्तद्युक्तस्य च यमादिभिः।
धारणा सा च संसारसागरोत्तारकारणम् ॥134॥
आजानुपादपर्यन्तं पृथिवीस्थानमिष्यते।
पित्तला चतुरस्रा च वसुधा वज्रलाञ्छिता ॥135॥
स्मर्तव्या पञ्चघटिकास्तत्रारोप्य प्रभञ्जनम्।
आजानुकटिपर्यन्तमपां स्थानं प्रकीर्तितम् ॥136॥
अर्धचन्द्रसमाकारं श्वेतमर्जुनलाञ्छितम्।
स्मर्तव्यमम्भःश्वसनमारोप्य दशनाडिकाः ॥137॥

यम आदि से युक्त मन की एकाग्रता को ही धारणा कहा जाता है। ऐसी धारणा संसाररूपी सागर को पार करने का कारण मानी जाती है। घुटनों से लेकर पैरों तक का स्थान पृथ्वीस्थान माना जाता है। पीले रंग की और चार कोणों से युक्त पृथ्वी वज्र से जड़ी हुई है। उस पृथ्वी में वायु को रोककर उसका पाँच घटिकापर्यन्त (दो घण्टों तक) स्मरण (चिन्तन) करना चाहिए। अब घुटने से लेकर ऊपर का कमर तक का भाग जल का स्थान माना जाता है। वह अर्धचन्द्रकार है, और श्वेतवर्ण का है तथा चाँदी से जड़ा हुआ है। उसका भी श्वास को रोककर (उसी में तन्मय होकर) दश घटिका तक (चार घण्टों तक) चिन्तन करना चाहिए।

आदेहमध्यकट्यन्तमग्निस्थानमुदाहृतम्।
तत्र सिन्दूरवर्णोऽग्निर्ज्वलनं दश पञ्च च ॥138॥
स्मर्तव्या नाडिकाः प्राणं कृत्वा कुम्भे तथेरितम्।
नाभेरुपरि नासान्तं वायुस्थानं तु तत्र वै ॥139॥
वेदिकाकारवद् धूम्रो बलवान्भूतमारुतः।
स्मर्तव्यः कुम्भकेनैव प्राणमारोप्य मारुतम् ॥140॥
घटिकाविंशतिस्तस्माद् घ्राणाद् ब्रह्मबिलावधि।
व्योमस्थानं नभस्तत्र भिन्नाञ्जनसमप्रभम् ॥141॥

शरीर में कटि प्रदेश के मध्य का भाग अग्नि का स्थान कहा गया है। वहाँ सिन्दूरवर्णी अग्नि ज्वालारूप है। उसका पंद्रह घटिका (छः घण्टे) तक प्राण को कुंभक में रोककर चिन्तन करना चाहिए। नाभि से लेकर तक नासिका तक वायु का स्थान है। उसका आकार वेदी के मुख जैसा होता है। धूम्र जैसा उसका स्वरूप होता है जो कि बड़ा शक्तिशाली होता है। वहाँ प्राणवायु को कुम्भक के द्वारा रोककर उसका बीस घटिका तक (आठ घण्टे तक) चिन्तन करना चाहिए। और नासिका से ब्रह्मरन्ध्र तक का स्थान आकाशतत्त्व का कहा गया है। इसकी आभा नीले रंग की कही गई है।

व्योम्नि मारुतमारोप्य कुम्भकेनैव यत्नवान्।
पृथिव्यंशे तु देहस्य चतुर्बाहुं किरीटिनम् ॥142॥
अनिरुद्धं हरिं योगी यतेत भवमुक्तये।
अबंशे पूरयेद्योगी नारायणमुदग्रधीः ॥143॥
प्रद्युम्नमग्नौ वाय्वंशे सङ्कर्षणमतः परम्।
व्योमांशे परमात्मानं वासुदेवं सदा स्मरेत् ॥144॥

प्रयत्नशील योगी कुंभक के द्वारा ही आकाश के क्षेत्र में आरोपण करता है और बाद में देह के पृथ्वी क्षेत्र के भाग में चतुर्भुज, मुकुटधारी, अनिरुद्ध हरि का चिन्तन करता है (करना चाहिए)। यह संसार से मुक्त होने के लिए किया जाता है। फिर देह के जल क्षेत्र वाले भाग में तेजस्वी बुद्धिवाला वह योगी नारायण का चिन्तन करता है और अग्निवाले स्थान में प्रद्युम्न का चिन्तन करता है। बाद में उस योगी को वायु के क्षेत्र में संकर्षण का और आकाश वाले अंश में वासुदेव का चिन्तन निरन्तर करते ही रहना चाहिए।

अचिरादेव तत्प्राप्तिर्युञ्जानस्य न संशयः।
बद्ध्वा योगासनं पूर्वं हृद्देशे हृदयाञ्जलिः ॥145॥
नासाग्रन्यस्तनयनो जिह्वां कृत्वा च तालुनि।
दन्तैर्दन्तानसंस्पृश्य ऊर्ध्वकायः समाहितः ॥146॥
संयमेच्चेन्द्रियग्राममात्मबुद्ध्या विशुद्धया।
चिन्तनं वासुदेवस्य परस्य परमात्मनः ॥147॥

जो साधक योगी ऐसे अभ्यास को नियमपूर्वक निरन्तर किया करता है, वह जल्द से जल्द परब्रह्म परमात्मा वासुदेव की प्राप्ति कर लेता है, इसमें कोई शंका नहीं है। सबसे पहले तो योगासन लगाकर हृदय प्रदेश में हृदयरूपी अंजलियुक्त होकर, नाक के अग्र भाग में नेत्रों को (दृष्टि को) रखते हुए, जीभ को तालुस्थान में लगाकर, दाँतों को दाँतों से स्पर्श नहीं करना चाहिए। शरीर को सीधा एवं स्थिर रखकर, सावधान होकर, इन्द्रियों का संयम करना चाहिए और बाद में परब्रह्म वासुदेव का अपनी निर्मल बुद्धि से चिन्तन करना चाहिए।

स्वरूपव्याप्तरूपस्य ध्यानं कैवल्यसिद्धिदम्।
य ममात्रं वासुदेवं चिन्तयेत्कुम्भकेन यः ॥148॥
र [illegible] जन्मार्जितं पापं तस्य नश्यति योगिनः।
नाभिकन्दात्समारभ्य यावद्धृदयगोचरम् ॥149॥
जाग्रद्वृत्तिं विजानीयात्कण्ठस्थं स्वप्नवर्तनम्।
सुषुप्तं तालुमध्यस्थं तुर्यं भ्रूमध्यसंस्थितम् ॥150॥

अपने स्वरूप से व्याप्त रूपवाले परमात्मा का ध्यान कैवल्य की सिद्धि कराने वाला है। जो साधक कुम्भक के द्वारा एक प्रहरमात्र भी वासुदेव का चिन्तन करता है, उस योगी के सात जन्मों में किए हुए पापों का नाश हो जाता है। नाभिकेन्द्र से लेकर हृदय तक का क्षेत्र जाग्रदवस्था का क्षेत्र है, ऐसा जानना चाहिए। स्वप्नावस्था का केन्द्र कण्ठ है और सुषुप्तावस्था का केन्द्र तालुस्थान है और तुर्य का क्षेत्र भौहों के मध्यस्थान का क्षेत्र माना गया है।

तुर्यातीतं परंब्रह्म ब्रह्मरन्ध्रे तु लक्षयेत्।
जाग्रद्वृत्तिं समारभ्य यावद् ब्रह्मबिलान्तरम् ॥151॥
तत्रात्मायं तुरीयस्य तुर्यान्ते विष्णुरुच्यते।
ध्यानेनैव समायुक्तो व्योम्नि चात्यन्तनिर्मले ॥152॥
सूर्यकोटिद्युतिधरं नित्योदितमधोक्षजम्।
हृदयाम्बुरुहासीनं ध्यायेद्वा विष्णुरूपिणम् ॥153॥

तुर्यातीत परब्रह्म का क्षेत्र ब्रह्मरन्ध्र में परब्रह्म को लक्ष्य करके अवस्थित है। जाग्रदवस्था से शुरू होकर ब्रह्मरन्ध्र तक तुर्यात्मा का तत्त्व प्रतिष्ठित रहता है। और उसके अन्त में वह विष्णु कहा गया है। इसके बाद साधक योगी को चाहिए कि वह ध्यान में परायण होकर अत्यन्त निर्मल आकाश में (हृदयरूपी आकाश में) करोड़ों सूर्य जैसे तेज को धारण किए हुए, हृदयरूपी कमल पर बैठे हुए, विश्वरूपधारी, नित्योदित भगवान् विष्णु का निरन्तर चिन्तन-मनन करता रहे।

अनेकाकारखचितमनेकवदनान्वितम्।
अनेकभुजसंयुक्तमनेकायुधमण्डितम् ॥154॥
नानावर्णधरं देवं शान्तमुग्रमुदायुधम्।
अनेकनयनाकीर्णं सूर्यकोटिसमप्रभम् ॥155॥
ध्यायतो योगिनः सर्वमनोवृत्तिर्विनश्यति।
हृत्पुण्डरीकमध्यस्थं चैतन्यज्योतिरव्ययम् ॥156॥
कदम्बगोलकाकारं तुर्यातीतं परात्परम्।
अनन्तमानन्दमयं चिन्मयं भास्करं विभुम् ॥157॥
निवातदीपसदृशमकृत्रिममणिप्रभम्।
ध्यायतो योगिनस्तस्य मुक्तिः करतले स्थिता ॥158॥

ऐसे अनेक आकार-प्रकारवाले, अनेक मुखों वाले, अनेक हाथों वाले, अनेक आयुध धारण किए हुए, विविध वर्ण धारण करने वाले, देवस्वरूप, शान्त, अस्त्र धारण किये हुए, असंख्य आँखों वाले, करोड़ों-करोडों सूर्यों की आभावाले, विश्वस्वरूप भगवान् विष्णु का चिन्तन-मनन करने से योगी की सभी मनोवृत्तियाँ समाप्त हो जाती हैं। हृदयरूपी कमल के मध्य प्रदेश में स्थित चैतन्यरूप ज्योतिर्मय, अव्यय (शाश्वत), कदम्ब के समान गोलाकार, तुर्यातीत, परे से भी परे, अनन्त, आनन्दमय, चैतन्यमय, व्यापक प्रकाशरूप, वायुरहित स्थान में स्थित दीपक की भाँति अचल, सच्चे मणि के जैसे तेजोमय, तुर्यातीत का ध्यान करने से मुक्ति तो योगी के हाथ में ही रहती है।

विश्वरूपस्य देवस्य रूपं यत्किञ्चिदेव हि।
स्थवीयः सूक्ष्ममन्यद्वा पश्यन्हृदयपङ्कजे ॥159॥
ध्यायतो योगिनो यस्तु साक्षादेव प्रकाशते।
अणिमादिफलं चैव सुखेनैवोपजायते ॥160॥

जीवात्मनः परस्यापि यद्येवमुभयोरपि ।
अहमेव परंब्रह्म ब्रह्माहमिति संस्थितिः ॥161॥
समाधिः स तु विज्ञेयः सर्ववृत्तिविवर्जितः ।
ब्रह्म सम्पद्यते योगी न भूयः संसृतिं व्रजेत् ॥162॥

इस विश्वरूप देव का जो कोई भी स्थूल, सूक्ष्म अथवा और कोई भी रूप है, उसका अपने हृदयरूपी कमल में ध्यान करते हुए योगी के सामने साक्षात् वह उस रूप में प्रकट होता है । अथवा ध्यान करने वाला योगी ही स्वयं ध्येय के रूपवाला हो जाता है । उस योगी को बिना किसी परिश्रम के (सुखपूर्वक) अणिमा, लघिमा आदि का फल प्राप्त हो जाता है । जीवात्मा तथा परमात्मा—दोनों के पारमार्थिक स्वरूप का ज्ञान हो जाने से जब 'मैं ही परब्रह्म हूँ'—ऐसी अवस्था आ जाती है, उसे ही 'समाधि' कहा जाता है । समाधि में मन की सभी वृत्तियाँ नष्ट हो जाती हैं । ऐसा समाधिप्राप्त योगी ब्रह्म को प्राप्त करता है और वह फिर कभी इस नश्वर जगत् में नहीं आता है ।

एवं विशोध्य तत्त्वानि योगी निःस्पृहचेतसा ।
यथा निरिन्धनो वह्निः स्वयमेव प्रशाम्यति ॥163॥
ग्राह्याभावे मनःप्राणो निश्चयज्ञानसंयुतः ।
शुद्धसत्त्वे परे लीनो जीवः सैन्धवपिण्डवत् ॥164॥
मोहजालकसङ्घातं विश्वं पश्यति स्वप्नवत् ।
सुषुप्तिवद्यश्चरति स्वभावपरिनिश्चलः ।
निर्वाणपदमाश्रित्य योगी कैवल्यमश्नुतः ॥165॥ इत्युपनिषत् ।

इति त्रिशिखिब्राह्मणोपनिषत्समाप्ता ।

वह साधक योगी इस तरह से योगतत्त्वों का शोधन करके स्पृहारहित मन से ईंधनरहित अग्नि की तरह स्वयं ही शान्त हो जाता है । तब ऐसे योगी के लिए कुछ भी स्वीकार्य नहीं होता अर्थात् उसके लिए कोई ग्राह्य वस्तु नहीं होती, क्योंकि तब उसके मन और प्राण निश्चयात्मक – पारमार्थिक ज्ञान से युक्त हो जाते हैं और उसका जीवात्मा परमशुद्ध तत्त्व में (ब्रह्म में) जल में नमक के पिण्ड की भाँति विलीन हो जाता है । उस योगी को यह मोह के जाल जैसा विश्व स्वप्न की तरह ही दीखता है और वह संपूर्णतः अचल (स्थिर) होकर सहजभाव से सुषुप्ति जैसी अवस्था में रहने लगता है । ऐसा उत्तम योगी (साधक) निर्वाणपद पर आसीन होकर कैवल्यावस्था को प्राप्त होता है ।

यहाँ त्रिशिखिब्राह्मणोपनिषद् पूरी हुई ।

शान्तिपाठः

ॐ पूर्णमदः पूर्णमिदं .... पूर्णमेवावशिष्यते । (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

(46) सीतोपनिषत्

(उपनिषत्परिचय)

यह अथर्ववेदीय उपनिषद् है। इसमें कहा गया है कि सीता ही मूल प्रकृति है। श्रीराम के समीप रहकर वह जगत् को आनन्द देने वाली है। वही मूल प्रकृति इस जगत् की उत्पत्ति, स्थिति और विनाश का मूल कारण है। इसी को महामाया कहा जाता है। इच्छाशक्ति, क्रियाशक्ति तथा आद्याशक्ति भी यही है। लक्ष्मीस्वरूप भी वही है, पृथ्वीस्वरूप भी वही है, वही भगवान् की साक्षात् शक्ति है। इस तरह सीता का मूल प्रकृतित्व, अक्षरार्थ, व्यक्ताव्यक्तस्वरूप, ब्रह्मरूपत्व, शक्तित्रयत्व आदि बताया गया है।

शान्तिपाठः

ॐ भद्रं कर्णेभिः......देवहितं यदायुः। (पूर्ववत्)

ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (अथर्वशिर उपनिषद् में) द्रष्टव्य है।

देवा ह वै प्रजापतिमब्रुवन्का सीता किं रूपमिति ॥1॥

स होवाच प्रजापतिः सा सीतेति।

मूलप्रकृतिरूपत्वात्सा सीता प्रकृतिः स्मृता।

प्रणवप्रकृतिरूपत्वात्सा सीता प्रकृतिरुच्यते ॥2॥

एक समय देवताओं ने प्रजापति से पूछा—'सीता का स्वरूप क्या है ?' सीता कौन है ?' तब प्रजापति ने कहा—वह सीता तो मूल प्रकृति है इसलिए वह जगत् का मूल कारण है। जो मूलप्रकृतित्व से प्रणव कहा गया है, उसी रूप की होने से सीता को प्रकृति कहा गया है।

सीता इति त्रिवर्णात्मा साक्षान्मायामयी भवेत्।

विष्णुः प्रपञ्चबीजं च मया ईकार उच्यते ॥3॥

सकारः सत्यममृतं प्राप्तिः सोमश्च कीर्त्यते।

तकारस्तारलक्ष्म्या च वैराजः प्रस्तरः स्मृतः ॥4॥

त्रिवर्णात्मक यह 'सीता' नाम साक्षात् योगमाया का स्वरूप है। भगवान् विष्णु सम्पूर्ण जगत् (प्रपंच) के बीजस्वरूप हैं, तो भगवान् विष्णु की माया 'ई'कारस्वरूप है। इसमें जो 'स'कार है, वह सत्य, अमृत, प्राप्ति और चन्द्र का वाचक है। और इसमें जो दीर्घ आकारमात्रा सहित 'त'कार है, उसे महालक्ष्मी का फैलने वाला प्रकाशमय रूप कहा गया है।

ईकाररूपिणी सोमाऽमृतावयवदिव्यालङ्कारस्रङ्मौक्तिकाद्याभरणालङ्कृता महामायाऽव्यक्तरूपिणी व्यक्ता भवति ॥5॥

प्रथमा शब्दब्रह्ममयी स्वाध्यायकाले प्रसन्ना। उद्भावनकरी सात्मिका

द्वितीया भूतले हलाग्रे समुत्पन्ना। तृतीया ईकाररूपिणी अव्यक्तस्वरूपां भवतीति सीतेत्युदाहरन्ति शौनकीये ॥6॥

'ई'काररूपिणी सीताजी यों तो अव्यक्त महामाया है, फिर भी श्रीराम के संकल्पवश सोम जैसी प्रियदर्शना वह अपने अमृतसमान अवयवों और माला – मोती आदि दिव्य आभूषणों से अलंकृत होकर व्यक्तरूप धारण करती है। महामाया भगवती सीताजी के तीन स्वरूप हैं—पहले शब्दब्रह्ममयी होकर स्वाध्याय-स्वरूप बुद्धि के रूप में प्रकट होती है। दूसरे रूप में वह महाराज जनक के यहाँ हल के अग्र भाग से उत्पन्न हुई। वह यों तो भगवद्भाव को प्राप्त हुए लोगों के हृदय में निरावृत्त सुखरूप से सदैव उद्भूत हैं ही। और तीसरे ईकार के रूप में वे अव्यक्त रहती हैं। शौनकीय तंत्र में सीता के ये ही तीन रूप बताए गए हैं।

श्रीरामसान्निध्यवशांज्जगदानन्दकारिणी।
उत्पत्तिस्थितिसंहारकारिणी सर्वदेहिनाम् ॥7॥
सीता भगवती ज्ञेया मूलप्रकृतिसंज्ञिता।
प्रणवत्वात्प्रकृतिरिति वदन्ति ब्रह्मवादिन इति ॥8॥
अथातो ब्रह्मजिज्ञासेति च ॥9॥

श्री सीताजी को राम का नित्य सान्निध्य प्राप्त है, इसलिए वे जगत् को आनन्द देने वाली हैं। वे सभी प्राणियों की उत्पत्ति, स्थिति और प्रलय करने वाली हैं। भगवती सीता को मूल प्रकृतिरूप जानना चाहिए। उनके प्रणवस्वरूप होने के कारण ब्रह्मवादी लोग उन्हें प्रकृति कहते हैं। ब्रह्मसूत्रों के 'अथातो ब्रह्मजिज्ञासा' इस सूत्र में उन्हीं के व्यक्त तथा अव्यक्त स्वरूपों का प्रतिपादन किया गया है।

सा सर्ववेदमयी सर्वदेवमयी सर्वलोकमयी सर्वकीर्तिमयी सर्वधर्ममयी सर्वाधारकार्यकारणमयी महालक्ष्मीर्देवेशस्य भिन्नाभिन्नरूपा चेतनाचेतनात्मिका ब्रह्मस्थावरात्मा तद्गुणकर्मविभागभेदाच्छरीररूपा देवर्षिमनुष्यगन्धर्वरूपा असुरराक्षसभूतप्रेतपिशाचभूतादिभूतशरीररूपाभूतेन्द्रियमनः प्राणरूपेति च विज्ञायते ॥10॥

वह सीताजी सभी वेदों का स्वरूप हैं, सभी देवों का भी स्वरूप हैं, वह सर्वलोकों में व्याप्त हैं, सर्वधर्मस्वरूप हैं, वह यशस्विनी सभी का आधार हैं, सभी कार्य और कारण रूप हैं, वह महालक्ष्मी, महानारायण भगवान् से भिन्न होते हुए भी अभिन्न हैं। चेतन और अचेतन—दोनों उन्हीं (सीताजी) के रूप में हैं। ब्रह्मा से लेकर स्थावरपर्यन्त वह व्याप्त हैं। सभी प्राणियों के गुण और कर्मों के विभाग के भेद से सर्वशरीरस्वरूपा वह मनुष्य, देव, ऋषि और गन्धर्वों की स्वरूपभूत हैं तथा असुर, राक्षस, भूत, प्रेत, पिशाच और भूतादि की शरीररूपिणी हैं। इन पाँच भूतों, इन्द्रियों, मन तथा प्राण के स्वरूपवाली भी जानी जाती है।

सा देवी त्रिविधा भवति शक्त्यासना इच्छाशक्तिः क्रियाशक्तिः साक्षाच्छक्तिरिति ॥11॥
इच्छाशक्तिस्त्रिविधा भवति। श्रीभूमिनीलात्मिका भद्ररूपिणी प्रभावरूपिणी सोमसूर्याग्निरूपा भवति ॥12॥
सोमात्मिका ओषधीनां प्रभवति कल्पवृक्षपुष्पफललतागुल्मात्मिका

औषधभेषजात्मिका अमृतरूपा देवानां महस्तोमफलप्रदा अमृतेन तृप्तिं जनयन्ती देवानामन्नेन पशूनां तृणेन तत्तज्जीवानाम् ॥13॥

वह शक्तिस्वरूपा देवी एक होते हुए भी परिच्छिन्न दृष्टिवालों के लिए तीन रूपवाली हैं—इच्छाशक्ति, क्रियाशक्ति और ज्ञानशक्ति। इनमें इच्छाशक्ति तीन प्रकार की होती है—श्री, भू और नीला। इन तीनों रूपों को धारण करके वह देवी अपने प्रभाव से सभी का कल्याण करने वाली है और चन्द्र, सूर्य और अग्नि का रूप धारण करती हैं। चन्द्रस्वरूपिणी होकर वे औषधियों का पोषण करती हैं। कल्पवृक्ष, फल, मूल, लता, पौधेरूपी औषधियों एवं अमृतरूप अन्य औषधियों का रूप भी उन्हींने धारण किया हुआ है। वह देवी उसी चन्द्र के रूप में देवताओं को 'महास्तोम' यज्ञ का फल देती हैं। अमृत, अन्न और तृग (घास) के द्वारा क्रमशः देवता, मानव और अन्य जीवों को तृप्त करती है।

सूर्यादिसकलभुवनप्रकाशिनी दिवा च रात्रिः कालकलानिमेषमारभ्य घटिकाष्टयामदिवस(वार)रात्रिभेदेन पक्षमासर्त्वयनसंवत्सरभेदेन मनुष्याणां शतायुःकल्पनया प्रकाशमाना चिरक्षिप्रव्यपदेशेन निमेषमारभ्य परार्धपर्यन्तं कालचक्रं जगच्चक्रमित्यादिप्रकारेण चक्रवत्परिवर्तमानाः सर्वस्यैतस्यैव कालस्य विभागविशेषाः प्रकाशरूपाः कालरूपा भवन्ति ॥14॥

वे सीताजी सूर्य आदि सकल भुवनों को भी प्रकाशित करने वाली हैं। वही देवी निमेष, घड़ी, आठ प्रहरवाले दिन-रात्रि, मास, पक्ष, ऋतु, अयन, संवत्सर आदि काल की कलाओं के भेद से मनुष्य की शत वर्षों की आयुष्य की कल्पना को पूरा करती हुई प्रकाशमान होती है। शीघ्र और विलम्ब के भेद से, निमिष से लेकर परार्ध तक के कालचक्र को ही संसार कहा जाता है। उसके सभी अंगप्रत्यंग विशेषरूप से प्रकाशमान और कालरूप इसलिए ही हैं कि ये सब चक्र की तरह परिवर्तनशील जो काल है, वही सीताजी का रूप है, और उसी कालरूप सीताजी के ही रूप हैं।

अग्निरूपा अन्नपानादिप्राणिनां क्षुत्तृष्णात्मिका देवानां मुखरूपा वनौषधीनां शीतोष्णरूपा काष्ठेष्वन्तर्बहिश्च नित्यानित्यरूपा भवति ॥15॥
श्रीदेवी त्रिविधं रूपं कृत्वा भगवत्सङ्कल्पानुगुण्येन लोकरक्षणार्थं रूपं धारयति। श्रीरिति लक्ष्मीरिति लक्ष्यमाणा भवतीति विज्ञायते ॥16॥

वह देवी प्राणियों के भीतर अग्नि के रूप में अवस्थित होकर अन्न-जल के खाने-पीने के लिए भूख और प्यास के रूप में उपस्थित रहती है। वही अग्निस्वरूपिणी देवी देवताओं के मुख के रूप में भी विद्यमान होती है और वही देवी वनौषधियों के लिए शीतोष्णरूप होती है तथा काष्ठों के लिए भीतर-बाहर नित्यानित्यस्वरूप बनती है। वे सीताजी श्रीदेवी के तीन रूप धारण करती हैं, और भगवान् के संकल्पानुसार सर्व लोगों का रक्षण करने के लिए महालक्ष्मी के रूप में प्रकट होती हैं, और श्री, लक्ष्मी आदि के द्वारा लक्षित होती हैं, ऐसा जाना जाता है।

भूदेवी ससागराम्भः सप्तद्वीपा वसुन्धरा भूरादिचतुर्दशभुवनानामाधाराधेया प्रणवात्मिका भवति ॥17॥
नीला च मुखविद्युन्मालिनी सर्वौषधीनां सर्वप्राणिनां पोषणार्थं सर्वरूपा भवति ॥18॥

प्रणवात्मिका माता सीता सात द्वीपों वाली, सागरों से युक्त, पृथ्वी के रूप में प्रकट होती हैं, उसे भूदेवी कहा जाता है। वह देवी पृथिव्यादि चौदहों भुवनों को आश्रय देने वाली हैं। वह आधार होने पर भी आधेय के रूप में प्रकट होती हैं। और विद्युन्माता के समान मुखवाली होकर सब औषधियों और प्राणियों के पोषण के लिए जब सर्वरूप होकर प्रकट होती है, तब वह नीला कही जाती हैं।

समस्तभुवनस्याधोभागे जलाकारात्मिका मण्डूकमयेति भुवनाधारेति विज्ञायते ॥19॥
क्रियाशक्तिस्वरूपं हरेर्मुखान्नादः। तन्नादाद्बिन्दुः। बिन्दोरोङ्कारः। ओङ्कारात्परतो रामवैखानसपर्वतः। तत्पर्वते कर्मज्ञानमयीभिर्बहुशाखा भवन्ति ॥20॥

जो देवी सभी भुवनों के नीचे के भाग में जलरूप मण्डूकमया होकर सभी भुवनों को आश्रय (आधार) देती है, वह भुवनाधारा भी आद्याशक्ति सीताजी ही हैं, ऐसा जाना जाता है। परमात्मा की क्रियाशक्तिरूप सीताजी का स्वरूप पहले भगवान् श्रीहरि के मुख से नाद के रूप में प्रकट हुआ। उस नाद से बिन्दु और बिन्दु से ओंकार प्रकट हुआ। ॐकार से परे रामरूपी वैखानस पर्वत है। उस पर्वत में ज्ञान और कर्मरूपी अनेक शाखाएँ आर्द्र हुई हैं।

तत्र त्रयीमयं शास्त्रमाद्यं सर्वार्थदर्शनम्।
ऋग्यजुःसामरूपत्वात्त्रयीति परिकीर्तिता ॥21॥
(हेतुना) कार्यसिद्धेन चतुर्धा परिकीर्तिता।
ऋचो यजूंषि सामानि अथर्वाङ्गिरसस्तथा ॥22॥
चातुर्होत्रप्रधानत्वाल्लिङ्गादित्रितयं त्रयी।
अथर्वाङ्गिरसं रूपं सामऋग्यजुरात्मकम् ॥23॥

उस पर्वत पर त्रयी नाम का एक आदिशास्त्र है, वह सभी अर्थों को प्रकट करने वाला है। ऋक् (पद्य), यजुस् (गद्य) और साम (गीति) रूप होने से त्रयी नाम दिया गया है। उसी वेदत्रयी को कार्य की सिद्धि के लिए (कार्य की सिद्धि की सुविधा के कारण से) चार नामों से अभिहित किया गया है। ये नाम ऋग्वेद, यजुर्वेद, सामवेद और अथर्ववेद हैं। ये चारों यों तो यज्ञप्रधान ही हैं फिर भी अपने स्वरूप के आधार पर उन वेदों की गणना तीन में ही होती है। चौथा जो अथर्वांगिरस वेद है, वह साम, यजुस् और ऋक् का ही स्वरूप है।

तथा दिशन्त्याभिचारसामान्येन पृथक्पृथक्।
एकविंशतिशाखायामृग्वेदः परिकीर्तितः ॥24॥
शतं च नवशाखासु यजुषामेव जन्मनाम्।
साम्नः सहस्रशाखाः स्युः पञ्चशाखा अथर्वणः ॥25॥

आभिचारादिक क्रियाओं की वजह से ही यह पृथक् पृथक् (त्रयी और चतुर्वेद) गणना की गई है। (अब प्रत्येक वेद की शाखाओं की बात करते हैं कि—) ऋग्वेद की इक्कीस शाखाएँ हैं, यजुर्वेद की एक सौ नौ शाखाएँ हैं, सामवेद की एक हजार शाखाएँ हैं, तथा अथर्ववेद की पाँच शाखाएँ कही गई हैं।

वैखानसमतस्तस्मिन्नादौ प्रत्यक्षदर्शनम्।
स्मर्यते मुनिभिर्नित्यं वैखानसमतः परम् ॥26॥

कल्पो व्याकरणं शिक्षा निरुक्तं ज्योतिषं छन्द एतानि षडङ्गानि ॥27॥
उपाङ्गमयनं चैव मीमांसान्यायविस्तरः ।
धर्मज्ञसेवितार्थं च वेदवेदोऽधिकं तथा ॥28॥

वेदों में पहले वैखानसमत को (श्रीराम के मत को) प्रत्यक्षदर्शन माना गया है। इसीलिए सभी ऋषिलोग परमवैखानस श्रीराम का स्मरण करते हैं। ऋषियों ने वेदों को कल्प, व्याकरण, शिक्षा, निरुक्त, ज्योतिष और छन्द—इन छः अंगों वाला तथा अयन (वेदान्त), मीमांसा और न्याय—इन तीन उपांगों वाला माना है। धर्म को जानने वाला मनुष्य वेदों के साथ उसके अंगों तथा उपांगों का अध्ययन करना अधिक अच्छा समझते हैं।

निबन्धाः सर्वशाखा च समयाचारसङ्गतिः ।
धर्मशास्त्रं महर्षीणामन्तःकरणसम्भृतम् ।
इतिहासपुराणाख्यमुपाङ्गं च प्रकीर्तितम् ॥29॥
वास्तुवेदो धनुर्वेदो गान्धर्वश्च तथा मुने ।
आयुर्वेदश्च पञ्चैते उपवेदाः प्रकीर्तिताः ॥30॥
दण्डो नीतिश्च वार्ता च विद्या वायुजयः परः ।
एकविंशतिभेदोऽयं स्वप्रकाशः प्रकीर्तितः ॥31॥

वेद की सभी शाखाओं में समय-समय पर मनुष्य अपने आचरण को शास्त्रसम्मत बनाने के लिए धर्मशास्त्रीय निबन्धों की रचना करते रहे हैं। ऋषियों ने धर्मशास्त्रों – आचार, व्यवहार और प्रायश्चित्तों – को अपने दिव्य ज्ञान से पुष्ट किया है और शास्त्रानुकूल बनाया है। और उन्हीं जैसे ऋषियों के द्वारा इतिहास, पुराण, वास्तुविद्या, धनुर्वेद, गंधर्ववेद और आयुर्वेद—ऐसे पाँच उपवेदों को भी प्रकट किया है। हे मुनि ! इन सभी के साथ ही दण्डनीति, व्यवहार-व्यापार, विद्या और प्राणजय (योगविद्या) का तथा परमतत्त्व में स्थिति आदि जो इक्कीस भेद हैं, वह सब स्वयंप्रकाशित शास्त्र हैं।

वैखानसऋषेः पूर्वं विष्णोर्वाणी समुद्भवेत् ।
त्रयीरूपेण सङ्कल्प्य इत्थं देही विजृम्भते ॥32॥
संख्यारूपेण सङ्कल्प्य वैखानसऋषेः पुरा ।
उदितो यादृशः पूर्वं तादृशं शृणु मेऽखिलम् ।
शश्वद्ब्रह्ममयं रूपं क्रियाशक्तिरुदाहृता ॥33॥

प्राचीन समय में विष्णु की वाणी वैखानस ऋषि के हृदय में वेदत्रयी के रूप में आविर्भूत हुई। वह वाणी वैखानस के संकल्प से जिस संख्यादिरूप में हुई, वह सब सुनो। हरि की जो यह क्रियाशक्ति है, वह साक्षात् ब्रह्मस्वरूपिणी है। (अर्थात् पहले हरिमुख से उदित नाद ही संपूर्ण वेदशास्त्रकृति होकर बाद में ब्रह्मभाव को प्राप्त करके ब्रह्म ही होता है। यहाँ वैखानस का अर्थ विष्णु है। विष्णुमुखोत्पन्न नादवाणी त्रयीरूप से चार वेद और अनेक शाखाओं की संख्या के भेद से विजृंभित=गर्जित प्रसिद्ध है)। वही वेदशास्त्ररूप से विजृंभित वाणी प्रणवरूप से विलीन होती है। बिन्दु नादात्मरूप में, नाद विष्णु के रूप में, विष्णु ब्रह्ममय रूप में जिस गणना से विलीन होते हैं, उसी को क्रियाशक्ति कहा जाता है।

साक्षाच्छक्तिर्भगवतः स्मरणमात्ररूपाविर्भावप्रादुर्भावात्मिका निग्रहानु-ग्रहरूपा शान्तितेजोरूपा व्यक्ताव्यक्तकारणचरणसमग्रावयवमुखवर्ण-

भेदाभेदरूपा भगवत्सहचारिणी अनपायिनी अनवरतसहाश्रयिणी उदितानुदिताकारा निमेषोन्मेषसृष्टिस्थितिसंहारतिरोधानानुग्रहादिसर्व-शक्तिसामर्थ्यात्साक्षाच्छक्तिरिति गीयते ॥34॥

वह क्रियाशक्ति भगवान् की साक्षात् शक्ति है। वह भगवान् के संकल्पमात्र से ही संसार के विविध रूपों का आविर्भाव-तिरोभाव करती है। वह निग्रह (संयम) स्वरूप है और अनुग्रहरूपिणी भी है। वह शान्ति और तेजस्वरूप भी है, वह व्यक्त-अव्यक्त कारणरूप है, चरणादि समस्त अवयवरूप है, वह समस्त मुख और समस्त वर्णों के भेद और अभेद स्वरूपवाली, भगवान् के संकल्प का अनुसरण करने वाली, अविनाशी, सदैव उनका आश्रय करके रहने वाली कथनीय और अकथनीय—दोनों प्रकार के रूपों को धारण करने वाली, निमेष और उन्मेष के साथ इस जगत् की उत्पत्ति, स्थिति और लय, सृष्टि का संहार और सृष्टि का तिरोधान करने वाली, अनुग्रह आदि सभी प्रकार का सामर्थ्य होने से वह क्रियाशक्तिरूपा सीताजी भगवान् की साक्षात् शक्ति कही जाती हैं।

इच्छाशक्तिस्त्रिविधा प्रलयावस्थायां विश्रमणार्थं भगवतो दक्षिणवक्षः-स्थले श्रीवत्साकृतिर्भूत्वा विश्राम्यतीति सा योगशक्तिः ॥35॥

भगवान् की इच्छाशक्तिरूप सीताजी के तीन रूप हैं—जब प्रलयकाल आता है, तब थकान उतारने के लिए भगवान् की छाती के दाहिने भाग पर अवस्थित श्रीवत्स का रूप वह धारण करती है, और विश्राम करती है, तब वह 'योगमाया' अथवा 'योगशक्ति' कहलाती है।

भोगशक्तिर्भोगरूपा कल्पवृक्षकामधेनुचिन्तामणिशङ्खपद्मनिध्यादिनव-निधिसमाश्रिता भगवदुपासकानां कामनयाऽकामनया वा भक्तियुक्ता नरं नित्यनैमित्तिककर्मभिरग्निहोत्रादिभिर्वा यमनियमासनप्राणायाम-प्रत्याहारधारणाध्यानसमाधिभिर्वालमनण्वपि गोपुरप्राकारादिभिर्वि-मानादिभिः सह भगवद्विग्रहार्चापूजोपकरणैरर्चनैः स्नानादिभिर्वा पितृ-पूजादिभिरन्नपानादिभिर्वा भगवत्प्रीत्यर्थमुक्त्वा सर्वं क्रियते ॥36॥

दूसरा रूप भोगशक्ति है। वह भोगरूप है। वह भोगरूपा सीताजी कल्पवृक्ष, कामधेनु, चिन्तामणि, शंख, पद्म, निधि आदि नवनिधि का रूप धारण किए हुए हैं। भगवान् के जो भक्त भगवान् की नित्य, नैमित्तिक, अग्निहोत्र और यज्ञादि कर्मों द्वारा अथवा यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि द्वारा उपासना करते हैं, उनकी इच्छा हो या न भी हो, तो भी उनके उपभोग के लिए वे तरह-तरह के भोग्य पदार्थ प्रदान करती हैं। वही गोपुर (स्वर्ग) प्राकार किले आदि को भी प्रदान करती हैं। वही शक्तिरूपा सीताजी भगवान् के श्रीविग्रह की पूजा-अर्चना की सामग्रियों के रूप में होती हैं, वही पितृपूजा और तीर्थस्नानादि के रूप में भी होती हैं। अन्न और रसादि के रूप में भी वही होती हैं। पर यह सब वह सिर्फ भगवान् को प्रसन्न करने के उद्देश्य से ही सम्पादित करती है।

अथातो वीरशक्तिश्चतुर्भुजाऽभयवरदपद्मधरा किरीटाभरणयुता सर्वदेवैः परिवृता कल्पतरुमूले चतुर्भिर्गजै रत्नघटैरमृतजलैरभिषिच्यमाना सर्वदैवतैर्ब्रह्मादिभिर्वन्द्यमाना अणिमाद्यष्टैश्वर्ययुता सम्मुखे कामधेनुना स्तूयमाना वेदशास्त्रादिभिः स्तूयमाना जयाद्यप्सरस्त्रीभिः परिचर्यमाणा

आदित्यसोमाभ्यां दीपाभ्यां प्रकाश्यमाना तुम्बुरुनारदादिभिर्गीयमाना राकासिनीवालीभ्यां छत्रेण ह्लादिनीमायाभ्यां चामरेण स्वाहास्वधाभ्यां व्यजनेन भृगुपुण्यादिभिरभ्यर्च्यमाना देवी दिव्यसिंहासने पद्मासनारूढा सकलकारणकार्यकरी लक्ष्मीर्देवस्य पृथग्भवनकल्पना। अलङ्कार स्थिरा प्रसन्नलोचना सर्वदेवतैः पूज्यमाना वीरलक्ष्मीरिति विज्ञायत इत्युपनिषत् ॥37॥

इति सीतोपनिषत्समाप्ता ।

अब तीसरा सीताजी का जो वीरशक्तिरूप है, वह चार भुजाओं वाला है और अभय तथा वरदान देने वाले पद्म को धारण किए हुए हैं। वह मुकुट और आभूषणों को धारण की हुई हैं। उनके चारों ओर से देवलोग उन्हें घेरे हुए हैं। वह कल्पतरु के मूल में खड़ी हैं। चार हाथी सोने के घड़ों से उन पर अमृत का अभिषेक कर रहे हैं। ब्रह्मा आदि सभी देव उनका वन्दन कर रहे हैं। वे अणिमा, लघिमा आदि आठ सिद्धियों से युक्त हैं। उनके सन्मुख कामधेनु उनकी स्तुति कर रही हैं। वेद और शास्त्रों में उन्हीं की स्तुति की गई है। जया आदि अप्सराएँ उनकी सेवा कर रही हैं। सूर्य और चन्द्ररूपी दो दीप उन्हें प्रकाशित कर रहे हैं। तुम्बुरु और नारद आदि उनके गीत गा रहे हैं। राका एवं सीनीवाली नाम की दो देवियाँ छत्र लेकर खड़ी हैं। वे स्वाहा और स्वधा के द्वारा पंखा से हवा की जा रही हैं। ह्लादिनी और मायाशक्तियाँ इन्हें चामर डुला रही हैं। भृगु और पुण्य आदि ऋषि इनकी पूजा कर रहे हैं। वह दिव्य सिंहासन पर पद्मासन लगाकर बैठी हैं। वह सकल कार्यों और कारणों को करने वाली हैं। वह महालक्ष्मीरूपा भगवती सीताजी स्वयं स्थिर होते हुए भी तरह-तरह के अलग-अलग भवनों (रूपों) के द्वारा मानो देव का शृंगार कर रही हों, ऐसी हैं। उनकी आँखें प्रसन्न हैं। सभी देवताओं के द्वारा वे पूजित हैं। ऐसी देवी को (देवी के ऐसे रूप को) वीरशक्ति के रूप में जाना जाता है।

इस प्रकार यह उपनिषद् यहाँ पूरी होती है।

शान्तिपाठः

ॐ भद्रं कर्णेभिः······देवहितं यदायुः। (पूर्ववत्)

ॐ शान्तिः शान्तिः शान्तिः ॥

❈

(47) योगचूडामण्युपनिषत्

(उपनिषत्परिचय)

इस सामवेदीय उपनिषद् में योग-साधना से आत्मशक्ति जगाने की प्रक्रिया बताई गई है। पहले योग के आसनादि छः अंगों को बताकर योगसिद्धि के आवश्यक देहतत्त्वज्ञान, मूलाधारादिचक्रज्ञान, कुण्डलिनी में परमज्योतिदर्शन, नाडीचक्र, नाडीस्थान, नाडीसंचरित प्राणवायु और उसकी क्रियाएँ, प्राणसह जीव की गतिमयता, अजपागायत्री अनुसन्धान, कुण्डलिनी द्वारा मोक्षद्वार-भेदन, तीन बन्ध, खेचरी मुद्रा, वज्रोली आदि के लक्षण, महामुद्रास्वरूप, प्रणवजप की विशेष प्रक्रिया, प्रणव-ब्रह्म का ऐक्य, प्रणवावयवों का अर्थ, तुरीयोंकार से अक्षरब्रह्मसाधना, प्रणव-हंस साधना, आत्मज्ञानबोधक प्रणवजाप, प्राणजय की आवश्यकता और इसी प्रकार से अनेकानेक योगविषय और उनके फल बताए गए हैं। सचमुच ही इसका 'योगचूडामणि' नाम अन्वर्थक है, क्योंकि इसमें योग के अनेक विषय दिए हुए हैं और इसका उपासक योग का चूडामणि (मुकुट) बन सकता है।

शान्तिपाठः

ॐ आप्यायन्तु ममाङ्गानि.......ते मयि सन्तु। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (आरुण्युपनिषद् में) द्रष्टव्य है।

योगचूडामणिं वक्ष्ये योगिनां हितकाम्यया।
कैवल्यसिद्धिदं गूढं सेवितं योगवित्तमैः ॥1॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणा।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति षट् ॥2॥
एकं सिद्धासनं प्रोक्तं द्वितीयं कमलासनम्।
षट्चक्रं षोडशाधारं त्रिलक्ष्यं व्योमपञ्चकम् ॥3॥
स्वदेहे यो न जानाति तस्य सिद्धिः कथं भवेत्।
चतुर्दलं स्यादाधारं स्वाधिष्ठानं च षड्दलम् ॥4॥
नाभौ दशदलं पद्मं हृदये द्वादशारकम्।
षोडशारं विशुद्धाख्यं भ्रूमध्ये द्विदलं तथा ॥5॥

योगियों के कल्याण की कामना से मैं योगचूडामणि नामक उपनिषद् को कहूँगा। यह उपनिषद् कैवल्य की सिद्धि कराने वाली है और श्रेष्ठ योगियों के द्वारा परिशीलन की गई एवं रहस्यमय है। आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान और समाधि—इन छः अंगों से युक्त को **'योग'** कहा गया है। यहाँ आसन के दो प्रकार बताए गए हैं—एक सिद्धासन और दूसरा पद्मासन। जो साधक अपनी देह के भीतर छः चक्रों को, सोलह आधारों को, तीन लक्ष्यों को और पाँच आकाशों को नहीं पहचान पाता, उसे सिद्धि भला कहाँ से मिल सकती है ? शरीर में स्थित छः चक्रों में जो आधार चक्र

(मूलाधारचक्र) है, वह चार दलों (पंखुडियों) वाला है, और जो स्वाधिष्ठानचक्र है, उसमें छ: दल हैं। नाभि में स्थित पद्म दश दलों वाला है और हृदय में अवस्थित पद्मचक्र बारह दलों वाला है। जो विशुद्धचक्र है, वह सोलह दल वाला है और भ्रूमध्य में जो आज्ञाचक्र (पद्म) है, वह दो दलों वाला है।

सहस्रदलसंख्यातं ब्रह्मरन्ध्रे महापथि।
आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम् ॥6॥
योनिस्थानं द्वयोर्मध्ये कामरूपं निगद्यते।
कामाख्यं तु गुदस्थाने पङ्कजं तु चतुर्दलम् ॥7॥
तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता।
तस्य मध्ये महालिङ्गं पश्चिमाभिमुखं स्थितम् ॥8॥

ब्रह्मरन्ध्र के महापथ में आया हुआ पद्मचक्र हजार दलवाला है। मूलाधार प्रथम चक्र है और स्वाधिष्ठान दूसरा चक्र है। उन दोनों के बीच में योनिस्थान (कुण्डलिनी) है। वह जगत् की उत्पत्ति का कारण है, इसलिए उसे 'कामरूप' कहा गया है। गुदा स्थल में चार दलवाला कमल स्थित है, उसे 'काम' कहा गया है। उसी काम नामक कमल के बीच में सिद्ध पुरुषों के द्वारा वन्दित पश्चिम की ओर मुँह किया हुआ महालिंग स्थित है।

नाभौ तु मणिवद्बिम्बं यो जानाति स योगवित्।
तप्तमाचीकराभासं तडिल्लेखेव विस्फुरत् ॥9॥
त्रिकोणं तत्पुरं वह्नेरधोमेढ्रात्प्रतिष्ठितम्।
समाधौ परमं ज्योतिरनन्तं विश्वतोमुखम् ॥10॥

नाभि-स्थल में मणि के आकारवाले मणिपूर नामक चक्र को जानने वाला जो योगी है, वही सही रूप में योग को जानने वाला है। वह तपाए गए स्वर्ण जैसी कान्तिवाला, विद्युत् की तरह चमकने वाला त्रिकोणाकार होता है और वह अग्निरूप मेढ्र में प्रतिष्ठित रहता है। समाधि की अवस्था में इस स्थान पर अनन्त विश्वतोमुख (चारों ओर) परमज्योति के दर्शन होते हैं।

तस्मिन्दृष्टे महायोगे यातायातो न विद्यते।
स्वशब्देन भवेत्प्राणः स्वाधिष्ठानं तदाश्रयः ॥11॥
स्वाधिष्ठानाश्रयादस्मान् मेढ्रमेवाभिधीयते।
तन्तुना मणिवत्प्रोतो योऽत्र कन्दः सुषुम्नया ॥12॥

यदि महान् योगाभ्यास से इस महाअग्नि को (अग्निमयी ज्वाला को) देख लिया जाए, तो फिर यहाँ आने-जाने से मुक्ति मिल जाएगी। स्वाधिष्ठानचक्र को स्व = प्राण का अधिष्ठान = निवासस्थान कहा जाता है। स्व के अधिष्ठान में रहने के कारण से ही उसे 'मेढ्र' भी कहा जाता है। जिस प्रकार मोती में धागा पिरोया जाता है, वैसे ही कन्द (नाडी समूह) सुषुम्ना से युक्त होता है।

तन्नाभिमण्डले चक्रं प्रोच्यते मणिपूरकम्।
द्वादशारे महाचक्रे पुण्यपापविवर्जिते ॥13॥
तावज्जीवो भ्रमत्येवं यावत्तत्त्वं न विन्दति।
ऊर्ध्वं मेढ्रादधो नाभेः कन्दे योनिः खगाण्डवत् ॥14॥

तत्र नाड्यः समुत्पन्नाः सहस्त्राणां द्विसप्ततिः ।
तेषु नाडीसहस्त्रेषु द्विसप्ततिरुदाहृता ॥15॥
प्रधानाः प्राणवाहिन्यो भूयस्तासु दश स्मृताः ।
इडा च पिङ्गला चैव सुषुम्ना च तृतीयगा ॥16॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुसा कुहूश्चैव शङ्खिनी दशमी स्मृता ॥17॥

नाभिमण्डल में स्थित बारह दलों वाला मणिपूरचक्र पाप और पुण्य से रहित है । जब तक जीव इस चक्र के रहस्य को नहीं समझता, तब तक वह इस संसार में ही चक्कर लगाया करता है । पक्षी के अण्डे के आकारवाली योनि (कुण्डलिनी) मेढ्र और नाभि के बीच में स्थित है और वहीं से बहत्तर हजार नाडियों का जाल सारे शरीर में फैला हुआ है । इन बहत्तर हजार में बहत्तर नाडियाँ मुख्य हैं । इन बहत्तर में भी दस नाडियाँ मुख्य मानी गई हैं । ये दस प्रमुख नाड़ियाँ हैं—1. इडा, 2. पिंगला, 3. सुषुम्ना, 4. गान्धारी, 5. हस्तिजिह्वा, 6. पूषा, 7. यशस्विनी, 8. अलम्बुसा, 9. कुहू और 10. शंखिनी ।

एतन्नाडीमहाचक्रं ज्ञातव्यं योगिभिः सदा ।
इडा वामे स्थिता भागे दक्षिणे पिङ्गला स्थिता ॥18॥
सुषुम्ना मध्यदेशे तु गान्धारी वामचक्षुषि ।
दक्षिणे हस्तिजिह्वा च पूषा कर्णे च दक्षिणे ॥19॥
यशस्विनी वामकर्णे चानने चाप्यलम्बुसा ।
कुहूश्च लिङ्गदेशे तु मूलस्थाने तु शङ्खिनी ॥20॥

योगियों को इस नाड़ीचक्र का ज्ञान होना ही चाहिए । हमारे शरीर में इडा नाडी नासिका की बाँयीं ओर तथा पिंगला नाडी नासिका की दाहिनी ओर होती है । और इन इडा और पिंगला नाड़ियों के बीच सुषुम्ना रहती है । दक्षिण नेत्र में हस्तिजिह्वा तथा वाम नेत्र में गान्धारी का निवास है । इसी तरह पूषा दाहिने कान में और यशस्विनी बाँये कान में वास करती है । मुँह में अलम्बुसा तथा लिंगप्रदेश में कुहू तथा मूलस्थान में शंखिनी नाडी का वास है ।

एवं द्वारं समाश्रित्य तिष्ठन्ते नाडयः क्रमात् ।
इडापिङ्गलासौषुम्नाः प्राणमार्गे च संस्थिताः ॥21॥
सततं प्राणवाहिन्यः सोमसूर्याग्निदेवताः ।
प्राणापानसमानाख्या व्यानोदानौ च वायवः ॥22॥
नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ।
हृदि प्राणः स्थितो नित्यमपानो गुदमण्डले ॥23॥
समानो नाभिदेशे तु उदानः कण्ठमध्यगः ।
व्यानः सर्वशरीरे तु प्रधानाः पञ्च वायवः ॥24॥

संपूर्ण शरीर के भीतर एक-एक द्वार पर एक-एक नाडी रहती है और प्राणमार्ग में इडा, पिंगला और सुषुम्ना रहती है । सोम, सूर्य और अग्निदेवता प्राणों के वाहक हैं । प्राण, अपान, उदान, समान

और व्यान—ये पाँच प्राणवायु माने गए हैं। नाग, कूर्म, कृकल, देवदत्त और धनंजय—ये पाँचों उपप्राणवायु माने गए हैं। शरीर के भीतर हृदय में मुख्य प्राणवायु रहता है, गुदास्थान में अपान, नाभिस्थान में समान, कण्ठ में उदान तथा संपूर्ण शरीर में व्यानवायु अवस्थित रहता है। ये पाँचों प्रधान प्राणवायु शरीर के पाँच स्थानों में निवास कर रहे हैं।

उद्गारे नाग आख्यातः कूर्म उन्मीलने तथा।
कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृम्भणे ॥25॥
न जहाति मृतं वापि सर्वव्यापी धनञ्जयः।
एते नाडीषु सर्वासु भ्रमन्ते जीवजन्तवः ॥26॥

ऊर्ध्ववायु में (डकार में) नाग नामक उपप्राण की स्थिति है। आँखों की पलक की झपक में कूर्मवायु की तथा छींकने में कृकर की एवं जम्भाई में देवदत्तवायु की स्थिति रहती है। धनंजय उपप्राण तो शरीर में इस तरह व्याप्त है कि वह मरण के बाद भी शरीर को नहीं छोड़ता है। जीव इन्हीं नाडियों में घूमता रहता है।

आक्षिप्तो भुजदण्डेन यथा चलति कन्दुकः।
प्राणापानसमाक्षिप्तस्तथा जीवो न तिष्ठति ॥27॥
प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च गच्छति।
वामदक्षिणमार्गाभ्यां चञ्चलत्वान्न दृश्यते ॥28॥
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः।
गुणबद्धस्तथा जीवः प्राणापानेन कर्षति ॥29॥
प्राणापानवशो जीवो ह्यधश्चोर्ध्वं च गच्छति।
अपानः कर्षति प्राणं प्राणोऽपानं च कर्षति।
ऊर्ध्वाधःसंस्थितावेतौ यो जानाति स योगवित् ॥30॥

हाथ से फेंके गए कन्दुक की भाँति जीव प्राण और अपानादि वायुओं से फेंका गया होने से स्थिर नहीं रहता अर्थात् इधर-उधर उछलता रहता है। यह जीव प्राणापान आदि वायुओं के वश में रहकर ऊपर-नीचे आया-जाया करता है। वह दाहिने-बाँयें मार्ग पर भी आवागमन करता रहता है। उसका वह गमनचक्र तीव्रता से चलता है इसलिए वह दिखाई नहीं पड़ता। रस्सी से बाँधा हुआ बाजपक्षी ऊपर उड़ता हुआ भी जैसे खींच लिया जाता है, वैसे ही गुणों से बँधा हुआ यह जीव भी प्राण और अपान वायु के द्वारा खींचा जाता है। प्राणवायु अपानवायु को खींचता है और अपानवायु प्राणवायु को खींचता रहता है। प्राण-अपान की इस क्रिया के द्वारा जीव भी ऊपर-नीचे आया-जाया ही करता रहता है। प्राण और जीव की इस ऊपर-नीचे आने-जाने की क्रिया को जो जानता है, वही योग को सही रूप से जानता है।

हकारेण बहिर्याति सकारेण विशेत्पुनः।
हंसहंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ॥31॥
षट्शतानि दिवारात्रौ सहस्राण्येकविंशतिः।
एतत्संख्यान्वितं मन्त्रं जीवो जपति सर्वदा ॥32॥
अजपा नाम गायत्री योगिनां मोक्षदा सदा।
अस्याः सङ्कल्पमात्रेण सर्वपापैः प्रमुच्यते ॥33॥

अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं ज्ञानं न भूतं न भविष्यति ॥34॥

हमारी साँस 'हकार' से बाहर निकलती है और 'सकार' से भीतर आती है । इस तरह यह जीव सदैव 'हंस हंस' इस तरह हंसमन्त्र का जाप करता ही रहता है । इस तरह दिन-रात मन्त्र का जाप करते रहने से यह जीव प्रतिदिन इक्कीस हजार छः सौ मन्त्र जपता है । यही अजपा गायत्री योगियों के लिए मुक्ति देने वाली है । इसके संकल्प मात्र से सर्वपापों से मुक्ति मिल जाती है । इसके समान कोई विद्या, कोई जप, कोई ज्ञान अभी तक न हुआ है और भविष्य में होगा भी नहीं ।

कुण्डलिन्या समुद्भूता गायत्री प्राणधारिणी ।
प्राणविद्या महाविद्या यस्तां वेत्ति स वेदवित् ॥35॥
कन्दोर्ध्वे कुण्डलीशक्तिरष्टधा कुण्डलाकृतिः ।
ब्रह्मद्वारमुखं नित्यं मुखेनाच्छाद्य तिष्ठति ॥36॥
येन द्वारेण गन्तव्यं ब्रह्मद्वारं मनोमयम् ।
मुखेनाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी ॥37॥
प्रबुद्धा वह्नियोगेन मनसा मरुता सह ।
सूचीवद्गात्रमादाय व्रजत्यूर्ध्वं सुषुम्नया ॥38॥
उद्घाटयेत्कवाटं तु यथा कुञ्जिकया गृहम् ।
कुण्डलिन्यां तथा योगी मोक्षद्वारं प्रभेदयेत् ॥39॥

यह गायत्री कुण्डलिनी से उत्पन्न हुई है, यह प्राणों को धारण करने वाली है, यह प्राणविद्या और महाविद्या है—इस प्रकार जो जान लेता है, वही वेद को सही रूप से जानता है । कुण्डलिनीशक्ति कन्द के ऊर्ध्वभाग में आठ कुण्डलों के आकार में व्याप्त होकर सुषुम्ना नामक ब्रह्मद्वार के मुख को अपने मुख से ढँककर ही रहती है । जिस मनोमय ब्रह्मद्वार – सुषुम्ना में प्रवेश किया जाता है, उसी द्वार को अपने मुख से ढँककर वह परमेश्वरी शक्ति (कुण्डिलिनी) सोई रहती है । वह्नियोग (अग्नियोग) के द्वारा वह जाग्रत् होती है और फिर प्रकाश के रूप में मन और प्राणवायु के साथ सुषुम्ना नाडी के भीतर सुई की तरह ऊपर की ओर गति करती है । जिस तरह चाभी से घर का किवाड़ (ताला) खोला जाता है, वैसे ही कुण्डलिनी शक्ति के द्वारा योगीजन मुक्ति का द्वार खोल लेते हैं ।

कृत्वा सम्पुटितौ करौ दृढतरं बध्वा तु पद्मासनं
गाढं वक्षसि सन्निधाय चुबुकं ध्यानं च तच्चेष्टितम् ।
वारंवारमपानमूर्ध्वमनिलं प्रोच्चारयेत्पूरितं
मुञ्चन्प्राणमुपैति बोधमतुलं शक्तिप्रभावान्नरः ॥40॥

यह अथर्ववेदीय उपनिषद् है। इसके आठ अध्याय हैं। इसका दूसरा नाम महानारायणोपनिषद् भी कहा जाता है। परमतत्त्व के जिज्ञासु ब्रह्मा ने विष्णु से उसके बारे में पूछा। तब विष्णु ने किसी पूर्व गुरु द्वारा अपने शिष्य को दिए हुए उपदेश का स्मरण करते हुए कहा कि—'ब्रह्म त्रिकालाबाधित, आदिमध्यरहित, सगुणनिर्गुण, अनन्त, अप्रमेय, अखंड, सर्वव्यापक, परिपूर्ण, सच्चिदानन्द, स्वयंप्रकाश, अवाङ्मनसगोचर एवं चैतन्य हैं। उसके अविद्या, विद्या, आनन्द और तुरीय—ये चार पाद हैं। पहला पाद जगदाकार है। वह अशुद्ध है। शेष के तीन पाद शुद्ध हैं। जगदाकार अविद्यापाद की अशुद्धियों का वर्णन इस उपनिषद् में अच्छी तरह बताकर के शुद्ध पादों की ओर प्रयाण करने का मार्ग भी बताया है। उत्कृष्ट पुण्यों के परिपाक से सत्पुरुषों का समागम, बाद में विवेक, फिर सदाचरण-प्रवृत्ति, पापक्षय, चित्तशुद्धि, सद्गुरु की प्राप्ति, अनुग्रह, उपदेश, श्रवण-मनन-निदिध्यासन, श्रद्धा, ग्रन्थिनाश, तृष्णानाश और हृदय में परमतत्त्व का आविर्भाव—इस क्रम से मनुष्य (साधक) ज्ञान-भक्ति-वैराग्य से परिपक्व होकर जीवन्मुक्त हो जाता है—यह यहाँ भलीभाँति बताया गया है। बाद में गुरु के प्रति शिष्य की कृतज्ञता और आदर को बताया है। ब्रह्माजी भी विष्णु के दिए हुए इस ज्ञान से प्रसन्न हुए।

शान्तिपाठः

ॐ भद्रं कर्णेभिः.........देवहितं यदायुः। (पूर्ववत्)

ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (अथर्वशिर उपनिषद् में) द्रष्टव्य है।

प्रथमोऽध्यायः

अथ परमतत्त्वरहस्यं जिज्ञासुः परमेष्ठी देवमानेन सहस्रसंवत्सरं तपश्चचार। सहस्रवर्षेऽतीतेऽत्युग्रतीव्रतपसा प्रसन्नं भगवन्तं महाविष्णुं ब्रह्मा परिपृच्छति भगवन् परमतत्त्वरहस्यं मे ब्रूहीति। परमतत्त्वरहस्यवक्ता त्वमेव नान्यः कश्चिदस्ति। तत् कथमिति। तदेवोच्यते। त्वमेव सर्वज्ञः। त्वमेव सर्वशक्तिः। त्वमेव सर्वाधारः। त्वमेव सर्वस्वरूपः। त्वमेव सर्वेश्वरः। त्वमेव सर्वप्रवर्तकः। त्वमेव सर्वपालकः। त्वमेव सर्वनिवर्तकः। त्वमेव सदसदात्मकः। त्वमेव सदसद्विलक्षणः। त्वमेवान्तर्बहिर्व्यापकः। त्वमेवातिसूक्ष्मतरः। त्वमेवातिमहतो महीयान्। त्वमेव महामूलाविद्याविरहः। त्वमेव महामूलाविद्याविवर्तकः। त्वमेव सर्वमूलाविद्यानिवर्तकः।

त्वमेवाविद्याविहारः। त्वमेवाविद्याधारकः। त्वमेव विद्यावेद्यः। त्वमेव विद्यास्वरूपः। त्वमेव विद्याऽतीतः। त्वमेव सर्वकारणहेतुः। त्वमेव सर्वकारणसमष्टिः। त्वमेव सर्वकारणव्यष्टिः। त्वमेवाखण्डानन्दः। त्वमेव परिपूर्णानन्दः। त्वमेव निरतिशयानन्दः। त्वमेव तुरीयतुरीयः। त्वमेव तुरीयातीतः। त्वमेवानन्तोपनिषद्विमृग्यः। त्वमेवाखिलशास्त्रैर्विमृग्यः। त्वमेव ब्रह्मेशानपुरन्दरपुरोगमैरखिलामरैरखिलागमैर्विमृग्यः। त्वमेव सर्वमुमुक्षुभिर्विमृग्यः। त्वमेवामृतमयैर्विमृग्यः। त्वमेवामृतमयस्त्वमेवा-मृतमयस्त्वमेवामृतमयः। त्वमेव सर्वं त्वमेव सर्वं त्वमेव सर्वम्। त्वमेव मोक्षस्त्वमेव मोक्षदस्त्वमेवाखिलमोक्षसाधनम्। न किञ्चिदस्ति त्वद्व्य-तिरिक्तम्। त्वद्व्यतिरिक्तं यत् किञ्चित् प्रतीयते तत्सर्वं बाधितमिति निश्चितम्। तस्मात्त्वमेव वक्ता त्वमेव गुरुस्त्वमेव पिता त्वमेव सर्वनियन्ता त्वमेव सर्वं त्वमेव सदा ध्येय इति सुनिश्चितः॥1॥

परमतत्त्व के रहस्य को जानने की इच्छावाले ब्रह्माजी ने देवों के एक हजार वर्ष तक तपश्चर्या की। जब हजार वर्ष बीत चुके, तब उस उग्र और तीव्र तपश्चर्या से प्रसन्न होकर महाविष्णु उनके समक्ष प्रकट हुए। ब्रह्माजी ने उनसे पूछा—'हे भगवन्! मुझे परम तत्त्व (के बारे में) कहिए, क्योंकि परमतत्त्व का रहस्य कहने वाले तो आप ही हैं, अन्य कोई नहीं है। ऐसा क्यों है ? वह मैं कहता हूँ (मुझसे कहा जाता है कि—) आप ही सर्वज्ञ हैं, आप ही सर्वशक्तिमान हैं, आप सबके आधार, आप ही सबके ईश्वर हैं। आप ही सबको प्रवृत्ति और निवृत्ति में जोड़ने वाले हैं। आप ही सबके पालक हैं। आप ही बड़े-छोटे—सबके निवर्तक हैं, आप ही सत् और असत् रूप तथा सत्-असत् से पृथक् भी आप ही हैं। भीतर भी आप हैं, बाहर भी आप हैं, आप व्यापक हैं। सूक्ष्म से सूक्ष्मतर भी आप हैं और महान् से भी महान् आप ही हैं। सबकी मूला अविद्या को दूर करने वाले भी आप हैं और अविद्या में विहार करने वाले भी तो आप ही हैं। अविद्या को धारण करने वाले आप ही हैं। आप विद्या से जानने योग्य हैं। आप विद्यारूप ही हैं और फिर भी आप विद्या से परे ही हैं। आप सभी कारणों के भी कारण हैं, आप कारणसमष्टि हैं। आपका कारण व्यष्टि भी है। आप ही अखण्ड आनन्द – पूर्ण आनन्दरूप हैं। आप ही निरतिशय आनन्द, तुरीय के भी तुरीय, आप ही तुरीय से भी परे, आप ही अनन्त, उपनिषदों के द्वारा ज्ञेय (अन्वेष्टव्य) हैं। आप ही शास्त्रों के द्वारा खोजने योग्य हैं। आप ही ब्रह्मा, विष्णु, इन्द्र आदि सभी देवताओं के द्वारा खोजे जा रहे हैं। सभी मुमुक्षुओं के द्वारा खोजने योग्य भी तो आप ही हैं। अमृतमयों के द्वारा अन्वेषणीय आप ही हैं। आप अमृतमय हैं, अमृतमय ही हैं, अवश्य अमृतमय हैं। आप सब कुछ हैं, सब कुछ आप ही हैं, आप अवश्य सब कुछ हैं। आप मोक्षरूप हैं, मोक्षदाता हैं और सबके मोक्षसाधन भी हैं। आपसे अलग कुछ नहीं है। आपके अतिरिक्त जो कुछ दिखाई पड़ता है, वह सब मिथ्या ही है, यह तो निश्चित ही है। इसीलिए आप ही वक्ता, आप ही गुरु, आप ही पिता, आप ही सबके नियामक, आप ही सर्वरूप, आप ही सदा ध्यान करने योग्य हैं—ऐसा अच्छी तरह से निश्चय किया गया है।'

परमतत्त्वज्ञस्तमुवाच महाविष्णुरतिप्रसन्नो भूत्वा साधुसाध्विति साधु-प्रशंसापूर्वकं सर्वं परमतत्त्वरहस्यं ते कथयामि। सावधानेन शृणु। ब्रह्मन् देवदर्शीत्याख्याथर्वणशाखायां परमतत्त्वरहस्याख्याथर्वणमहानारायणो-

पनिषदि गुरुशिष्यसंवादः पुरातनः प्रसिद्धतया जागर्ति। पुरा तत्स्व-रूपज्ञानेन महान्तः सर्वे ब्रह्मभावं गताः, यस्य श्रवणेन सर्वबन्धाः प्रविनश्यन्ति यस्य ज्ञानेन सर्वरहस्यं विदितं भवति ॥2॥

यह सुनकर परमतत्त्व को जानने वाले महाविष्णु बहुत प्रसन्न हुए और कहने लगे—'बहुत अच्छा !' 'बहुत अच्छा' ऐसी प्रशंसा करके आगे कहा—हाँ, उस परमतत्त्व का सब रहस्य मैं आपको कहूँगा। सावधान होकर सुनिए, हे ब्रह्मा ! अथर्ववेद की देवदर्शी नाम की शाखा में 'परमतत्त्वरहस्य' नाम की एक अथर्ववेदीय उपनिषद् है। उसमें गुरुशिष्य का एक प्राचीन संवाद प्रसिद्ध है। प्राचीन समय में उसका स्वरूप जानकर बड़े-बड़े पुरुष ब्रह्मभाव को प्राप्त हुए हैं। उसको सुनने से सभी बन्धन नष्ट हो जाते हैं और उसको जान लेने से सब रहस्य जाना जा सकता है।

तत्स्वरूपं कथमिति ॥3॥
शान्तो दान्तोऽतिविरक्तः सुशुद्धो गुरुभक्तस्तपोनिष्ठः शिष्यो ब्रह्मनिष्ठं गुरुमासाद्य प्रदक्षिणपूर्वकं दण्डवत् प्रणम्य प्राञ्जलिर्भूत्वा विनयेनोप-सङ्गम्य भगवन् गुरो मे परमतत्त्वरहस्यं विविच्य वक्तव्यमिति ॥4॥

यदि आप पूछते हो कि उस संवाद का स्वरूप कैसा है ? तो मैं बताता हूँ कि प्राचीन काल में एक शमगुणयुक्त और दमगुणयुक्त, अतिवैराग्यशील, परमशुद्ध, गुरुभक्त और तपोनिष्ठ ऐसा एक शिष्य था। वह किसी ब्रह्मनिष्ठ गुरु के पास गया और प्रदक्षिणापूर्वक गुरु को दण्डवत् प्रणाम करके दोनों हाथ जोड़कर सविनय गुरु के समीप जाकर पूछने लगा कि 'हे भगवन् ! हे गुरुदेव ! परमतत्त्व के रहस्य आप मुझे विवेचन करके कहिए।'

अत्यादरपूर्वकमतिहर्षेण शिष्यं बहूकृत्य गुरुर्वदति। परमतत्त्वरहस्योप-निषत्क्रमः कथ्यते। सावधानेन श्रूयताम्। कथं ब्रह्म। कालत्रयाबाधितं ब्रह्म। सर्वकालाबाधितं ब्रह्म। सगुणनिर्गुणस्वरूपं ब्रह्म। आदि-मध्यान्तशून्यं ब्रह्म। सर्वं खल्विदं ब्रह्म। मायातीतगुणातीतं ब्रह्म। अनन्तमप्रमेयाखण्डपरिपूर्णं ब्रह्म। अद्वितीयपरमानन्दशुद्धबुद्धमुक्त-सत्यस्वरूपव्यापकाभिन्नापरिच्छिन्नं ब्रह्म। सच्चिदानन्दस्वप्रकाशं ब्रह्म। मनोवाचामगोचरं ब्रह्म। अखिलप्रमाणागोचरं ब्रह्म। अमितवेदान्तवेद्यं ब्रह्म। देशतः कालतो वस्तुतः परिच्छेदरहितं ब्रह्म। सर्वपरिपूर्णं ब्रह्म। तुरीयं निराकारमेकं ब्रह्म। अद्वैतमनिर्वाच्यं ब्रह्म। प्रणवात्मकं ब्रह्म। प्रणवात्मकत्वेनोक्तं ब्रह्म। प्रणवाद्यखिलमन्त्रात्मकं ब्रह्म। पाद-चतुष्टयात्मकं ब्रह्म ॥5॥

तब अत्यन्त आदरपूर्वक और हर्षपूर्वक शिष्य की प्रशंसा करके गुरु ने कहा—'परमतत्त्वरहस्य' नाम की उपनिषद् का जो क्रम है, वह मैं कह रहा हूँ। तुम सावधान होकर सुनो। 'ब्रह्म कैसा है ?' —इस प्रश्न का उत्तर यह है कि ब्रह्म तीनों कालों में अबाधित है। ब्रह्म सभी कालों में अबाधित है। ब्रह्म सगुण और निर्गुण स्वरूपवाला है। ब्रह्म आदि, मध्य और अन्त से रहित है। यह जो सब कुछ है, वह ब्रह्म ही है। ब्रह्म माया से परे और गुणों से परे है। ब्रह्म अनन्त है। प्रमाणों से वह जाना नहीं जा सकता। वह अखंड और परिपूर्ण है। ब्रह्म अद्वितीय, परम आनन्दरूप, शुद्ध, ज्ञानयुक्त (ज्ञानरूप), मुक्त, सत्यस्वरूप, व्यापक, भेदरहित और अप्रमेय है। ब्रह्म मन और वाणी का विषय नहीं बन सकता। ब्रह्म सच्चिदानन्द और स्वयंप्रकाशित है। वह सभी प्रमाणों का विषय नहीं है। ब्रह्म असंख्य

वेदान्तों के द्वारा जाना जा सकता है। देश, काल और वस्तु से ब्रह्म नापा नहीं जा सकता। ब्रह्म सब प्रकार से परिपूर्ण है। तुरीय और निराकार ब्रह्म एक ही है। ब्रह्म ऐसा है कि जिसका द्वैत के साथ वर्णन नहीं किया जा सकता। ब्रह्म प्रणवरूप – ॐकार स्वरूप है। ब्रह्म प्रणवरूप से कहा जाता है। ब्रह्म प्रणव आदि सभी मन्त्ररूप है। वह ब्रह्म चार पादवाला है।

किं तत्पादचतुष्टयं भवति ॥6॥
अविद्यापादः सुविद्यापादश्चानन्दपादस्तुरीयपादश्चेति। तुरीयपादस्तुरीय-तुरीयं तुरीयातीतं च ॥7॥
कथं पादचतुष्टयस्य भेदः ॥8॥
अविद्यापादः प्रथमः पादो विद्यापादो द्वितीयः आनन्दपादस्तृतीयस्तुरीय-पादस्तुरीय इति। मूलाविद्या प्रथमपादे नान्यत्र। विद्याऽऽनन्दतुरीयांशाः सर्वेषु पादेषु व्याप्य तिष्ठन्ति ॥9॥

'वे चार पाद कौन-कौन से हैं' ? वे हैं—अविद्यापाद, सुविद्यापाद, आनंदपाद और तुरीयपाद। उनमें से जो तुरीयपाद है, वह तुरीयतुरीय और तुरीयातीत है। उन चारों पादों के भेद कौन-कौन से हैं ? प्रथम पाद अविद्यापाद है, दूसरा पाद विद्यापाद है, तीसरा पाद आनन्दपाद है और चौथा पाद तुरीयपाद है। मूला अविद्या तो प्रथम पाद में ही है, अन्य पादों में वह नहीं है। अन्य पादों में विद्यापाद, आनंदपाद और तुर्यपाद के अंश सन्निहित हैं।

एवं तर्हि विद्याऽऽदीनां भेदः कथमिति ॥10॥
तत्तत्प्राधान्येन तत्तद्व्यपदेशः। वस्तुतस्त्वभेद एव। तत्राधस्तनमेकं पादमविद्याशबलं भवति। उपरितनपादत्रयं शुद्धबोधानन्दलक्षणममृतं भवति। तच्चालौकिकपरमानन्दलक्षणाखण्डामिततेजोराशिर्ज्वलति। तच्चानिर्वाच्यमनिर्देश्यमखण्डानन्दैकरसात्मकं भवति। तत्र मध्यम-पादमध्यप्रदेशेऽमिततेजःप्रवाहाकारतया नित्यवैकुण्ठं विभाति। तच्च निरतिशयानन्दाखण्डब्रह्मानन्दनिजमूर्त्याकारेण ज्वलति। अपरिच्छिन्न-मण्डलानि यथा दृश्यन्ते तद्वदखण्डानन्दामितवैष्णवदिव्यतेजोराश्यन्त-र्गतविलसन्महाविष्णोः परमं पदं विराजते। दुग्धोदधिमध्यस्थितामृता-मृतकलशवद्वैष्णवं धाम परमं सन्दृश्यते। सुदर्शनदिव्यतेजोऽन्तर्गतः सुदर्शनपुरुषो यथा सूर्यमण्डलान्तर्गतः सूर्यनारायणोऽमितापरिच्छिन्ना-द्वैतपरमानन्दलक्षणतेजोराश्यन्तर्गत आदिनारायणस्तथा सन्दृश्यते। स एव तुरीयं ब्रह्म स एव तुरीयातीतः स एव विष्णुः स एव समस्तब्रह्म-वाचकवाच्यः स एव परंज्योतिः स एव मायातीतः स एव गुणातीतः स एव कालातीतः स एवाखिलकर्मातीतः स एव सत्योपाधिरहितः स एव परमेश्वरः स एव चिरन्तनः पुरुषः प्रणवाद्यखिलमन्त्रवाचकवाच्य आद्यन्तशून्य आदिदेशकालवस्तुतुरीयसंज्ञानित्यपरिपूर्णः पूर्णः सत्य-सङ्कल्प आत्मारामः कालत्रयाबाधितनिजस्वरूपः स्वयंज्योतिः स्वयं-प्रकाशमयः स्वसमानाधिकरणंशून्यः स्वसमानाधिकशून्यो न दिवारात्रि-विभागो न संवत्सरादिकालविभागः स्वानन्दमयानन्ताचिन्त्यविभव विभागो न संवत्सरादिकालविभागः स्वानन्दमयानन्ताचिन्त्यविभव आत्माऽन्तरात्मा परमात्मा ज्ञानात्मा तुरीयात्मेत्यादिवाचकवाच्योऽद्वैत-

परमानन्दो विभुर्नित्यो निष्कलङ्को निर्विकल्पो निरञ्जनो निराख्यातः
शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चिदिति ।।11।।
य एवं वेद स पुरुषस्तदीयोपासनया तस्य सायुज्यमेतीत्यसंशयमित्यु-
पनिषत् ।।12।।

इत्याथर्वणमहानारायणोपनिषदि पादचतुष्टय-
स्वरूपनिरूपणं नाम प्रथमोऽध्यायः ।

जब अन्य पादों में भी अन्यान्य के अंश रहे हैं, तब उनके विद्यापाद आदि अनेक नामों से भेद क्यों किए गए हैं ? इसका उत्तर यह है कि जिसमें जिसकी-जिसकी मुख्यता है, उस-उस नाम से उनका व्यवहार किया जाता है। वास्तविक रूप से तो उन पादों में कुछ भेद है ही नहीं। उन पादों में निम्न का एक ही पाद अविद्या से मिश्रित है, ऊपर के तीन पाद तो शुद्ध ज्ञान और आनन्दरूप लक्षण वाले अमृतस्वरूप ही हैं। वह ब्रह्म अलौकिक परमानन्द लक्षणयुक्त है। वह अखण्ड – अमेय तेजोराशि के रूप में प्रकाशित हो रहा है। उसका वर्णन करना या उसको बताना तो असंभव ही है। वह एकमात्र अखण्ड आनन्दस्वरूप और रसस्वरूप है। वहाँ मध्यपाद के मध्य प्रदेश में अमेय तेजप्रवाह के आकार में नित्य वैकुण्ठधाम विराजित है। वह धाम निरतिशय आनन्दरूप अखण्ड ब्रह्मानन्द की अपनी मूर्ति के आकार में प्रकाशित है। जिस तरह बिना टूटे हुए (अखण्ड) मण्डल दिखाई देते हों, उसी तरह से अखण्ड आनन्दमय और अमेय ऐसा विष्णु भगवान् के तेज का समूह है और उसके भीतर विलास करते हुए महाविष्णु का वह परमपद विराजमान है। विष्णु का वह परमधाम मानो क्षीर-समुद्र के बीच अवस्थित अमृत का अविनाशी कुम्भ हो, ऐसा दिखाई पड़ता है। जिस तरह सूर्यमण्डल के भीतर स्थित सुन्दर दृश्य-युक्त तेज के बीच प्रविष्ट हुए सुदर्शन सूर्यनारायण ही हों, उसी प्रकार वे आदिनारायण भी अमित-अमेय-परमानन्दस्वरूप तेजोराशि के भीतर स्थित दिखाई पड़ते हैं। वही तुरीय ब्रह्म है, वही तुरीय से परे है, वही विष्णु है, वही ब्रह्म के समस्त नामों के अर्थ हैं, वही परमज्योति हैं, वही माया से परे हैं, वही गुणरहित हैं, वही काल से परे हैं, वही सर्वकर्मों से रहित हैं, वही सत्य हैं, वही सर्व उपाधियों से रहित हैं, वही परमेश्वर हैं और वही प्राचीनतम पुरुष हैं। प्रणव आदि सभी मन्त्र वाचकों का वही वाच्य है ' वह आदि-अन्त से रहित है। आदि-देश-काल-तुरीय ऐसी संज्ञा वाला वही है। वह नित्य और पूर्ण (परिपूर्ण) है। वह सत्यसंकल्प है, वह आत्माराम (स्वयं में रममाण) है। उसका आत्मस्वरूप तीनों काल में अबाधित रहता है। वह स्वयंज्योति है, स्वयंप्रकाशमय है, उसके जैसा अन्य कोई अवलम्बन (आधार - अधिकरण) है ही नहीं है। इसके समान कोई नहीं है, उससे अधिक कोई नहीं है। दिन-रात आदि विभागों से वह रहित है। वर्ष आदि कालविभागों से भी वह रहित है। वह स्वानन्दमय-अचिन्त्य-अनन्त वैभवशाली है। वह आत्मा का भी अन्तरात्मा है। वह परमात्मा, ज्ञानस्वरूप है, और तुरीय आदि शब्दों का अर्थरूप है। वह अद्वैत, परमानन्दस्वरूप, व्यापक, नित्य, निष्कलंक, निर्विकल्प, निरंजन, संज्ञारहित, शुद्ध, देवनारायण, वह एक ही है, दूसरा कोई है ही नहीं"—इस प्रका जो जानता है वह पुरुष उसकी उपासना से उस परमतत्त्व के सायुज्य को प्राप्त हो जाता है। इसमें .े.सी प्रकार का संशय नहीं है।

इस प्रकार आथर्वण-महानारायण उपनिषद् में 'पादचतुष्टयस्वरूपनिरूपण'
नामक प्रथम अध्याय समाप्त होता है।

❋

द्वितीयोऽध्याय:

अथेति होवाच छात्रो गुरुं भगवन्तम्। भगवन् वैकुण्ठस्य नारायणस्य च नित्यत्वमुक्तम्। स एव तुरीयमित्युक्तमेव। वैकुण्ठः साकारो नारायणः साकारश्च। तुरीयं तु निराकारम्। साकारः सावयवो निरवयवं निराकारम्। तस्मात्साकारमनित्यं नित्यं निराकारमिति श्रुतेः। यद्यत् सावयवं तत्तदनित्यमित्यनुमानाच्चेति प्रत्यक्षेण दृष्टत्वाच्च। अतस्तयोरनित्यत्वमेव वक्तुमुचितं भवति। कथमुक्तं नित्यत्वमिति। तुरीयमक्षरमिति श्रुतेः। स्तुरीयस्य नित्यत्वं प्रसिद्धम्। नित्यत्वानित्यत्वे परस्परविरुद्धधर्मौ। तयोरेकस्मिन् ब्रह्मण्यत्यन्तविरुद्धं भवति। तस्माद्वैकुण्ठस्य च नारायणस्य चानित्यत्वमेव वक्तुमुचितं भवति ॥1॥

बाद में शिष्य ने गुरु भगवान् से पूछा—'हे भगवन्! वैकुण्ठ और नारायण नित्य हैं, ऐसा आपने कहा और वही तुरीय है, ऐसा भी कहा। वैकुण्ठ साकार है और नारायण भी साकार हैं। परन्तु तुरीय तो निराकार है ! जो साकार होता है, वह तो अवयवों वाला होता है, और जो निराकार होता है, उसके अवयव नहीं होते। इसलिए 'साकार अनित्य है और निराकार नित्य है।' ऐसा श्रुति कहती है। 'जो-जो अवयव वाला होता है वह अनित्य होता है।' ऐसे अनुमान से और प्रत्यक्ष में भी देखा गया है। इसलिए उन दोनों का – वैकुण्ठ का और नारायण का अनित्यत्व कहना ही उचित है। फिर भी आप उन्हें नित्य क्यों कहते हैं ? और श्रुति कहती है कि तुरीय तो अविनाशी है। इसके आधार पर तुरीय का तो नित्यत्व ही प्रसिद्ध है और नित्यत्व एवं अनित्यत्व ये दोनों धर्म तो परस्पर विरोधी ही हैं। अत: ये दोनों एक ही ब्रह्म में हों, यह तो अत्यन्त विरुद्ध बात है। इसलिए वैकुण्ठ को और नारायण को— दोनों को अनित्य कहना ही उचित है।

सत्यमेव भवतीति देशिकं परिहरति। साकारस्तु द्विविधः। सोपाधिको निरुपाधिकश्च ॥2॥

तत्र सोपाधिकसाकारः कथमिति ॥3॥

आविद्यकमखिलकार्यकारणजालमविद्यापाद एव नान्यत्र। तस्मात् समस्ताविद्योपाधिः साकारः सावयव एव। सावयवत्वादनित्यं भवत्येव ॥4॥

तब शिष्य की शंका का निवारण करते हुए गुरु ने कहा—'वह बात ठीक है, पर साकार दो प्रकार के हैं—एक सोपाधिक और दूसरा निरुपाधिक। उनमें सोपाधिक साकार कैसा होता है ? वह सुनो—अविद्या से बने हुए सभी कार्य और कारण ब्रह्म के अविद्यापाद में ही हैं। अन्य पादों में तो नहीं हैं। इसलिए समग्र अविद्या की उपाधिवाला जो पाद है, वह तो साकार और अवयवों वाला ही है। और अवयवों वाला होने से अनित्य है ही।

सोपाधिकसाकारो वर्णितः। तर्हि निरुपाधिकसाकारः कथमिति ॥5॥

निरुपाधिकसाकारस्त्रिविधः। ब्रह्मविद्यासाकारश्चानन्दसाकार उभयात्मकसाकारश्चेति। त्रिविधसाकारोऽपि पुनर्द्विविधो भवति। नित्यसाकारो मुक्तसाकारश्चेति। नित्यसाकारस्त्वाद्यन्तशून्यः शाश्वतः।

उपासनया ये मुक्तिं गतास्तेषां साकारो मुक्तसाकारः। तस्याखण्ड-ज्ञानेनाविर्भावो भवति। सोऽपि शाश्वतः ॥6॥

ठीक है, इस प्रकार सोपाधिक साकार का वर्णन तो हुआ। अब निरुपाधिक साकार कैसा है? यह बताते हैं—निरुपाधिक साकार तीन प्रकार का है—एक ब्रह्मविद्यासाकार, दूसरा आनन्दसाकार और तीसरा उभयात्मकसाकार। यह त्रिविध साकार भी अन्य विधि से दो प्रकार का है—एक नित्य साकार है और दूसरा मुक्त साकार है। उनमें नित्य साकार के तो आदि और अन्त नहीं हैं। जिन लोगों ने उपासना से मुक्ति प्राप्त की होती है, उनका साकार मुक्त साकार कहा जाता है। उसका आविर्भाव अखंड ज्ञान से होता है। वह भी शाश्वत है।

मुक्तसाकारस्त्वैच्छिक इत्यन्ये वदन्ति। शाश्वतत्वं कथमिति ॥7॥
अद्वैताखण्डपरिपूर्णनिरतिशयपरमानन्दशुद्धबुद्धमुक्तसत्यात्मकब्रह्मचैतन्य-साकारत्वान्निरुपाधिकसाकारस्य नित्यत्वं सिद्धमेव। तस्मादेव निरुपा-धिकसाकारस्य निरवयवत्वात् स्वाधिकमपि दूरतो निरस्तमेव। निरव-यवं ब्रह्मचैतन्यमिति सर्वोपनिषत्सु सर्वशास्त्रसिद्धान्तेषु श्रूयते ॥8॥

मुक्त साकार तो ऐच्छिक है, ऐसा अन्य लोग कहते हैं। तो फिर उसका शाश्वतत्व (नित्यत्व) कैसे हो सकता है? अद्वैत, अखण्ड, परिपूर्ण, निरतिशय, परमानन्द, शुद्ध, ज्ञानमय, मुक्त और सत्यस्वरूप ब्रह्म चैतन्यरूप से ही साकार है। इसलिए उस निरुपाधिक साकार का नित्यत्व तो सिद्ध ही है। और इसीलिए वह निरुपाधिक साकार अवयवरहित ही सिद्ध होता है। इसीलिए उससे अपने से किसी के अधिक होने की बात तो दूर से ही खण्डित हो जाती है। ब्रह्मचैतन्य अवयवरहित है, यह बात तो उपनिषदों और सर्व शास्त्रों में सुनाई ही पड़ती है।

अथ च विद्याऽऽनन्दतुरीयाणामभेद एव श्रूयते। सर्वत्र विद्यादिसाकार-भेदः कथमिति ॥9॥
सत्यमेवोक्तमिति देशिकः परिहरति। विद्याप्राधान्येन विद्यासाकारः। आनन्दप्राधान्येनानन्दसाकारः। उभयप्राधान्येनोभयात्मकसाकारो भवति। प्राधान्येनात्र भेद एव। स भेदो वस्तुतस्त्वभेद एव ॥10॥

और भी, विद्या, आनन्द और तुरीय का भी तो अभेद ही सुनाई देता है। तो फिर सभी जगह पर साकार का भेद क्यों कहा जाता है? जब शिष्य ने ऐसी शंका की, तब गुरु ने उसका समाधान करते हुए कहा—'तुमने सत्य कहा। परन्तु, विद्या की मुख्यता से विद्यासाकार, आनन्द की मुख्यता से आनन्दसाकार और उभय की मुख्यता से मिश्र साकार (उभयसाकार)—इस प्रकार एक-एक की मुख्यता से उनमें भेद हैं, परन्तु वास्तविक रूप से तो अभेद ही हैं।'

भगवन्नखण्डाद्वैतपरमानन्दलक्षणपरब्रह्मणः साकारनिराकारौ विरुद्ध-धर्मौ। विरुद्धोभयात्मकत्वं कथमिति ॥11॥
सत्यमेवेति गुरुः परिहरति। यथा सर्वगतस्य निराकारस्य महावायोश्च तदात्मकस्य त्वक्पतित्वेन प्रसिद्धस्य साकारस्य महावायुदेवस्य चाभेद एव श्रूयते सर्वत्र। यथा पृथिव्यादीनां व्यापकशरीराणां देवशेषाणां च तद्विलक्षणतदभिन्नव्यापकापरिच्छिन्ननिजमूर्त्याकारदेवताः श्रूयन्ते सर्वत्र

तद्वत् परब्रह्मणः सर्वात्मकस्य साकारनिराकारभेदविरोधो नास्त्येव। विविधविचित्रानन्तशक्तेः परब्रह्मणः स्वरूपज्ञानेन विरोधो न विद्यते। तदभावे सत्यनन्तविरोधो विभाति ॥12॥

यह सुनकर शिष्य ने शंका की—'हे भगवन्! अखण्ड, अद्वैत और परमानन्दरूप लक्षण वाले परब्रह्म के साकार और निराकार धर्म तो परस्पर-विरोधी ही माने जाने चाहिए। और ऐसे एक-दूसरे के विरोधी धर्म एक ब्रह्म में कैसे रह सकते हैं? परस्परविरुद्ध धर्मवाला एक ब्रह्म कैसे हो सकता है?' इस शंका का परिहार करते हुए गुरु ने कहा—'यह तो ठीक है परन्तु जैसे सर्वव्यापक और निराकार महावायु का और त्वगिन्द्रिय के स्वामी के रूप में (शास्त्रों में) वर्णित साकार वायुदेव का सभी जगह अभेद ही सुना जाता है, और भी जैसे व्यापक शरीर वाले पृथिव्यादि के तथा विशिष्ट देवताओं के भी उनसे विलक्षण फिर भी उनसे अभिन्न—ऐसे व्यापक तथा परिमित (परिच्छिन्न) अपनी-अपनी मूर्तिवाले—दोनों प्रकार के स्वरूप सभी श्रुतियों में सुनाई ही पड़ते हैं। उसी प्रकार सर्वस्वरूप परब्रह्म के साकार और निराकार—ऐसा भेद होने पर भी किसी प्रकार का विरोध नहीं है। क्योंकि परब्रह्म तो अनेक प्रकार की शक्तियुक्त हैं। और विरोध के न होने पर भी सिर्फ ऐसा विरोध दिखाई ही देता है।

अथ च रामकृष्णाद्यवतारेष्वप्यद्वैतपरमानन्दलक्षणपरब्रह्मणः परमतत्त्व-परमविभवानुसन्धानं स्वीयत्वेन श्रूयते सर्वत्र। सर्वपरिपूर्णस्याद्वैतपरमानन्दलक्षणपरब्रह्मणस्तु किं वक्तव्यम्। अन्यथा सर्वपरिपूर्णस्य परब्रह्मणः परमार्थतः साकारं विना केवलनिराकारत्वं यद्यभिमतं तर्हि केवलनिराकारस्य गगनस्येव परब्रह्मणोऽपि जडत्वमापाद्यते। तस्मात्परंब्रह्मणः परमार्थतः साकारनिराकारौ स्वभावसिद्धौ ॥13॥

राम, कृष्ण आदि अवतारों में भी अद्वैत परमानन्दस्वरूप परब्रह्म के ही परमतत्त्व और परम वैभव का अनुसन्धान उनके अपने ही स्वरूपतत्त्व के रूप में भी सभी जगह पर सुनाई दे रहा है। अगर ऐसा न माना जाए और सर्व प्रकार से परिपूर्ण परमानन्दस्वरूप अद्वैत परब्रह्म के वास्तविक साकार स्वरूप को बिना माने ही यदि केवल निराकारस्वरूप ही मान लें, तो जैसा केवल निराकारस्वरूप आकाश का है, और जडत्व है, वैसा ही जडत्व परब्रह्म में भी आ जायेगा। इसलिए परब्रह्म का साकार और निराकार भेद है, वे स्वभावसिद्ध ही हैं।

तथाविधस्याद्वैतपरमानन्दलक्षणस्यादिनारायणस्योन्मेषनिमेषाभ्यां मूलाविद्योदयस्थितिलया जायन्ते। कदाचिदात्मारामस्याखिलपरिपूर्णस्यादिनारायणस्य स्वेच्छानुसारेणोन्मेषो जायते। तस्मात्परब्रह्मणोऽधस्तनपादे सर्वकारणे मूलकारणाव्यक्ताविर्भावो भवति। अव्यक्तान्मूलाऽऽविर्भावो मूलाविद्याऽऽविर्भावश्च। तस्मादेव सच्छब्दवाच्यं ब्रह्माविद्याशबलं भवति। ततो महत्। महतोऽहङ्कारः। अहङ्कारात् पञ्चतन्मात्राणि। पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि। पञ्चमहाभूतेभ्यो ब्रह्मैकपादं व्याप्तमेकमविद्याऽण्डं जायते ॥14॥

इस प्रकार के अद्वैत परमानंदस्वरूप लक्षणयुक्त आदिनारायण के नेत्र के मिलन-उन्मीलन से (पलक से) मूला अविद्या की उत्पत्ति, स्थिति और लय हुआ करते हैं। आत्माराम एवं सर्वांशपरिपूर्ण उन आदिनारायण के नेत्र का कभी-कभी उनकी इच्छानुसार खुलना होता है। और इससे परब्रह्म के

सर्वकारणरूप निम्नपाद में मूल कारण अव्यक्त का आविर्भाव होता है। और उस अव्यक्त में से मूल का तथा मूला अविद्या का आविर्भाव होता है। फिर उसी में से, 'सत्' शब्द द्वारा कहा जाने वाला अविद्याशबल (मिश्र) ब्रह्म होता है। उसी में से फिर महतत्त्व, महतत्त्व से अहंकार, अहंकार में से पाँच तन्मात्राएँ, पाँच तन्मात्राओं से पाँच महाभूत और उन पाँच महाभूतों में से ब्रह्म के एक पाद से व्याप्त ऐसा एक अविद्या का अण्ड जन्म लेता है।

तत्र तत्त्वतो गुणातीतशुद्धसत्त्वमयो लीलागृहीतनिरतिशयानन्दलक्षणो मायोपाधिको नारायण आसीत्। स एव नित्यपरिपूर्णः पादविभूतिवैकुण्ठनारायणः। स चानन्तकोटिब्रह्माण्डानामुदयस्थितिलयाद्यखिलकार्यकारणजालपरमकारणभूतो महामायाऽतीतस्तुरीयः परमेश्वरो जयति। तस्मात् स्थूलविराट्स्वरूपो जायते। स सर्वकारणमूलं विराट्स्वरूपो भवति। स चानन्तशीर्षा पुरुष अनन्ताक्षिपाणिपादो भवति। अनन्तश्रवणः सर्वमावृत्य तिष्ठति। सर्वव्यापको भवति। सगुणनिर्गुणस्वरूपो भवति। ज्ञानबलैश्वर्यशक्तितेजःस्वरूपो भवति। विविधविचित्रानन्तजगदाकारो भवति। निरतिशयानन्दमयानन्तपरमविभूतिसमष्ट्या विश्वाकारो भवति। निरतिशयनिरङ्कुशसर्वज्ञसर्वशक्तिसर्वनियन्तृत्वाद्यनन्तकल्याणगुणाकारो भवति। वाचामगोचरानन्तदिव्यतेजोराश्याकारो भवति। समस्ताविद्याऽण्डव्यापको भवति। स चानन्तमहामायाविलासानामधिष्ठानविशेषनिरतिशयाद्वैतपरमानन्दलक्षणपरब्रह्मविलासविग्रहो भवति ॥15॥

उसमें तात्त्विक दृष्टि से तो गुणों से परे, शुद्ध सत्त्वमय, लीला से ही स्वीकृत रूपवाले निरतिशय आनन्दस्वरूप और माया की उपाधिवाले नारायण ही होते हैं। वे ही नित्य परिपूर्णपादस्वरूप, विभूतियुक्त वैकुण्ठनारायण हैं। और वे अनन्त कोटि ब्रह्माण्डों के सर्जन, स्थिति और लय आदि सभी कार्यों तथा कारणों के समूह का भी जो परमकारण है, उसके भी कारणभूत हैं। और महामाया से परे ऐसे वे तुरीय परमेश्वर जय प्राप्त करते हैं। उन्हीं में से स्थूल (विराट्) स्वरूप उत्पन्न होता है। वह विराट्स्वरूप सभी कारणों का मूल है। वह विराट् पुरुष अनन्त मस्तकवाले तथा अनन्त आँखों, हाथों और पैरों वाले हैं। अनन्त कानों वाले वे सबको व्याप्त कर रहे हैं (सबको ढँककर स्थित हैं)। वे सर्वव्यापक तथा सगुण-निर्गुण स्वरूप वाले हैं। ज्ञान, बल, ऐश्वर्य, शक्ति और तेजस्वरूप हैं। विविध और विचित्र जगत् के आकार वाले हैं। निरतिशय आनन्दमय और अनन्त एवं परमविभूतिरूप वे समष्टि के द्वारा विश्वाकार होते हैं। निरतिशय, निरंकुश, सर्वज्ञ, सर्वशक्तिमान और सर्वनियन्ता आदि अनन्त कल्याणकारी गुणमय विशिष्ट आकारों से युक्त हैं। वाणी के अविषय, अनन्त दिव्य तेज के राशिरूप आकार वाले हैं। वे अविद्या के समस्त अण्ड में व्याप्त होकर स्थित हैं, और अनन्त महामाया के विलासों के विशेष अधिष्ठानरूप ऐसे निरतिशय परमानन्दस्वरूप लक्षणवाले परब्रह्म के विलास शरीर रूप हैं।

अस्यैकैकरोमकूपान्तरेष्वनन्तकोटिब्रह्माण्डानि स्थावराणि च जायन्ते। तेष्वण्डेषु सर्वेष्वेकैकनारायणावतारो जायते। नारायणाद्धिरण्यगर्भो जायते। नारायणादण्डविराट्स्वरूपो जायते। नारायणादखिललोक-

स्त्रष्टृप्रजापतयो जायन्ते। नारायणादेकादशरुद्राश्च जायन्ते। नारायणादखिललोकाश्च जायन्ते। नारायणादिन्द्रो जायते। नारायणात् सर्वे देवाश्च जायन्ते। नारायणाद्द्वादशादित्याः सर्वे वसवः सर्वे ऋषयः सर्वाणि भूतानि सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते। नारायणात् प्रवर्तन्ते। नारायणे प्रलीयन्ते। अथ नित्योऽक्षरः परमः स्वराट्। ब्रह्मा नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः। दिशश्च नारायणः। विदिशश्च नारायणः। कालश्च नारायणः। कर्माखिलं च नारायणः। मूर्तामूर्ते च नारायणः। कारणात्मकं सर्वं कार्यात्मकं सकलं नारायणः। तदुभयविलक्षणो नारायणः। परंज्योतिः स्वप्रकाशमयो ब्रह्मानन्दमयो नित्यो निर्विकल्पो निरञ्जनो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित्। न समो नाधिक इत्यसंशयम् ॥16॥

उनके एक-एक रोमछिद्र में अनन्तकोटि स्थावरों और ब्रह्माण्डों की उत्पत्ति होती है और उन सभी ब्रह्माण्डों में एक-एक नारायण का अवतार होता है। उन नारायण से हिरण्यगर्भ उत्पन्न होते हैं। नारायण से अण्ड विराट्स्वरूप होता है। नारायण से ही सब लोकों का सर्जन करने वाले प्रजापति उत्पन्न होते हैं। नारायण से ग्यारह रुद्रों का जन्म होता है। नारायण से सभी लोक उत्पन्न होते हैं। नारायण से इन्द्र उत्पन्न होते हैं। नारायण से सभी देव उत्पन्न होते हैं। बारह आदित्य, सभी (आठ) वसु, सभी ऋषि, सभी भूत और सभी वेद नारायण से ही उत्पन्न होते हैं। नारायण से ही वे सब प्रवृत्ति करते हैं, और नारायण में ही लीन होते हैं। वे ही नित्य, अक्षर, परम और स्वयंप्रकाशित हैं। ब्रह्मा नारायण हैं, शिव नारायण हैं, इन्द्र नारायण हैं, दिशाएँ नारायण हैं, विदिशाएँ नारायण हैं, काल नारायण हैं, सर्वकर्म नारायण है, मूर्त और अमूर्त नारायण है। कारणरूप और कार्यरूप सब नारायण है। और उन दोनों से विलक्षण भी नारायण है। परमज्योति, स्वप्रकाशमय, ब्रह्मानन्दमय, नित्य, निर्विकल्प, निरंजन, अवर्णनीय, शुद्ध देव, एक नारायण ही हैं, अन्य कोई नहीं है। वह किसी के समान नहीं है, कोई इससे अधिक नहीं है, इसमें कोई भी सन्देह नहीं है।

परमार्थतो य एवं वेद सकलबन्धांश्छित्त्वा मृत्युं तीर्त्वा स मुक्तो भवति स मुक्तो भवति। य एवं विदित्वा सदा तमुपास्ते पुरुषः स नारायणो भवति स नारायणो भवतीत्युपनिषत् ॥17॥

इत्याथर्वणमहानारायणोपनिषदि परब्रह्मणः साकारनिराकारस्वरूपनिरूपणं नाम द्वितीयोऽध्यायः।

उनको पारमार्थिक रूप से जो साधक ऐसा जानता है, वह संसार के समस्त बन्धनों को काटकर मृत्यु का अतिक्रमण करके मुक्त हो जाता है। जो पुरुष इस प्रकार जानकर उनकी उपासना करता है, वह स्वयं नारायण ही हो जाता है, नारायण ही हो जाता है, ऐसा यह उपनिषद् कहती है।

इस प्रकार आथर्वण-महानारायण उपनिषद् में 'साकारनिराकारनिरूपण' नामक द्वितीय अध्याय समाप्त होता है।

❋

तृतीयोध्यायः

अथ छात्रस्तथेति होवाच—भगवन् देशिक परमतत्त्वज्ञ सविलासमहामूलाऽविद्योदयक्रमः कथितः। तदु प्रपञ्चोत्पत्तिक्रमः कीदृशो भवति विशेषेण कथनीयः। तस्य तत्त्वं वेदितुमिच्छामि ॥1॥

शिष्य ने 'ठीक है' ऐसा कहकर फिर पूछा—'हे भगवन्! हे गुरो! हे परमतत्त्व के ज्ञाता! आपने विलाससहित महामूला अविद्या के उदय का क्रम तो कहा। अब प्रपंच की उत्पत्ति का क्रम किस तरह होता है, वह आप कहिए। मैं उसका तत्त्व जानना चाहता हूँ।'

तथेत्युक्त्वा गुरुरित्युवाच—यथाऽनादिसर्वप्रपञ्चो दृश्यते। नित्योऽनित्यो वेति संशयते। प्रपञ्चोऽपि द्विविधः। विद्याप्रपञ्चश्चाविद्याप्रपञ्चश्चेति। विद्याप्रपञ्चस्य नित्यत्वं सिद्धमेव नित्यानन्दचिद्विलासात्मकत्वात् अथ च शुद्धबुद्धमुक्तसत्यानन्दस्वरूपत्वाच्च। अविद्याप्रपञ्चस्य नित्यत्वमनित्यत्वं वा कथमिति। प्रवाहतानित्यत्वं वदन्ति केचन। प्रलयादिकं [कस्य] श्रूयमाणत्वादनित्यत्वं वदन्त्यन्ये। उभयं न भवति। पुनः कथमिति। सङ्कोचविकासात्मकमहामायाविलासात्मक एव सर्वोऽप्यविद्याप्रपञ्चः। परमार्थतो न किञ्चिदस्ति क्षणशून्यानादिमूलाऽविद्याविलासत्वात्। तत्कथमिति। एकमेवाद्वितीयं ब्रह्म। नेह नानाऽस्ति किञ्चन। तस्माद् ब्रह्मव्यतिरिक्तं सर्वं बाधितमेव। सत्यमेव परब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेति ॥2॥

तब गुरु ने 'अच्छा' ऐसा कहकर आगे कहा—'यह जो अनादि काल का प्रपंच दिखाई दे रहा है, वह नित्य है या अनित्य ? ऐसा संशय होता है। और यह प्रपंच भी दो प्रकार का है। एक है विद्याप्रपंच और दूसरा है अविद्याप्रपंच। उनमें से विद्याप्रपंच तो नित्यरूप से सिद्ध ही है, क्योंकि वह नित्यानन्दस्वरूप चैतन्य का विलासरूप ही है। और भी शुद्ध, बुद्ध, मुक्त, सत्य तथा आनन्दस्वरूप ही है। अब अविद्याप्रपंच नित्य या अनित्य किस तरह से है ? कुछ लोग इस अविद्याप्रपंच को प्रवाहरूप से नित्य (परिणामी नित्य) मानते हैं। और कुछ लोग उसे अनित्य भी कहते हैं क्योंकि श्रुतियों में उसका प्रलय आदि सुना जाता है। परन्तु, वास्तव में देखा जाए तो वह नित्य या अनित्य—दोनों नहीं है। कारण यह है कि संकोच और विकास करने वाली महामाया का विलासरूप ही यह सारा अविद्याप्रपंच है। वह इसलिए कि ब्रह्म तो एक और अद्वितीय ही है। उसके अतिरिक्त तो और कुछ है ही नहीं। इसलिए ब्रह्म के अतिरिक्त तो सब कुछ बाधित ही है। केवल परब्रह्म ही सत्य है। ब्रह्म सत्यज्ञानरूप तथा अनन्त है।'

ततः सविलासमूलाऽविद्योपसंहारक्रमः कथमिति ॥3॥

अत्यादरपूर्वकमतिहर्षेण देशिक उपदिशति। चतुर्युगसहस्राणि ब्रह्मणो दिवा भवति। तावता कालेन पुनस्तस्य रात्रिर्भवति। द्वे अहोरात्रे एकं दिनं भवति। तस्मिन्नेकस्मिन् दिने आसत्यलोकानामुदयस्थितिलया जायन्ते। पञ्चदशदिनानि पक्षो भवति। पक्षद्वयं मासो भवति। मासद्वयमृतुर्भवति। ऋतुत्रयमयनं भवति। अयनद्वयं वत्सरो भवति। वत्सरशतं ब्रह्ममानेन ब्रह्मणः परमायुःप्रमाणम्। तावत्कालस्तस्य स्थितिरुच्यते।

स्थित्यन्तेऽण्डविराट्पुरुषः स्वांशं हिरण्यगर्भमभ्येति। हिरण्यगर्भः स्वकारणं परमात्मानमण्डपरिपालकनारायणमभ्येति। पुनर्वत्सरशतं तस्य प्रलयो भवति। तथा जीवाः सर्वे प्रकृतौ प्रलीयन्ते। प्रलये सर्वशून्यं भवति ॥4॥

तब शिष्य ने पुनः पूछा—'तो फिर विलाससहित मूल अविद्या के उपसंहार का क्रम कौन-सा होता है ?' तब उसके विषय में गुरु अति आदरपूर्वक और बड़े हर्ष से उपदेश करने लगे—'चार हजार युगों से ब्रह्मा का एक दिन बनता है। उतने ही समय की उनकी एक रात्रि होती है। वह रात और दिन मिलकर ब्रह्मा का एक पूरा दिवस होता है। उस एक दिवस में सत्यलोक तक के लोकों की उत्पत्ति, स्थिति और नाश हो जाते हैं। पंद्रह दिन का एक पक्ष होता है। दो पक्षों का एक महीना होता है। दो महीनों की एक ऋतु होती है। तीन ऋतुओं का एक अयन होता है। दो अयनों का एक वर्ष होता है। सौ वर्ष का ब्रह्मा का अन्तिम आयुष्य-प्रमाण है। और वह उनके अपने ही काल के मानदण्ड से होता है। उतने ही समय तक उनकी स्थिति कही जाती है। उस स्थिति के अन्त में अण्डविराट् पुरुष अपने अंशरूप हिरण्यगर्भ को प्राप्त होते हैं। उस हिरण्यगर्भ का जो कारण है वह अण्डपरिपालक नारायण परमात्मा की ओर जाता है और फिर से सौ वर्षो के बाद प्रलय होता है। उस समय सभी जीव प्रकृति में लय हो जाते हैं, और प्रलयकाल में सब कुछ शून्य ही हो जाता है।

तस्य ब्रह्मणः स्थितिप्रलयावादिनारायणस्यांशेनावतीर्णस्याण्डपरिपालकस्य महाविष्णोरहोरात्रिसंज्ञिकौ। ते अहोरात्रे एकं दिनं भवति। एवं दिनपक्षमाससंवत्सरादिभेदाच्च तदीयमानेन शतकोटिवत्सरकालस्तस्य स्थितिरुच्यते। स्थित्यन्ते स्वांशं महाविराट्पुरुषमभ्येति। ततः सावरणं ब्रह्माण्डं विनाशमेति। ब्रह्माण्डावरणं विनश्यति तद्धि विष्णोः स्वरूपम्। तस्य तावत्प्रलयो भवति। प्रलये सर्वशून्यं भवति ॥5॥

ब्रह्मा की स्थिति और प्रलय का जो कालमान है, वह आदित्यनारायण के अंश से उत्पन्न महाविष्णु के एक दिन-रात होते हैं। उनके भी वे दोनों दिन-रात मिलकर एक पूरा दिवस होता है और उसी प्रकार दिन, पक्ष, महीना, ऋतु, अयन, वर्ष आदि भेद का अनुसरण करके उनके काल – मान के अनुसार पुरुष के सौ करोड़ वर्ष तक के कालपर्यन्त उनकी स्थिति कही जाती है। उस स्थिति के अन्त में वे महाविष्णु अपने अंशरूप महापुरुष में मिल जाते हैं (महाविराट् में मिल जाते हैं)। इसके बाद आवरणसहित ब्रह्माण्ड का नाश हो जाता है। यही विष्णु का स्वरूप है। उसका प्रथम प्रलय होता है और बाद में, और उस प्रलय में सब शून्य हो जाता है।

अण्डपरिपालकमहाविष्णोः स्थितिप्रलयावादिविराट्पुरुषस्याहोरात्रिसंज्ञिकौ। ते अहोरात्रे एकं दिनं भवति। एवं दिनपक्षमाससंवत्सरादिभेदाच्च तदीयमानेन शतकोटिवत्सरकालस्तस्य स्थितिरुच्यते। स्थित्यन्ते आदिविराट्पुरुषः स्वांशं मायोपाधिकनारायणमभ्येति। तस्य विराट्पुरुषस्य यावत्स्थितिकालस्तावत्प्रलयो भवति। प्रलये सर्वशून्यं भवति ॥6॥

अण्डपरिपालक विष्णु की वह स्थिति और प्रलय का जो कालमान है, वही आदि विराट् पुरुष के दिन-रात होते हैं। वे दिन-रात दोनों मिलकर एक पूरा दिवस होता है। इस प्रकार दिन, पक्ष, महीना, ऋतु, अयन, वर्ष आदि के भेद से उनके कालमान के आधार पर सौ करोड़ वर्ष तक के काल-

पर्यन्त उनकी स्थिति कही जाती है। उस स्थिति के अन्त में आदि विराट् पुरुष अपने अंशरूप मायोपाधिक नारायण में मिल जाते हैं। उस विराट् पुरुष की स्थिति का जितना काल होता है, उतना ही काल प्रलय होता है। प्रलय में सब शून्य हो जाता है।

विराट्स्थितिप्रलयौ मूलाविद्याऽण्डपरिपालकस्यादिनारायणस्याहोरात्रिसंज्ञिकौ। ते अहोरात्रे एकं दिनं भवति। एवं दिनपक्षमाससंवत्सरादिभेदाच्च तदीयमानेन शतकोटिवत्सरकालस्तस्य स्थितिरुच्यते। स्थित्यन्ते त्रिपाद्विभूतिनारायणस्येच्छावशान्निमेषो जायते। तस्मान्मूलाविद्याऽण्डस्य सावरणस्य विलयो भवति। ततः सविलासा मूलाविद्या सर्वकार्योपाधिसमन्विता सदसद्विलक्षणाऽनिर्वाच्या लक्षणशून्याविर्भावतिरोभावात्मिकाऽनाद्यखिलकारणकारणाऽनन्तमहामायाविशेषणविशेषिता परमसूक्ष्ममूलकारणमव्यक्तं विशति। अव्यक्तं विशेद्ब्रह्मणि निरिन्धनो वैश्वानरो यथा। तस्मान्मायोपाधिक आदिनारायणस्तथा स्वस्वरूपं भजति। सर्वे जीवाश्च स्वस्वरूपं भजन्ते। यथा जपाकुसुमसान्निध्याद्रक्तस्फटिकप्रतीतिस्तदभावे शुद्धस्फटिकप्रतीतिः। ब्रह्मणोऽपि मायोपाधिवशात् सगुणपरिच्छिन्नादिप्रतीतिरुपाधिविलयान्निर्गुणनिरवयवादिप्रतीतिरित्युपनिषत् ॥7॥

इत्याथर्वणमहानारायणोपनिषदि मूलाविद्याप्रलयस्वरूपणं नाम तृतीयोऽध्यायः।

विराट् के जो ये स्थिति और प्रलय हैं, वे मूला अविद्या के अण्ड का परिपालन करने वाले आदि नारायण के दिन और रात होते हैं। वे दोनों – रात और दिन – मिलकर पूरा एक दिवस होता है। इस प्रकार दिन, पक्ष, महीना, ऋतु, अयन, वर्ष आदि के भेद से उनके कालमान के अनुसार सौ करोड़ वर्षों के काल तक उनकी स्थिति कही जाती है। उस स्थिति के अन्त में त्रिपाद्विभूतिनारायण की आँख की उन्हीं की इच्छा से एक पलक होती है। इससे मूल अविद्या के अण्ड का आवरणसहित प्रलय हो जाता है। इसके बाद विलासों के साथ वह मूला अविद्या सर्वकार्यरूप उपाधि समेत, परमसूक्ष्म मूलकारण अविद्या में प्रवेश करती है। वह मूल अविद्या सत् और असत् से अथवा सत्-असत् से विलक्षण रूप से बताना (लक्षित करना) असंभव है। वह लक्षणशून्य है। वह आविर्भाव-तिरोभावरूप है। वह अनादि है, सभी कारणों का वह कारण है। वह 'अनन्त महामाया'—ऐसे विशेषण से युक्त है। बाद में कालहीन अग्नि जैसा वह अव्यक्त ब्रह्म में प्रवेश करता है। इससे मायोपाधिक आदिनारायण उस प्रकार के अपने स्वरूप को प्राप्त होते हैं। और सभी जीव अपने स्वरूप को प्राप्त होते हैं। जैसे जपाकुसुम के पास रखने से स्फटिक मणि लाल दिखाई देती है और उसे हटा लेने से स्फटिक मणि शुद्ध दिखाई देती है, वैसे ही ब्रह्म भी मायारूप उपाधि के कारण सगुण, प्रमेयरूप आदि रूपों में दिखाई देता है परन्तु उपाधि के लय होने से निर्गुण, अवयवरहित आदि रूप में दिखाई देता है। ऐसा यह उपनिषद् कहती है।

इस प्रकार आथर्वण-महानारायणोपनिषद् में 'मूलाविद्यास्वरूपनिरूपण' नामक तृतीय अध्याय समाप्त होता है।

❋

चतुर्थोऽध्यायः

ॐ ततस्तस्मान्निर्विशेषमतिनिर्मलं भवति। अविद्यापादमतिशुद्धं भवति। शुद्धबोधानन्दलक्षणकैवल्यं भवति। ब्रह्मणः पादचतुष्टयं निर्विशेषं भवति। अखण्डलक्षणाखण्डपरिपूर्णसच्चिदानन्दस्वप्रकाशं भवति। अद्वितीयमनीश्वरं भवति। अखिलकार्यकारणस्वरूपमखण्ड-चिद्घनानन्दस्वरूपमतिदिव्यमङ्गलाकारं निरतिशयानन्दतेजोराशिविशेषं सर्वपरिपूर्णानन्तचिन्मयस्तम्भाकारं शुद्धबोधानन्दविशेषाकारमनन्त-चिद्विलासविभूतिसमष्ट्याकारमद्भुतानन्दाश्चर्यविभूतिविशेषाकारमनन्त-परिपूर्णानन्ददिव्यसौदामिनीनिचयाकारम्। एवमाकारमद्वितीयाखण्डा-नन्दब्रह्मस्वरूपं निरूपितम् ॥1॥

ॐ इस कारण से ब्रह्म निर्विशेष और निर्मल है। अविद्या का पाद बहुत ही शुद्ध है। शुद्ध बोध और आनन्द का लक्षण युक्त कैवल्यपद है। ब्रह्म के चारों पद निर्विशेष हैं। ब्रह्म स्वयं अखण्ड लक्षणयुक्त अखण्डपरिपूर्ण सच्चिदानन्दस्वरूप और स्वयंप्रकाशित है। और भी, वह अद्वितीय और स्वयं के सिवा अन्य ईश्वररहित है। वह समग्र कार्य-कारण स्वरूप, अखण्डचैतन्य से घिरा हुआ है। वह अत्यन्त दिव्य और मंगल स्वरूपवाला है। निरतिशय आनन्द और तेज के राशि जैसा है। वह सर्वथा परिपूर्ण और अनन्त चैतन्य के स्तम्भ जैसा, शुद्ध बोध और विशिष्ट आनन्द का स्वरूप है। वह अनन्त चैतन्य विलासों की विभूतिरूप, समष्टि आकार रूप, अद्भुत आनन्द और आश्चर्य की विशिष्ट विभूतिरूप और अनन्त आनन्दरूप दिव्य विद्युत् के समूह जैसे रूप वाला है। ऐसे आकारवाला अद्वितीय अखण्ड आनन्दरूप ब्रह्म का स्वरूप वर्णित है।

अथ छात्रो वदति। भगवन् पादभेदादिकं कथं कथमद्वैतस्वरूपमिति निरूपितम् ॥2॥

देशिकः परिहरति। विरोधो न विद्यते। ब्रह्माद्वितीयमेव सत्यम्। तथैवोक्तं च। ब्रह्मभेदो न कथितो ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति। पादभेदादिकथनं तु ब्रह्मस्वरूपकथनमेव। तदेवोच्यते। पादचतुष्ट-यात्मकं ब्रह्म तत्रैकमविद्यापादं पादत्रयममृतं भवति। शाखाऽन्तरो-पनिषत्स्वरूपमेव निरूपितम् ॥3॥

यह सुनकर शिष्य पूछता है—'हे भगवन्! अलग-अलग पाद-भेद होने पर भी ब्रह्म को अद्वैतस्वरूप से क्यों प्रतिपादित किया गया है ?' तब गुरु उसकी शंका का समाधान करते हैं—'इसमें कोई विरोध नहीं है। पारमार्थिक दृष्टि से ब्रह्म तो अद्वितीय ही है। इसी अभिप्राय से कहा गया है कि ब्रह्म में कुछ भी भेद नहीं है। ब्रह्म से अलग कुछ है ही नहीं। जो पाद आदि भेद कहे गए हैं, वे तो ब्रह्म का स्वरूप ही कहा गया है। वही बताया जाता है कि ब्रह्म चार पादों वाला है। उनमें एक अविद्यापाद है, और तीन पाद अमृत हैं। अन्य शाखाओं की उपनिषदों में भी इसी स्वरूप का निरूपण किया गया है।

तमसस्तु परं ज्योतिः परमानन्दलक्षणम्।
पादत्रयात्मकं ब्रह्म कैवल्यं शाश्वतं परम् ॥4॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाय ॥5॥
सर्वेषां ज्योतिषां ज्योतिस्तमसः परमुच्यते ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं परंज्योतिस्तमस उपरि विभाति ॥6॥

तमस से (अविद्या से) परे परमज्योति है। वह परमानन्दरूप लक्षणयुक्त है। तीन पादात्मक ब्रह्म, कैवल्य, सनातन और सबसे परे हैं। मैं उस महान् पुरुष को जानता हूँ, जो आदित्य (सूर्य) जैसे वर्ण (तेज) वाला है और जो तमस से ऊपर उठा है (परे है)। उसी को जानकर मनुष्य मृत्यु का अतिक्रमण कर सकता है। मोक्ष के लिए (शाश्वत स्थान के लिए) अन्य कोई भी मार्ग नहीं है। वह सभी ज्योतियों का भी ज्योति है और तमस् से परे है। वह सर्व का विधाता है, उसका स्वरूप अचिन्त्य है, सूर्य जैसे तेज वाला है, जो तमस् से ऊपर उठकर (तमस् को लांघकर) प्रकाशित हो रहा है।

यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ।
तदेवर्तं तदु सत्यमाहुस्तदेव सत्यं तदेव ब्रह्म परमं विशुद्धम् ॥7॥
कथ्यते तमश्शब्देनाविद्या ॥8॥
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।
त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवात् पुनः ।
ततो विष्वङ् व्यक्रामत् साशनाऽनशने अभि ॥9॥
विद्याऽऽनन्दतुरीयाख्यपादत्रयममृतं भवति ।
अवशिष्टमविद्याश्रयमिति ॥10॥

जो एक, अव्यक्त, अनन्तरूपधारी, सर्वस्वरूप पुराण (अत्यन्त पुरातन) और तमस् से परे है, उसी को ऋत और सत्य कहा जाता है। और वही सत्य तथा वही विशुद्ध परब्रह्म कहा जाता है। यहाँ 'तमस्' शब्द से अविद्या कही गई है। ये जो सभी भूत हैं, वे ब्रह्म का एक पाद है। ब्रह्म के जो शेष के तीन पाद हैं, वे अमृतस्वरूप हैं और दिव्यलोक में हैं। तीन पादों वाले वे पुरुष ऊर्ध्वस्थान में उदित हुए हैं, इस लोक में उनका एक पाद था। फिर वह एक पाद चारों ओर विशेष गतिमान हुआ। यह जो चारों ओर अन्नयुक्त और अन्नरहित जो कुछ भी दिखाई दे रहा है, वह उसी का रूप है। विद्या, आनन्द और तुरीय नामक तीन पाद अमृत हैं। शेष एक पाद अमृत के आश्रयवाला है।

आत्मारामस्यादिनारायणस्य कीदृशावुन्मेषनिमेषौ तयोः स्वरूपं कथमिति ॥11॥
गुरुर्वदति। पराग्दृष्टिरुन्मेषः। प्रत्यग्दृष्टिर्निमेषः। प्रत्यग्दृष्ट्या स्वस्वरूपचिन्तनमेव निमेषः। पराग्दृष्ट्या स्वस्वरूपचिन्तमेवोन्मेषः। यावदुन्मेषकालस्तावन्निमेषकालो भवति। अविद्यायाः स्थितिरुन्मेषकाले निमेषकाले तस्याः प्रलयो भवति। यथा उन्मेषो जायते तथा चिरन्तनातिसूक्ष्मवासनाबलात् पुनरविद्याया उदयो भवति। यथापूर्वमविद्याकार्याणि जायन्ते। कार्यकारणोपाधिभेदाज्जीवेश्वरभेदोऽपि दृश्यते।
कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।
ईश्वरस्य महामाया तदाज्ञावशवर्तिनी ॥12॥

शिष्य ने पुनः पूछा—'आत्माराम आदित्यनारायण के नेत्रों का मिलन और उन्मीलन कैसा है ? (उनके उन्मेष-निमेष का स्वरूप क्या है ?) तब गुरु ने कहा—'बाहर की भेददृष्टि ही उनके नेत्रों का उन्मेष (खुलना) है। और भीतर की अभेददृष्टि नेत्रों का निमेष (बन्द होना) है। प्रत्यक् दृष्टि से –भीतर की अभेददृष्टि से स्वरूप का चिन्तन करना ही निमेष है और पराक् दृष्टि से – बाहर की भेददृष्टि से स्वस्वरूप का चिन्तन करना ही उन्मेष है। जितना उन्मेष काल होता है, उतना ही निमेष काल भी होता है। उन्मेष काल में अविद्या की स्थिति होती है और निमेषकाल में उस स्थिति का प्रलय हो जाता है। जिस प्रकार से उन्मेष होता है, उसी प्रकार से पुरानी अतिसूक्ष्म वासनाओं के बल से फिर से अविद्या का उदय होता है। इसलिए उस समय में पहले की ही तरह से अविद्या के कार्य उत्पन्न होते हैं। कार्य और कारणरूप उपाधि के भेद से जीव और ईश्वर—ऐसा भेद भी दिखाई देता है। कार्य की उपाधिवाला जीव है, और कारण की उपाधिवाला ईश्वर है। ईश्वर की महामाया उनकी आज्ञा के वश में रहने वाली अर्थात् ईश्वर की इच्छानुसार वर्तन करने वाली है।

तत्सङ्कल्पानुसारिणी विविधानन्तमहामायाशक्तिसुसेविता अनन्तमहामायाजालजननमन्दिरा महाविष्णोः क्रीडाशरीररूपिणी ब्रह्मादीनामगोचरा। एतां महामायां तरन्त्येव ये विष्णुमेव भजन्ति। नान्ये तरन्ति कदाचन विविधोपायैरपि ॥13॥

उनके संकल्पों का अनुसरण करने वाली एवं महामाया की (अपनी) विविध और अनन्त शक्तियों से सम्पन्न ऐसी वह अनन्त महामाया अनेक प्रपंचों को उत्पन्न करने का स्थान है। वह महाविष्णु के क्रीडाशरीर का स्वरूप है। वह ब्रह्मादिकों को भी अगम्य है। जो लोग विष्णु को भजते हैं, वे ही इस महामाया को पार कर सकते हैं। अन्य लोग तो कभी इस महामाया को तैर नहीं सकते। विविध प्रकार के उपायों से भी इसे पार नहीं कर सकते।

अविद्याकार्याण्यन्तःकरणान्यतीत्य कालान्यनन्तानि जायन्ते। ब्रह्मचैतन्यं तेषु प्रतिबिम्बितं भवति। प्रतिबिम्बा एव जीवा इति कथ्यन्ते। अन्तःकरणोपाधिकाः सर्वे जीवा इत्येवं वदन्ति। महाभूतोत्थसूक्ष्माङ्गोपाधिकाः सर्वे जीवा इत्येके वदन्ति। बुद्धिप्रतिबिम्बितचैतन्यं जीवा इत्यपरे मन्यन्ते। एतेषामुपाधीनामत्यन्तभेदो न विद्यते। सर्वपरिपूर्णो नारायणस्त्वनया निजया क्रीडति स्वेच्छया सदा। तद्वदविद्यमानफल्गुविषयसुखाशयाः सर्वे जीवाः प्रधावन्त्यसारसंसारचक्रे। एवमनादिपरम्परा वर्ततेऽनादिसंसारविपरीतभ्रमादित्युपनिषत् ॥14॥

इत्याथर्वणमहानारायणोपनिषदि महामायाऽतीताखण्डाद्वैतपरमानन्दलक्षणपरब्रह्मणः परमतत्त्वस्वनिरूपणं नाम चतुर्थोऽध्यायः।

पूर्वकाण्डः समाप्तः।

क्योंकि वे विविध उपायों से अविद्याकार्यरूप अन्तःकरणों को चाहे पार कर भी लें, तो भी एक निश्चित काल के बाद फिर से वे अन्तःकरणों में जन्म लेते हैं, अर्थात् उन अन्तःकरणों में चैतन्य का प्रतिबिम्ब पड़ता है। जीव ब्रह्म के प्रतिबिम्ब ही कहे जाते हैं। सभी जीव अन्तःकरण की उपाधि वाले

हैं, ऐसा विद्वान् लोग कहते हैं। कुछ लोग कहते हैं कि वे सब जीव महाभूतों से उत्पन्न हुए सूक्ष्मशरीररूप उपाधिवाले हैं। और कुछ अन्य लोग ऐसा भी मानते हैं कि बुद्धि में प्रतिबिम्बित हुआ चैतन्य ही जीव है। परन्तु इन उपाधियों में कोई अत्यन्त भेद नहीं है। परिपूर्ण नारायण जिस प्रकार अपनी इच्छा से सभी प्रकार से क्रीडा करते हैं, उसी प्रकार वास्तव में असत्य और क्षुद्र विषयसुख की इच्छावाले सभी जीव इस असार संसारचक्र में दौड़ा ही करते हैं। इस प्रकार अनादि ससार रूप भ्रम होने के कारण यह अनादि परंपरा चलती ही रहती है। क्योंकि यह अनादि संसार रूप भ्रम बना हुआ है, ऐसा यह उपनिषद् कहती है।

इस प्रकार आथर्वण-महानारायणोपनिषद् में परमतत्त्वस्वनिरूपण
नामक चतुर्थ अध्याय समाप्त हुआ।

❋

पञ्चमोऽध्यायः

अथ शिष्यो वदति गुरुं भगवन्तं नमस्कृत्य भगवन् सर्वात्मना नष्टाया अविद्यायाः पुनरुदयः कथम् ॥1॥
सत्यमेवेति गुरुरिति होवाच। प्रावृट्कालप्रारम्भे यथा मण्डूकादीनां प्रादुर्भावस्तद्वत् सर्वात्मना नष्टाया अविद्याया उन्मेषकाले पुनरुदयो भवति ॥2॥

शिष्य ने पुनः गुरु भगवान् को नमस्कार करके पूछा—'हे भगवन्! सब प्रकार से यदि एक बार अविद्या नष्ट हो गई हो, तो भी उसका फिर से उदय क्यों होता है?' तब गुरु ने कहा—'यह बात ठीक है, परन्तु, जैसे वर्षाकाल के आरंभ होते ही मेंढ़कों की उत्पत्ति हो जाती है, वैसे ही सब प्रकार से नष्ट हुई अविद्या का फिर से उदय हो जाता है'।

भगवन् कथं जीवानामनादिसंसारभ्रमः। तन्निवृत्तिर्वा कथमिति। कथं मोक्षमार्गस्वरूपं च। मोक्षसाधनं कथमिति। को वा मोक्षोपायः। कीदृशं मोक्षस्वरूपम्। का वा सायुज्यमुक्तिः। एतत् सर्वं तत्त्वतः कथनीयमिति ॥3॥

इसके बाद शिष्य ने फिर पूछा—'हे भगवन्! जीवों को अनादि संसार का जो भ्रम हुआ है, वह दूर कैसे हो सकता है? मोक्षमार्ग का स्वरूप कैसा है? मोक्ष का साधन क्या है? मोक्ष का उपाय क्या है? मोक्ष का स्वरूप कैसा है? सायुज्य मुक्ति कौन-सी है? यह सब मुझे तत्त्वतः (सही स्वरूप में) कहिए।'

अत्यादरपूर्वकमतिहर्षेण शिष्यं बहूकृत्य गुरुर्वदति—श्रूयतां सावधानेन। कुत्सितानन्तजन्माभ्यस्तात्यन्तोत्कृष्टविविधविचित्रानन्तदुष्कर्मवासनाजालविशेषैर्देहात्मविवेको न जायते। तस्मादेव दृढतरदेहात्मभ्रमो भवति। अहमज्ञः किंचिज्ज्ञोऽहमहं जीवोऽहमत्यन्तदुःखाकारोऽहमनादिसंसारीति भ्रमवासनाबलात् संसार एव प्रवृत्तिः। तन्निवृत्त्युपायः कदाऽपि न विद्यते। मिथ्याभूतान् स्वप्नतुल्यान् विषयभोगाननुभूय विविधानसंख्यानतिदुर्लभान् मनोरथाननवरतमाशास्यमान अतृप्तः सदा

परिधावति। विविधविचित्रस्थूलसूक्ष्मोत्कृष्टनिकृष्टानन्तदेहान् परिगृह्य तत्तद्देहविहितविविधविचित्रानेकशुभाशुभप्रारब्धकर्माण्यनुभूय तत्तत् कर्मफलवासनाजालवासितान्तःकरणानां पुनःपुनस्तत्तत्कर्मफलविषय-प्रवृत्तिरेव जायते। संसारनिवृत्तिमार्गप्रवृत्तिरपि न जायते। तस्माद-निष्टमेवेष्टमिव भाति। इष्टमेवानिष्टमिव भात्यनादिसंसारविपरीतभ्रमात्। तस्मात् सर्वेषां जीवानामिष्टविषये बुद्धिः सुखबुद्धिर्दुःखबुद्धिर्भवति। परमार्थतस्त्वबाधितब्रह्मसुखविषये प्रवृत्तिरेव न जायते तत्स्वरूप-ज्ञानाभावात्। तत्किमिति न विद्यते। कथं बन्धः कथं मोक्ष इति विचाराभावाच्च। तत्कथमिति। अज्ञानप्राबल्यात्। कस्मादज्ञान-प्राबल्यमिति। भक्तिज्ञानवैराग्यवासनाऽभावाच्च। तदभावः कथमिति। अत्यन्तान्तःकरणमालिन्यविशेषात् ॥4॥

यह सुनकर अति आदरपूर्वक अतिहर्ष से शिष्य की प्रशंसा करते हुए गुरु बोले—'सावधान होकर सुनो। निन्दनीय और जन्मजन्मान्तर से परिशीलित ऐसी अत्युत्कृष्ट तथा अतिनिन्दनीय विविध, विचित्र, अनन्त दुष्ट कर्मों की तरह-तरह की वासनाओं के कारण देह और आत्मा का विवेक ज्ञान नहीं हो सकता। इसीलिए तो देह के ऊपर आत्मा की मान्यता का अतिदृढ भ्रम उत्पन्न होता है। 'मैं अज्ञानी हूँ', 'मैं अल्पज्ञ हूँ', 'मैं जीव हूँ', 'मैं दुःखों की बड़ी निधि हूँ', 'मैं अनादि संसारी हूँ'—ऐसी-ऐसी भ्रामक वासनाओं के बल से संसार में ही प्रवृत्ति हुआ करती है। इससे इसकी निवृत्ति का उपाय कभी भी देखा (जाना) नहीं जा सकता। स्वप्न जैसे मिथ्या विषयभोगों का अनुभव करके भाँति-भाँति के असंख्य और अतिदुर्लभ मनोरथों की निरन्तर आशा करता हुआ अतृप्त जीव सदैव दौड़ा ही करता है। तरह-तरह के विचित्र स्थूल-सूक्ष्म-उत्तम-अधम-अनन्त देहों को स्वीकार करके उस-उस देह के द्वारा किए गए विविध-विचित्र-अनेक-शुभाशुभ प्रारब्ध कर्मों का अनुभव करके, उन-उन कार्यों के फलों की अनेक वासनाओं से जिनके अन्तःकरण वासित हो गए हों, उन लोगों की प्रवृत्ति घूम-घूम कर फिर से वहीं – उन कर्मफलों के विषयों में ही – होती रहती है। परन्तु उनकी प्रवृत्ति कभी भी संसार की निवृत्ति के मार्ग में नहीं होती। इससे उनको अनिष्ट भी इष्ट जैसा मालूम होता है और इष्ट भी अनिष्ट जैसा मालूम होता है। क्योंकि उन्हें अनादिसंसार का विपरीत भ्रम हुआ करता है। इसका कारण यह है कि उन्हें उसके स्वरूप का सच्चा ज्ञान ही नहीं है। और वह क्या है, यह भी वे नहीं जानते। और बन्धन क्यों होता है, और मोक्ष किस प्रकार मिल सकता है, ऐसा विचार तक उन लोगों को नहीं आता। क्योंकि उनमें तो अज्ञान की ही प्रबलता होती है। ऐसे अज्ञान की प्रबलता भी इसलिए होती है कि उनमें भक्ति और ज्ञान की वासना नहीं होती। भक्ति-ज्ञान-वैराग्य की वासना का अभाव भी इसलिए होता है कि उनमें अन्तःकरण की बहुत मलिनता होती है।

अतः संसारतरणोपायः कथमिति ॥5॥

देशिकस्तमेव कथयति। सकलवेदशास्त्रसिद्धान्तरहस्यजन्मजन्माभ्य-स्तात्यन्तोत्कृष्टसुकृतपरिपाकवशात् सद्भिः सङ्गो जायते। तस्माद्विधि-निषेधविवेको भवति। ततः सदाचारप्रवृत्तिर्जायते। सदाचारादखिल-दुरितक्षयो भवति। तस्मादन्तःकरणमतिविमलं भवति ॥6॥

शिष्य ने पूछा—'तब संसार को पार करने का क्या उपाय है ?' तब गुरु कहते हैं—'समग्र

वेदशास्त्रों के सिद्धान्तों के रहस्य से यह समझा जा सकता है कि जन्मजन्मान्तर में आचरण किए गए अतिउत्कृष्ट पुण्य के परिपाक से ही सज्जनों का संग होता है। इससे विधि-निषेध का विवेक होता है। उससे सदाचार में प्रवृत्ति होती है। सदाचार से सभी पापों का नाश होता है और उससे अन्तःकरण अति निर्मल हो जाता है।

ततः सद्गुरुकटाक्षमन्तःकरणमाकाङ्क्षति। तस्मात् सद्गुरुकटाक्षलेश-विशेषेण सर्वसिद्धयः सिद्ध्यन्ति। सर्वबन्धाः प्रविनश्यन्ति। श्रेयोविघ्नाः सर्वे प्रलयं यान्ति। सर्वाणि श्रेयांसि स्वयमेवायान्ति। यथा जात्यन्धस्य रूपज्ञानं न विद्यते तथा गुरूपदेशेन विना कल्पकोटिभिस्तत्त्वज्ञानं न विद्यते। तस्मात् सद्गुरुकटाक्षलेशविशेषेणाचिरादेव तत्त्वज्ञानं भवति ॥7॥

इसके बाद, वह अन्तःकरण सद्गुरु के कृपा-भरे कटाक्ष को चाहता है। सद्गुरु के कृपाकटाक्ष के लेशमात्र से भी सभी सिद्धियाँ प्राप्त हो जाती हैं, सब बन्धन नष्ट हो जाते हैं, कल्याण के मार्ग में आने वाले सभी विघ्न नष्ट हो जाते हैं, सभी कल्याण अपने आप ही प्राप्त हो जाते हैं। जैसे जन्मान्ध मनुष्य को रंग का ज्ञान नहीं होता, वैसे ही गुरु के उपदेश के बिना करोड़ों कल्पों में भी तत्त्वज्ञान नहीं हो सकता। परन्तु सद्गुरु के कृपाकटाक्ष के लेशमात्र से भी तुरंत तत्त्वज्ञान हो जाता है।

यदा सद्गुरुकटाक्षो भवति तदा भगवत्कथाश्रवणध्यानादौ श्रद्धा जायते। तस्माद्धृदयस्थिताऽनादिदुर्वासनाग्रन्थिविनाशो भवति। ततो हृदय-स्थिताः कामाः सर्वे विनश्यन्ति। तस्माद्धृदयपुण्डरीककर्णिकायां परमात्माविर्भावो भवति ॥8॥

जिस समय गुरु का कृपा-कटाक्ष होता है, उस समय भगवान् की कथा के श्रवण, ध्यान, आदि में श्रद्धा उत्पन्न होती है। इसके बाद हृदय में स्थित अनादि दुष्ट वासनाओं की ग्रन्थियाँ नष्ट हो जाती हैं। इससे हृदयस्थित सभी कामनाएँ नष्ट हो जाती हैं। इसके बाद हृदयकमल की कली में परमात्मा का प्राकट्य होता है।

ततो दृढतरा वैष्णवी भक्तिर्जायते। ततो वैराग्यमुदेति। वैराग्याद्बुद्धि-विज्ञानाविर्भावो भवति। अभ्यासात्तज्ज्ञानं क्रमेण परिपक्वं भवति ॥9॥

इसके बाद, अतिशय दृढ विष्णु-भक्ति उत्पन्न होती है। इसके बाद वैराग्य होता है। वैराग्य से बुद्धि में विज्ञान का आविर्भाव होता है। बाद में परिशीलन करते रहने से वह विज्ञान परिपक्व हो जाता है।

पक्वविज्ञानाज्जीवन्मुक्तो भवति। ततः शुभाशुभकर्माणि सर्वाणि सवासनानि नश्यन्ति। ततो दृढतरशुद्धसात्त्विकवासनया भक्त्यतिशयो भवति। भक्त्यतिशयेन नारायणः सर्वमयः सर्वावस्थासु प्रविभाति। सर्वाणि जगन्ति नारायणमयानि प्रविभान्ति। नारायणव्यतिरिक्तं न किञ्चिदस्ति। इत्येतद्बुद्ध्या विहरत्युपासकः सर्वत्र ॥10॥
निरन्तरसमाधिपरंपराभिर्जगदीश्वराकाराः सर्वत्र सर्वावस्थासु प्रविभान्ति। अस्य महापुरुषस्य क्वचित्क्वचिदीश्वरसाक्षात्कारो भवति ॥11॥

परिपक्व ज्ञान से जीवन्मुक्त होता है। इसके बाद वासनाओं के साथ सभी शुभ-अशुभ कर्म नष्ट हो जाते हैं। और उसके बाद अति दृढ और शुद्ध सात्त्विक वासना से भक्ति की अतिशयता प्रकट होती है और भक्ति की अतिशयता से सभी अवस्थाओं में सर्वमय श्रीनारायण प्रकाशित हो उठते हैं। तब यह सारा जगत् श्रीनारायणमय ही दिखाई देता है। और 'नारायण से कुछ भी अलग नहीं है'—ऐसा अनुभव कर वह उपासक सर्वत्र विहार करता है। निरन्तर समाधि की अवस्थाएँ बढ़ती रहने से सभी जगह, सभी अवस्थाओं में जगदीश्वर का स्वरूप दिखाई देता है। उस महापुरुष को कभी-कभी ईश्वर का साक्षात्कार भी होता है।

अस्य देहत्यागेच्छा यदा भवति तदा वैकुण्ठपार्षदाः सर्वे समायान्ति। ततो भगवद्ध्यानपूर्वकं हृदयकमले व्यवस्थितमात्मानं स्वमन्तरात्मानं सञ्चिन्त्य सम्यगुपचारैरभ्यर्च्य हंसमन्त्रमुच्चरन् सर्वाणि द्वाराणि संयम्य सम्यङ् मनो निरुध्य चोर्ध्वगेन वायुना सह प्रणवेन प्रणवानुसंधानपूर्वकं शनैः शनैराब्रह्मरन्ध्राद्विनिर्गत्य सोऽहमिति मन्त्रेण द्वादशान्तस्थित-परमात्मानमेकीकृत्य पञ्चोपचारैरभ्यर्च्य पुनः सोऽहमिति मन्त्रेण षोडशान्तस्थितज्ञानात्मानमेकीकृत्य सम्यगुपचारैरभ्यर्च्य प्राकृतपूर्वदेहं परित्यज्य पुरःकल्पितमन्त्रमयशुद्धब्रह्मतेजोमयनिरतिशयानन्दमयमहा-विष्णुसारूप्यविग्रहं परिगृह्य सूर्यमण्डलान्तर्गतानन्तदिव्यचरणारविन्दा-ङ्गुष्ठनिर्गतनिरतिशयानन्दमयामरनदीप्रवाहमाकृष्य भावनयाऽत्र स्नात्वा वस्त्राभरणाद्युपचारैरात्मपूजां विधाय साक्षान्नारायणो भूत्वा ततो गुरु-नमस्कारपूर्वकं प्रणवगरुडं ध्यात्वा ध्यानेनाविर्भूतमहाप्रणवगरुडं पञ्चो-पचारैराराध्य गुर्वनुज्ञया प्रदक्षिणनमस्कारपूर्वकं प्रणवगरुडमारुह्य महाविष्णोः समस्तासाधारणचिह्नचिह्नितो महाविष्णोः समस्तासाधारण-दिव्यभूषणैर्भूषितः सुदर्शनपुरुषं पुरस्कृत्य विष्वक्सेनपरिपालितो वैकुण्ठपार्षदैः परिवेष्टितो नभोमार्गमाविश्य पार्श्वद्वयस्थितानेकपुण्य-लोकानतिक्रम्य तत्रत्यैः पुण्यपुरुषैरभिपूजितः सत्यलोकमाविश्य ब्रह्माणमभ्यर्च्य ब्रह्मणा च सत्यलोकवासिभिः सर्वैरभिपूजितः शैवमीशानकैवल्यमासाद्य शिवं ध्यात्वा शिवमभ्यर्च्य शिवगणैः सर्वैः शिवेन चाभिपूजितो महर्षिमण्डलानतिक्रम्य सूर्यसोममण्डले भित्त्वा कीलकनारायणं ध्यात्वा ध्रुवमण्डलस्य दर्शनं कृत्वा भगवन्तं ध्रुवमभि-पूज्य ततः शिंशुमारचक्रं विभिद्य शिंशुमारप्रजापतिमभ्यर्च्य चक्रमध्यगतं सर्वाधारं सनातनं महाविष्णुमाराध्य तेन पूजितस्तत उपर्युपरि गत्वा परमानन्दं प्राप्य प्रकाशते ॥12॥

जब उसको शरीर के त्याग की इच्छा होती है, तब वैकुण्ठ के सभी पार्षद उसके स्वागत के लिए सामने आते हैं। तब वह भगवान् का ध्यान करके अपने हृदयस्थ अन्तरात्मा का चिन्तन करता है, और बाद में सुचारु रीति से उपचारों के द्वारा उनका पूजन करता है। हंसमन्त्र का उच्चारण करता हुआ वह सभी इन्द्रियरूपी द्वारों को बन्द कर देता है। मन को ठीक तरह से वश में लाता है। बाद में ऊर्ध्वगतिवाले प्राणवायु के साथ प्रणवमन्त्र के अनुसन्धानपूर्वक धीरे-धीरे ब्रह्मरन्ध्र से बाहर

निकलता है। बाद में 'सोऽहं' इस मन्त्र से बारह इन्द्रियों की पश्चाद् भू में अवस्थित परमात्मा के साथ, अपने आत्मा को एक करके पंचोपचार से उनकी पूजा करता है, और बाद में पुन: 'सोऽहं' इस मन्त्र से सोलह इन्द्रियों के पीछे अवस्थित ज्ञानात्मा को अपने आत्मा के साथ एकीकृत करके यथोचित उपचारों से उनकी पूजा करके प्राकृत पूर्वदेह का त्याग करता है। बाद में कल्पित मन्त्रमय और शुद्ध ब्रह्म के तेजोमय-निरतिशय-आनन्दमय महाविष्णु के समान रूपवाले शरीर को स्वीकार करता है। इसके बाद, सूर्यमण्डल के भीतर अवस्थित अनन्त भगवान् के दिव्य चरणकमल के अंगुष्ठ से निकली हुई निरतिशय आनन्दमय अलौकिक नदी के प्रवाह को आकर्षित करके भावनापूर्वक उसमें स्नान करता है। इसके बाद वस्त्रालंकार आदि उपचारों से अपने आत्मा की पूजा करके साक्षात् नारायणस्वरूप हो जाता है। बाद में गुरु-नमस्कारपूर्वक प्रणवरूप गरुड का ध्यान करता है। ऐसा ध्यान करने से प्रणवरूप गरुड वहाँ प्रकट होते हैं। अत: पंच उपचारों से प्रणवगरुड की पूजा करके गुरु की अनुज्ञा से उसकी प्रदक्षिणा, नमस्कार आदि करके उसपर सवार होता है। बाद में महाविष्णु के सभी असाधारण चिह्नों से युक्त होकर वह महाविष्णु के सभी असाधारण भूषणों से भूषित होता है। उसके बाद, सुदर्शन पुरुष को आगे करके वह विष्वक्सेन भगवान् से रक्षित होते हुए और वैकुण्ठ के पार्षदों से आवृत होकर आकाशमार्ग में प्रवेश करता है। वहाँ अपने दोनों ओर स्थित अनेक पवित्र लोकों का अतिक्रमण करके, वहाँ के पवित्र पुरुषों के द्वारा पूजित होकर सत्यलोक में प्रवेश करता है। वहाँ वह ब्रह्मा की पूजा करता है। इसलिए ब्रह्मा और सत्यलोकवासी लोग उसकी भी पूजा सामने से करते हैं। इसके बाद शिव के ईशान कैवल्यधाम में वह पहुँचता है। वहाँ शिव का ध्यान करके वह शिव की पूजा करता है। इसलिए सामने से शिव स्वयं और शिव के सभी गण भी उसकी प्रतिपूजा करते हैं। इसके बाद वह सभी महर्षियों के मण्डलों का अतिक्रमण करके सूर्यमण्डल और चन्द्रमण्डल से भी आगे जाकर कीलकनारायण (सभी के केन्द्र अर्थात् मध्य में स्थित खूँटा या आधार) का ध्यान करके ध्रुवमण्डल के दर्शन करता है। फिर भगवान् ध्रुव की पूजा करके वहाँ से शिंशुमार चक्र में प्रवेश करता है। वहाँ वह शिंशुमार प्रजापति की पूजा करके उस चक्र के बीच में स्थित सर्वाधार सनातन महाविष्णु की आराधना करता है। इससे उन महाविष्णु के द्वारा भी सामने से प्रतिपूजित होकर वह ऊपर से भी ऊपर जाते हुए परमानन्द को प्राप्त करके प्रकाशित होता है।

ततो वैकुण्ठवासिनः सर्वे समायान्ति। तान् सर्वान् सुसम्पूज्य तैः सर्वैरभिपूजितश्चोपर्युपरि गत्वा विरजानदीं प्राप्य तत्र स्नात्वा भगवद्ध्यानपूर्वकं पुनर्निमज्ज्य तत्रापञ्चीकृतभूतोत्थसूक्ष्माङ्गं भोगसाधनं सूक्ष्मशरीरमुत्सृज्य केवलमन्त्रमयदिव्यतेजोमयनिरतिशयानन्दमयमहाविष्णुसारूप्यविग्रहं परिगृह्य तत उन्मज्ज्यात्मपूजां विधाय प्रदक्षिणनमस्कारपूर्वकं ब्रह्ममयवैकुण्ठमाविश्य तत्रत्यान् विशेषेण सम्पूज्य तन्मध्ये च ब्रह्मानन्दमयानन्तप्राकारप्रासादतोरणविमानोपवनावलिभिर्ज्वलच्छिखरैरुपलक्षितो निरुपमनित्यनिरवद्यनिरतिशयनिरवधिकब्रह्मानन्दाचलो विराजते ॥13॥

इसके बाद सब वैकुण्ठवासी उसके सामने स्वागत करने के लिए आते हैं। इसलिए वह उन सभी की अच्छी तरह से पूजा करता है। तब वे सब भी उसकी प्रतिपूजा करते हैं। फिर वहाँ से ऊपर ही ऊपर जाते हुए वह विरजा नाम की नदी पर पहुँचता है। उसमें स्नान करने के बाद भगवान् का नाम

लेकर फिर से उसमें एक डुबकी लगाकर अपंचीकृत भूतों से उत्पन्न हुए सूक्ष्म अंगभोग के साधनरूप सूक्ष्म शरीर का उसमें त्याग कर देता है। बाद में केवलमन्त्रमय, दिव्यतेजोमय और निरतिशय आनन्दमय महाविष्णु के समान स्वरूपवाले शरीर को स्वीकार करके उस नदी में से बाहर निकलकर आत्मा की पूजा करने के बाद ब्रह्ममय वैकुण्ठधाम में प्रदक्षिणा और नमस्कार करके प्रवेश करता है। फिर वहाँ के निवासियों की पूजा करता है। उस धाम के बीच ब्रह्मानन्दमय नाम का एक पर्वत शोभित हो रहा है, जो ब्रह्मानन्दमय, अनेक किलों वाला है, अनेक महलों, तोरणों, विमानों तथा बाग-बगीचों की पंक्तियों से प्रकाशित शिखरों वाला है। वह पर्वत नित्य, निर्दोष, निरतिशय और निरवधि रूप से विराजमान है।

तदुपरि ज्वलति निरतिशयानन्ददिव्यतेजोराशिः। तदभ्यन्तरसंस्थाने शुद्धबोधानन्दलक्षणं विभाति। तदन्तराले चिन्मयवेदिका आनन्द-वेदिका आनन्दवनविभूषिता। तदभ्यन्तरे अमिततेजोराशिस्तदुपरि ज्वलति। परममङ्गलासनं विराजते। तत्पद्मकर्णिकायां शुद्धशेषो भोगासनं विराजते। तस्योपरि समासीनमानन्दपरिपालकमादिनारायणं ध्यात्वा तमीश्वरं विविधोपचारैराराध्य प्रदक्षिणनमस्कारान् विधाय तदनुज्ञातश्चोपर्युपरि गत्वा पञ्चवैकुण्ठानतीत्याण्डविराट्कैवल्यं प्राप्य तं समाराध्योपासकः परमानन्दं प्रापेत्युपनिषत् ॥14॥

इत्याथर्वणमहानारायणोपनिषदि संसारतरणोपायकथनद्वारा
परममोक्षमार्गस्वरूपनिरूपणं नाम पञ्चमोऽध्यायः।

उसके ऊपर निरतिशय आनन्दस्वरूप दिव्य तेजोराशि प्रकाशित हो रहा है। उसके बीच के स्थान में शुद्ध ज्ञान तथा आनन्द का लक्षण प्रकाशित है। और उसके बीच चैतन्यमय वेदिका है। वह आनन्दमय पीठिका और आनन्दमय वन से सुशोभित है। उसके ऊपर मध्य भाग में अमित तेजोराशि प्रकाशित हो रहा है, उस पर मंगलमय आसन शोभित है। उस आसनरूप कमल की कली में शुद्ध शेष भगवान् के शरीररूपी आसन विराजित है। उस आसन पर आनन्दपरिपालक आदिनारायण बैठे हुए हैं। उस ईश्वर का ध्यान करके उपासक विविध उपचारों से उनका आराधन करता है। बाद में उनकी प्रदक्षिणा और नमस्कार करके उनकी अनुमति प्राप्त करके ऊपर ही ऊपर जाते हुए पाँच वैकुण्ठधामों का अतिक्रमण करके अण्डविराट् नाम के कैवल्यपद को प्राप्त करता है। वहाँ उनका आराधन करके उपासक परमानंद को प्राप्त करता है, ऐसा यह उपनिषद् कहती है।

इस प्रकार आथर्वण-महानारायणोपनिषद् में परमतत्त्वस्वनिरूपण
नामक पञ्चम अध्याय समाप्त हुआ।

❈

षष्ठोऽध्यायः

तत उपासकः परमानन्दं प्राप। सावरणं ब्रह्माण्डं च भित्त्वा परितः समवलोक्य ब्रह्माण्डस्वरूपं निरीक्ष्य परमार्थतस्तत्स्वरूपं ब्रह्मज्ञानेनाव-बुध्य समस्तवेदशास्त्रेतिहासपुराणानि समस्तविद्याजालानि ब्रह्मादयः

सुराः सर्वे समस्ताः परमर्षयश्चाण्डाभ्यन्तरप्रपञ्चैकदेशमेव वर्णयन्ति। अण्डस्वरूपं न जानन्ति। ब्रह्माण्डाद्बहिः प्रपञ्चज्ञानं न जानन्त्येव। कुतोऽण्डान्तरान्तर्बहिः प्रपञ्चज्ञानं दूरतो मोक्षप्रपञ्चज्ञानमविद्याप्रपञ्चज्ञानं चेति ॥1॥

कथं ब्रह्माण्डस्वरूपमिति ॥2॥

अब जहाँ वह उपासक परमानन्द को प्राप्त हुआ होता है, वहाँ वह आवरणसहित ब्रह्माण्ड को भेदकर उसके चारों ओर देखकर वह ब्रह्माण्ड के स्वरूप का निरीक्षण करता है। इससे पारमार्थिक रूप से वह ब्रह्मज्ञान के द्वारा उसके स्वरूप को समझ सकता है। सभी वेद, शास्त्र, पुराण, इतिहास, सभी विद्याओं के समूह, ब्रह्मादि देव और सब महर्षि—ये सब तो ब्रह्माण्ड के भीतर स्थित प्रपंच के केवल एक भाग का ही (एक प्रदेश विशेष का ही) वर्णन करते हैं। पूरे ब्रह्माण्ड का वर्णन वे जानते नहीं है। क्योंकि ब्रह्माण्ड के बाहर के प्रपंच का ज्ञान तो उन्हें है ही नहीं। क्योंकि ब्रह्माण्ड के बीच, भीतर और बाहर का जो प्रपंचज्ञान है, और उससे भी दूर मोक्षप्रपंचज्ञान और अविद्याप्रपंचज्ञान है। इसलिए ब्रह्माण्ड के पूरे स्वरूप को तो वे भला कैसे पहचान पाएँगे ?

कुक्कुटाण्डाकारं महदादिसमष्ट्याकारमण्डं तपनीयमयं तप्तजाम्बूनद-प्रभमुद्यत्कोटिदिवाकराभं चतुर्विधसृष्ट्युपलक्षितं महाभूतैः पञ्चभिरावृतं महदहंकृतितमोभिश्च मूलप्रकृत्या परिवेष्टितम् ॥3॥

अण्डभित्तिविशालं सपादकोटियोजनप्रमाणम्। एकैकावरणं तथैव ॥4॥

अण्डप्रमाणं परितोऽयुतद्वयकोटियोजनप्रमाणं महामण्डूकाद्यनन्तशक्ति-भिरधिष्ठितं नारायणक्रीडाकन्तुकं परमाणुवद्विष्णुलोकसुसंलग्नमदृष्टा-श्रुतविविधविचित्रानन्तविशेषैरुपलक्षितम् ॥5॥

यह ब्रह्माण्ड मुर्गी के अण्डे के आकार जैसा है। महत्तत्त्व आदि समष्टि के आकारवाला है। सुवर्णमय है, तपाए हुए सोने जैसी कान्तिवाला है, उदीयमान करोड़ों सूर्य जैसे प्रकाशवाला है, चार प्रकार की सृष्टि से युक्त है, पाँच महाभूतों से आवृत है, तथा चारों ओर महत्तत्त्व, अज्ञान, अहंकार और मूल प्रकृति से घिरा हुआ है। इस ब्रह्माण्ड की दीवार की विशालता सवा करोड़ योजन के प्रमाण की है, एवं उसका एक-एक आवरण भी उतने ही प्रमाण का है। पूरे ब्रह्माण्ड का प्रमाण चारों ओर से दो करोड़ योजन के प्रमाण में है। महामण्डूक आदि अनेक अनन्त शक्तियों से वह आश्रित है। नारायण को खेलने की गेंद की तरह वह है। परमाणु की तरह वह विष्णुलोक से संलग्न (लगा हुआ) है, और किसी के द्वारा अनदेखी और अनसुनी अनेक तरह की विशेषताओं से वह युक्त है।

अस्य ब्रह्माण्डस्य समन्ततः स्थितान्येतादृशान्यनन्तकोटिब्रह्माण्डानि सावरणानि ज्वलन्ति ॥6॥

चतुर्मुखपञ्चमुखषण्मुखसप्तमुखाष्टमुखादिसंख्याक्रमेण सहस्रावधि-मुखान्तैर्नारायणांशैः रजोगुणप्रधानैरेकैकसृष्टिकर्तृभिरधिष्ठितानि विष्णु-महेश्वराख्यैर्नारायणांशैः सत्त्वतमोगुणप्रधानैरेकैकस्थितिसंहारकर्तृभिर-धिष्ठितानि महाजलौघमत्स्यबुद्बुदानन्तसङ्घवद् भ्रमन्ति ॥7॥

क्रीडासक्तजालककरतलामलकवृन्दवन्महाविष्णोः करतले विलसन्त्य-नन्तकोटिब्रह्माण्डानि ॥8॥

जलयन्त्रस्थघटमालिकाजालवन्महाविष्णोरेकैकरोमकूपान्तरेष्वनन्तकोटि-ब्रह्माण्डानि सावरणानि भ्रमन्ति ॥9॥

इस ब्रह्मांड के चारों ओर ऐसे अनन्त करोड़ों ब्रह्माण्ड आवरणसहित प्रकाशित हो रहे हैं। उनमें चतुर्मुखी, पंचमुखी, षण्मुखी, सप्तमुखी, अष्टमुखी आदि संख्यात्मक मुखवाले से लेकर सहस्रमुखी नारायण के अंश प्रतिष्ठित हैं। उनमें रजोगुण मुख्य होता है। वे सब एक-एक सृष्टि को रचने वाले हैं और उनमें विष्णु तथा महेश्वर नाम के नारायण के अंश भी स्थित हैं। वे अंश सत्त्वगुण तथा तमोगुण की प्रधानता वाले होते हैं, तथा एक-एक स्थिति तथा एक-एक संहार के करने वाले होते हैं। वे अनन्तकोटि ब्रह्माण्ड बड़े जलप्रवाह में रहते हुए मत्स्यों और बुद्बुदों की तरह भ्रमण किया करते हैं। और क्रीडा में तल्लीन किसी बालक की हथेली में रखे हुए आँवला के फलों की तरह महाविष्णु की हथेली में शोभित होते हैं। और पानी खींचने के यन्त्र (रेंहट) में लगी हुई घटमाल की तरह से अनन्तकोटि ब्रह्माण्ड महाविष्णु के प्रत्येक रोम में (प्रत्येक रोमछिद्र में) आवरणों के साथ घूमते रहते हैं।

समस्तब्रह्माण्डान्तर्बहिः प्रपञ्चरहस्यं ब्रह्मज्ञानेनावबुध्य विविधविचित्रानन्तपरमविभूतिसमष्टिविशेषान् समवलोक्यात्याश्चर्यामृतसागरे निमज्ज्य निरतिशयानन्दपारावारो भूत्त्वा समस्तब्रह्माण्डजालानि समुल्लङ्घ्यामितापरिच्छिन्नानन्ततमःसागरमुत्तीर्य मूलाविद्यापुरं दृष्ट्वा विविधविचित्रानन्तमहामायाविशेषैः परिवेष्टिताम् अनन्तमहामायाशक्तिसमष्ट्याकाराम् अनन्तदिव्यतेजोज्वालाजालैरलंकृताम् अनन्तमहामायाविलासानां परमाधिष्ठानविशेषाकारां शश्वदमितानन्दाचलोपरि विहारिणीं मूलप्रकृतिजननीम् अविद्यालक्ष्मीमेवं ध्यात्वा विविधोपचारैराराध्य समस्तब्रह्माण्डसमष्टिजननीं वैष्णवीं महामायां नमस्कृत्य तया चानुज्ञातश्चोपर्युपरि गत्वा महाविराट्पदं प्राप ॥10॥

उन समस्त ब्रह्माण्डों के भीतर और बाहर के प्रपंचों का मर्म ब्रह्मज्ञान के द्वारा जानकर वह उपासक विविध प्रकार की विचित्र और अनन्तश्रेष्ठ विभूतियों के समष्टिविशेषों को देखकर अति आश्चर्यकारक आनन्दसागर में अवगाहित होता है (मग्न हो जाता है) और बाद में निरतिशय आनन्द का स्वरूप बनकर सभी ब्रह्माण्डों के समूहों का अतिक्रमण करके अमाप-अनन्त-अगाध अज्ञानसागर से परे (पार करके ऊपर) सामने वाले तीर पर पहुँचकर मूल अविद्यानगर के दर्शन करता है। बाद में, वहाँ अनेक प्रकार से अद्भुत तथा अनेक भाँति की महामायाओं से आवृत, अनेक महामायाओं की शक्तिसमष्टि रूप आकारवाली, अनन्त दिव्य तेज की ज्वालाओं के समूहों से शोभित, अनन्त महामायाओं के विलासों के परम अधिष्ठानरूप, विशिष्ट आकृतिवाली, सनातनकालीन अप्रमेय आनन्दरूप पर्वत पर विहार करने वाली, प्रकृति की माता ऐसी श्रीअविद्यालक्ष्मी का चिन्तन करके, विविध उपचारों से उनकी पूजा करके समस्त ब्रह्माण्डों की समष्टि-जननी वैष्णवी महामाया को नमस्कार करता है। बाद में वह उनकी अनुमति लेकर वहाँ से भी ऊपर ही ऊपर जाते हुए महाविराट् के स्थान में पहुँचता है।

महाविराट्स्वरूपं कथमिति ॥11॥

समस्ताविद्यापादको विराट् ॥12॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन् देव एकः ॥13॥
न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति ॥14॥
मनोवाचामगोचरमादिविराट्स्वरूपं ध्यात्वा विविधोपचारैराराध्य तदनुज्ञातश्चोपर्युपरि गत्वा विविधविचित्रानन्तमूलाविद्याविलासानवलोक्योपासकः परमकौतुकं प्राप ॥15॥

'उस महाविराट् का स्वरूप कैसा है' ?—समस्त अविद्याओं का पाद ही विराट् है। चारों ओर आँखों वाला, चारों ओर मुख वाला, चारों ओर हाथों वाला और चारों ओर पैरों वाला वह देव है। वह विराट् देव मनुष्यों को दो हाथों से युक्त बनाता है, और पक्षियों को दो पंखों से युक्त बनाता है। स्वर्ग और पृथ्वी को भी वही उत्पन्न करता है। उस विराट्देव का स्वरूप दृष्टि का विषय नहीं बनता। इसलिए नेत्रों से वह देखा नहीं जा सकता ऐसे उन महान् देव की कल्पना हृदय से, मन से और बुद्धि से की गई है। जो लोग इस प्रकार जानते हैं, वे अमर हो जाते हैं। इस प्रकार मन और वाणी के अविषय ऐसे उन आदि विराट् के स्वरूप का ध्यान करके, विविध उपचारों से उनकी पूजा करने के बाद, उनकी अनुमति लेकर साधक वहाँ से भी ऊपर (आगे) बढ़ता है और वहाँ अनेक प्रकार से अद्भुत और अनन्त ऐसी मूल अविद्या के विलासों को देखकर वह साधक परम आश्चर्य को प्राप्त करता है।

अखण्डपरिपूर्णपरमानन्दलक्षणपरब्रह्मणः समस्तस्वरूपविरोधकारिणी अपरिच्छिन्नतिरस्करिण्याकारा वैष्णवी महायोगमाया मूर्तिमद्भिरनन्तमहामायाजालविशेषैः परिषेविता। तस्याः पुरमतिकौतुकमत्याश्चर्यसागरानन्दलक्षणममृतं भवति। अविद्यासागरप्रतिबिम्बितनित्यवैकुण्ठप्रतिवैकुण्ठमिव विभाति ॥16॥

क्योंकि वह वैष्णवी महायोगमाया अखण्ड परिपूर्ण परमानन्दस्वरूप लक्षणवाले, परब्रह्म के समस्त स्वरूप का विरोध करने वाली है। वह अपरिच्छिन्न (अमेय) पर्दे जैसे आकारवाली है। मूर्तिधारिणी और अनेक विविध महामायाएँ चारों ओर उसकी सेवा कर रही होती हैं। उसका नगर बड़ा ही कौतुक उत्पन्न करने वाला है और वह अनन्त आश्चर्य के सागर जैसा आनन्दमय लक्षणयुक्त है इसलिए अमर है। वह अविद्यारूपी सागर में प्रतिबिम्बित हुए नित्य वैकुण्ठ के सामने मानों दूसरा वैकुण्ठ खडा हुआ हो, ऐसा मालूम पड़ता है।

उपासकस्तत्पुरं प्राप्य योगलक्ष्मीमङ्गमायां ध्यात्वा विविधोपचारैराराध्य तया सम्पूजितश्चानुज्ञातश्चोपर्युपरि गत्वा अनन्तयोगमायाविलासानवलोक्योपासकः परमकौतुकं प्राप ॥17॥

उपासक उस नगर में पहुँचकर अंगमाया योगलक्ष्मी का ध्यान करता है। और विविध उपचारों से उनकी पूजा करता है। बाद में उनकी अनुमति लेकर वहाँ से भी ऊपर ही ऊपर जाता है। वहाँ अनन्त माया के विलासों को देखकर उपासक को बड़ा कौतुक प्राप्त होता है।

तत उपरि पादविभूतिवैकुण्ठपुरमाभाति। अत्याश्चर्यानन्तविभूति-समष्ट्याकारम् आनन्दरसप्रवाहैरलङ्कृतम् अमिततरङ्गिण्याः प्रवाहैरति-मङ्गलं ब्रह्मतेजोविशेषाकारैरनन्तब्रह्मवनैरभितस्ततम् अनन्तनित्य-मुक्तैरभिव्याप्तम् अनन्तचिन्मयप्रासादजालसङ्कुलम् अनादिपाद-विभूतिवैकुण्ठमेवमाभाति। तन्मध्ये च चिदानन्दाचलो विभाति ॥18॥

बाद में उसके ऊपर पादविभूति नाम का वैकुण्ठ शोभित है। वह अत्यन्त आश्चर्यमय अनन्त समष्टि विभूतियों के आकारवाला है। आनन्दरस के प्रवाहों से वह अलंकृत है। उसके चारों ओर उस आनन्दमयी नदी के प्रवाहों के कारण वह अति मंगलमय है। ब्रह्मतेज के विशेष आकाररूप अनन्त ब्रह्मवनों से वह चारों ओर से व्याप्त है। अनन्त नित्यमुक्तों से वह चारों ओर से घिरा हुआ है। अनन्त चैतन्यमय महलों के कारण वह संकुल (सिकुड़ा) हुआ-सा है। ऐसा वह अनादिपाद विभूति वैकुण्ठनगर शोभित हो रहा है। उसके बीच एक चिदानन्द नाम का पर्वत प्रकाशित है।

तदुपरि ज्वलति निरतिशयानन्ददिव्यतेजोराशिः। तदभ्यन्तरे परमानन्द-विमानं विभाति। तदभ्यन्तरसंस्थाने चिन्मयासनं विराजते। तत्पद्म-कर्णिकायां निरतिशयदिव्यतेजोराश्यन्तरसमासीनम् आदिनारायणं ध्यात्वा विविधोपचारैस्तं समाराध्य तेनाभिपूजितस्तदनुज्ञातश्चोपर्युपरि गत्वा सावरणमविद्याऽण्डं च भित्त्वाऽविद्यापादमुल्लङ्घ्य विद्या-ऽविद्ययोः सन्धौ विष्वक्सेनवैकुण्ठपुरमाभाति ॥19॥

उस पर्वत के ऊपर निरतिशय आनन्दस्वरूप दिव्य तेज की एक राशि प्रज्वलित हो रही है। उसके भीतर परमानन्द नाम का एक विमान है। उसके भीतर के उत्तम स्थान में एक चैतन्यमय आसन शोभित हो रहा है। उस आसनरूपी कमल की कली में निरतिशय दिव्य तेज की राशि के बीच श्रीआदिनारायण बैठे हुए हैं। उनका ध्यान करके विविध उपचारों से साधक उनकी पूजा करता है। भगवान् भी सामने से उसकी पूजा करते हैं। और बाद में वह उपासक उनकी भी अनुमति लेकर वहाँ से भी ऊपर ही ऊपर अविद्या वाले ब्रह्माण्ड को आवरण के साथ ही भेदकर अविद्या के पद को भी अतिक्रान्त कर देता है। वहाँ विद्या और अविद्या की सन्धि में विश्वक्सेन नाम का वैकुण्ठ शोभायमान है।

अनन्तदिव्यतेजोज्वालाजालैरभितोऽनिशं प्रज्वलन्तम् अनन्तबोधानन्द-व्यूहैरभितस्ततं शुद्धबोधविमानावलिभिर्विराजितम् अनन्तानन्दपर्वतैः परमकौतुकमाभाति। तन्मध्ये च कल्याणाचलोपरि शुद्धानन्दविमानं विभाति। तदभ्यन्तरे दिव्यमङ्गलासनं विराजते। तत्पद्मकर्णिकायां ब्रह्मतेजोराश्यभ्यन्तरसमासीनं भगवदनन्तविभूतिविधिनिषेधपरिपालकं सर्वप्रवृत्तिसर्वहेतुनिमित्तकं निरतिशयानन्दलक्षणमहाविष्णुस्वरूपम् अखिलापवर्गपरिपालकम् अमितविक्रमम् एवंविधं विष्वक्सेनं ध्यात्वा प्रदक्षिणनमस्कारान् विधाय विविधोपचारैराराध्य तदनुज्ञातश्चोपर्युपरि गत्वा विद्याविभूतिं प्राप्य विद्यामयान् अनन्तवैकुण्ठान् परितोऽव-स्थितान् ब्रह्मतेजोमयानवलोक्योपासकः परमानन्दं प्राप ॥20॥

वह नगर अनन्त दिव्य तेज की ज्वालाओं से चारों ओर व्याप्त होकर प्रकाशित हो रहा है। अनन्त ज्ञान के भी भीतर के ज्ञान (रहस्य-मर्म) के आनन्द के व्यूहों से वह व्याप्त है। शुद्ध ज्ञानमय विमानों की पंक्तियों से वह शोभित है, और अनन्त आनन्दमय पर्वतों से परम कौतुकरूप में वह देदीप्यमान है। उसके बीच में कल्याण नाम का एक पर्वत स्थित है। उसके ऊपर शुद्ध आनन्द नाम का विमान शोभायमान है। उसके भीतर एक दिव्य मंगलमय आसन सुशोभित है। उस आसनरूपी कमल की कली में ब्रह्मतेज की राशि है। उसके भीतर निरतिशय लक्षणयुक्त महाविष्णु का स्वरूप प्रतिष्ठित है। वह स्वरूप भगवान् की अनन्तविभूतिरूप विधिनिषेध का सर्व प्रकार से पालन करता है। सभी प्रवृत्तियों के सभी हेतुओं का वह स्वरूप निमित्त है। वे महाविष्णु संपूर्ण मोक्ष के परिपालक हैं और अप्रमेय पराक्रमशाली हैं। इस प्रकार के उन विश्वक्सेन का ध्यान करके, प्रदक्षिणा और नमस्कार करके और उनकी पूजा करके उनकी अनुमति लेकर उपासक वहाँ से और भी ऊपर ही ऊपर जाता है और अविद्याविभूति में पहुँचता है। वहाँ विद्यामय और वैकुण्ठों के चारों ओर फैले हुए ब्रह्मतेजोमय स्वरूप को देखकर वह उपासक परम आनन्द को प्राप्त करता है।

विद्यामयान् अनन्तसमुद्रान् अतिक्रम्य ब्रह्मविद्यातरङ्गिणीमासाद्य तत्र स्नात्वा भगवद्ध्यानपूर्वकं पुनर्निमज्ज्य मन्त्रमयशरीरमुत्सृज्य विद्या-ऽऽनन्दमयामृतदिव्यशरीरं परिगृह्य नारायणसारूप्यं प्राप्य आत्मपूजां विधाय ब्रह्ममयवैकुण्ठवासिभिः सर्वैर्नित्यमुक्तैः सुपूजितस्ततो ब्रह्म-विद्याप्रवाहैरानन्दरसनिर्भरैः क्रीडानन्तपर्वतैरनन्तैरभिव्याप्तं ब्रह्मविद्या-मयैः सहस्त्रं प्राकारैरानन्दामृतमयैर्दिव्यगन्धस्वभावैश्चिन्मयैरनन्तब्रह्म-वनैरतिशोभितमुपासकस्त्वेवंविधं ब्रह्मविद्यावैकुण्ठमाविश्य तदभ्य-न्तरस्थितात्यन्तोन्नतबोधानन्दप्रासादाग्रस्थितप्रणवविमानोपरिस्थिताम् अपारब्रह्मविद्यासाम्राज्याधिदेवताम् अमोघनिजमन्दकटाक्षेणाऽनादि-मूलाविद्याप्रलयकरीम् अद्वितीयाम् एकाम् अनन्तमोक्षसाम्राज्यलक्ष्मीमेवं ध्यात्वा प्रदक्षिणनमस्कारान् विधाय विविधोपचारैराराध्य पुष्पाञ्जलिं समर्प्य स्तुत्वा स्तोत्रविशेषैस्तयाऽभिपूजितस्तदनुज्ञातश्चोपर्युपरि गत्वा ब्रह्मविद्यातीरे गत्वा बोधानन्दमयाननन्तवैकुण्ठानवलोक्य निरतिशया-नन्दं प्राप्य बोधानन्दमयाननन्तसमुद्रानतिक्रम्य गत्वागत्वा ब्रह्मवनेषु परममङ्गलाचलश्रेणिषु ततो बोधानन्दविमानपरम्परासूपासकः परमानन्दं प्राप ॥21॥

तत्पश्चात् विद्यामय अनन्त समुद्रों को लाँघकर 'ब्रह्मविद्या' नाम की नदी पर जाकर उसमें स्नान करता है। फिर भगवान् का ध्यान करते हुए फिर से उसमें डुबकी लगाकर मन्त्रमय शरीर का त्याग करके विद्या के आनन्दमय अमर दिव्य शरीर को स्वीकार करता है। और बाद में नारायण के समान स्वरूप को प्राप्त करता है और आत्मा की पूजा करता है। इसके बाद, ब्रह्ममय वैकुण्ठ में बसने वाले सभी नित्यमुक्त लोग उसकी अच्छी तरह से पूजा करते हैं। फिर आनन्दरस से परिपूर्ण, ब्रह्मविद्या के प्रवाहों से तथा क्रीडायोग्य असंख्य पर्वतों से व्याप्त तथा ब्रह्मविद्यामय हजारों किलों से युक्त, आनन्दमय, अमृतमय दिव्य गन्ध के सहजगुण वाले, चैतन्यमय अनन्त ब्रह्म भवनों से अतिशोभायमान ऐसे 'ब्रह्मविद्या' नाम के वैकुण्ठधाम में साधक प्रवेश करता है। और उसके भीतर प्रतिष्ठित अनन्त

मोक्षसाम्राज्य की लक्ष्मी का इस प्रकार ध्यान करता है। और बाद में प्रदक्षिणा, नमस्कारादि करके, विविध उपचारों से उनकी पूजा करके पुष्पों की अंजलि देता है, और विविध स्तोत्रों से उनकी स्तुति करता है। इसलिए वह देवी भी उस साधक की प्रतिपूजा करती हैं और उसका अनुसरण करती हैं। फिर वहाँ से भी ऊपर ही ऊपर जाते हुए वह ब्रह्मविद्या के तीर पर पहुँचता है। और वहाँ ज्ञानमय तथा आनन्दमय अनंत वैकुण्ठों के दर्शन करता है। फिर निरतिशय आनन्द को प्राप्त करके ज्ञान तथा आनन्दमय अनेक समुद्रों को पार करके परममंगल नाम के पर्वत के बीच के भागों में जो ब्रह्मवन आए हुए हैं, वहाँ जाता है। और वहाँ ज्ञान तथा आनन्दमय विमानों की परंपरा में वह उपासक परम आनन्द प्राप्त करता है।

ततः श्रीतुलसीवैकुण्ठपुरमाभाति परमकल्याणम् अनन्तविभवम् अमिततेजोराश्याकारम् अनन्तब्रह्मतेजोराशिसमष्ट्याकारं चिदानन्दमयानेकप्राकारविशेषैः परिवेष्टितम् अमितबोधानन्दाचलोपरिस्थितं बोधानन्दतरङ्गिण्याः प्रवाहैरतिमङ्गलं निरतिशयानन्दैरनन्तवृन्दावनैरतिशोभितम् अखिलपवित्राणां परमपवित्रं चिद्रूपैरनन्तनित्यमुक्तैरत्यभिव्याप्तम् आनन्दमयानन्तविमानजालैरलंकृतम् अमिततेजोराश्यन्तर्गतदिव्यतेजोराशिविशेषम् ॥22॥

उपासकस्त्वेवमाकारं तुलसीवैकुण्ठं प्रविश्य तदन्तर्गतदिव्यविमानो-परिस्थितां सर्वपरिपूर्णस्य महाविष्णोः सर्वाङ्गेषु विहारिणीं निरतिशयसौन्दर्यलावण्याधिदेवतां बोधानन्दमयैरनन्तनित्यपरिजनैः परिषेवितां श्रीसखीं तुलसीमेवं लक्ष्मीं ध्यात्वा प्रदक्षिणनमस्कारान् विधाय विविधोपचारैराराध्य स्तुत्वा स्तोत्रविशेषैस्तयाऽभिपूजितस्तत्रत्यैश्चाभिपूजितस्तदनुज्ञातश्चोपर्युपरि गत्वा परमानन्दतरङ्गिण्यास्तीरे गत्वा तत्र परितोऽवस्थितान् शुद्धबोधानन्दमयान् अनन्तवैकुण्ठानवलोक्य निरतिशयानन्दं प्राप्य तत्रत्यैश्चिद्रूपैः पुराणपुरुषैश्चाभिपूजितस्ततो गत्वागत्वा ब्रह्मवनेषु दिव्यगन्धानन्दपुष्पवृष्टिभिः समन्वितेषु दिव्यमङ्गलालयेषु निरतिशयानन्दामृतसागरेष्वमिततेजोराश्याकारेषु कल्लोलवनसंकुलेषु ततोऽनन्तशुद्धबोधविमानजालसङ्कुलानन्दाचलश्रेणिषूपासकस्तत उपर्युपरि गत्वा विमानपरम्परास्वनन्ततेजःपर्वतराजिष्वेवं क्रमेण प्राप्य विद्याऽऽनन्दमययोः सन्धिं तत्राऽऽनन्दतरङ्गिण्याः प्रवाहेषु स्नात्वा बोधानन्दवनं प्राप्य शुद्धबोधपरमानन्दाकारवनं सन्ततामृतपुष्पवृष्टिभिः परिवेष्टितं परमानन्दप्रवाहैरभिव्याप्तं मूर्तिमद्भिः परममङ्गलैः परमकौतुकम् अपरिच्छिन्नानन्दसागराकारं क्रीडाऽऽनन्दपर्वतैरभिशोभितं तन्मध्ये च शुद्धबोधानन्दवैकुण्ठं यदेव ब्रह्मविद्यापादवैकुण्ठं सहस्रानन्दप्राकारैः समुज्ज्वलति। अनन्तानन्दविमानजालसंकुलम् अनन्तबोधसौधविशेषैरभितोऽनिशं प्रज्वलन्तं क्रीडाऽनन्तमण्डपविशेषैर्विशेषितं बोधानन्दमयानन्तपरमच्छत्रध्वजचामरवितानतोरणैरलंकृतं परमानन्दव्यूहैर्नित्यमुक्तैरभितस्ततम् अनन्तदिव्यतेजः पर्वतसमष्ट्याकरम् अपरिच्छिन्नानन्तशुद्धबोधानन्दमण्डलं वाचामगोचरानन्दब्रह्मतेजोराशि-

मण्डलम् अखण्डतेजोमण्डलविशेषं शुद्धानन्दविशेषसमष्टिमण्डल-विशेषम् अखण्डचिद्घनानन्दविशेषम् ॥23॥

बाद में श्रीतुलसीवैकुण्ठ नामक नगर शोभित होता है। वह नगर परमकल्याणरूप तथा अनन्त वैभवशाली, अमित तेजोराशिरूप आकारवाला, अनन्त ब्रह्मतेज के समष्टि समूहस्वरूप, चैतन्यमय और आनन्दमय, तरह-तरह के अनेक दुर्गों से घिरा हुआ 'अमित बोधानन्द' नाम के पर्वत पर बसा हुआ, 'ज्ञानानन्द' नाम की नदी के प्रवाहों से अत्यन्त मंगल-अनन्त-निरतिशय-आनन्दयुक्त वृन्दावनों से बहुत ही शोभायमान, सभी पवित्रों से भी पवित्र चैतन्यरूप अनन्त नित्यमुक्तों से चारों ओर व्याप्त, आनन्दमय अनन्त विमानों से अलंकृत, और अमित तेजोराशि में विद्यमान दिव्य तेज के विशिष्ट ओजस्वी है। इस प्रकार के स्वरूप वाले तुलसीवैकुण्ठ में प्रविष्ट होकर, उसके भीतर अवस्थित दिव्य विमान के ऊपर बैठी हुई, सर्वथा परिपूर्ण, श्रीमहाविष्णु के सभी अंगों में विहार करने वाली, निरतिशय सौन्दर्य और लावण्य की अधिष्टात्री देवी, ज्ञानमय एवं आनन्दमय अनन्त नित्य सेवकों के द्वारा सर्वप्रकार से सेवित और श्रीदेवी की सखी ऐसी श्रीतुलसीलक्ष्मी का इस प्रकार से ध्यान करके, नमस्कार तथा प्रदक्षिणा करके विविध उपचारों से उनका आराधन करता है। और तरह-तरह के स्तोत्रों से उनकी पूजा करता है। इसलिए तुलसी भी उसकी प्रतिपूजा करती हैं। और वहाँ के लोग भी सामने से उसकी पूजा करते हैं। तुलसी की अनुमति के बाद, वह साधक वहाँ से भी ऊपर-ही-ऊपर जाकर परमानन्द नामक नदी के तीर पर पहुँचता है। और वहाँ चारों ओर से व्याप्त शुद्ध ज्ञानमय तथा आनन्दमय अनन्त वैकुण्ठों के दर्शन करके निरतिशय आनन्द को प्राप्त करता है। फिर वहाँ के निवासी चैतन्यमय पुराणपुरुष सामने से उसकी पूजा करते हैं। फिर वहाँ से निकल कर दिव्य गन्ध और आनन्दमय पुष्प-वृष्टियों से युक्त, दिव्य मंगलों के स्थानरूप, निरतिशय आनन्दमय अमृतसागर जैसे और अमित तेजोराशिरूप आकारवाले ब्रह्मवनों में जाता है। वहाँ से अनन्त शुद्ध ज्ञानरूप विमानों के समूहों से व्याप्त आनन्दमय पर्वतों के मध्यप्रदेश में से होते हुए साधक वहाँ से भी ऊपर जाता है। और विमानों की परंपराओं तथा अनन्त तेजोमय पर्वतों की पंक्तियों पर निष्क्रान्त होकर क्रमशः विद्या और आनन्दमय की सन्धि में जा पहुँचता है और वहाँ आनन्दनदी में स्नान करके बोधानन्द नाम के वन में प्रवेश करता है। वहाँ से वह शुद्धबोध और परमानन्द आकार वाले वन में जाता है। वह वन निरन्तर अमृतमय पुष्पवृष्टियों से युक्त परमानन्द के प्रवाहों से चारों ओर व्याप्त हुआ है। मूर्तिमय श्रेष्ठ मांगल्यों से वह कौतुकमय है। अमित आनंदसागराकार और क्रीडानन्द नाम के पर्वतों से अलंकृत है। उसके बीच शुद्ध बोधानन्द नाम का एक वैकुण्ठधाम है। वही ब्रह्मविद्या का पादरूप वैकुण्ठ है। और वह हजारों आनन्दमय दुर्गों से प्रकाशित हो रहा है और वह अनन्त आनन्दमय विमानों के समूहों से भी व्याप्त है। अनन्त ज्ञानरूप अनेक महलों से चारों ओर से निरंतर प्रकाशित है। क्रीडा करने के लिए अनेकविध मण्डलों से वह युक्त है। बोधानन्दमय अनंत श्रेष्ठ छत्रों, ध्वजों, चामरों, उल्लोचों और तोरणों से वह अलंकृत किया गया है। परमानन्द के व्यूह जैसे नित्यमुक्तों से वह चारों ओर व्याप्त है। अनन्त दिव्य तेज के पर्वतों की समष्टिरूप आकारवाला है और अमित-अनन्त-शुद्ध बोध के अनन्त मण्डल वाला है। वाणी के अगोचर आनन्दमय ब्रह्मतेज की राशियों का मण्डल है। मानों कोई इन्द्र हो, ऐसा लगता है। और शुद्ध आनन्द समष्टियों का विशिष्ट मण्डल तथा अखण्ड चैतन्यघन आनन्द का विशेष हो, ऐसा मालूम पड़ता है।

एवंविधं बोधानन्दवैकुण्ठमुपासकः प्रविश्य तत्रत्यैः सर्वैरभिपूजितः। परमानन्दाचलोपर्यखण्डबोधविमानं प्रज्वलति। तदभ्यन्तरे चिन्मयासनं विराजते ॥24॥

तदुपरि विभात्यखण्डानन्दतेजोमण्डलम्। तदभ्यन्तरसमासीनमादिनारायणं ध्यात्वा प्रदक्षिणनमस्कारान् विधाय विविधोपचारैः सुसम्पूज्य पुष्पाञ्जलिं समर्प्य स्तुत्वा स्तोत्रविशेषैः स्वरूपेणावस्थितमुपासकमवलोक्य तमुपासकमादिनारायणः स्वसिंहासने सुसंस्थाप्य तद्वैकुण्ठवासिभिः सर्वैः समन्वितः समस्तमोक्षसाम्राज्यपट्टाभिषेकमुद्दिश्य मन्त्रपूतैरुपासकमानन्दकलशैरभिषिच्य दिव्यमङ्गलमहावाद्यपुरःसरं विविधोपचारैरभ्यर्च्य मूर्तिमद्भिः सर्वैः स्वचिह्नैरलङ्कृत्य प्रदक्षिणनमस्कारान् विधाय त्वं ब्रह्मासि अहं ब्रह्मास्मि आवयोरन्तरं न विद्यते त्वमेवाहम् अहमेव त्वम् इत्यभिधाय इत्युक्त्वा आदिनारायणस्तिरोदधे तदेत्युपनिषत् ॥25॥

इत्याथर्वणमहानारायणोपनिषदि परममोक्षमार्गस्वरूपनिरूपणं नाम षष्ठोऽध्यायः।

ऐसे तेजोमण्डल समान बोधानन्द नाम के वैकुण्ठ में उपासक प्रवेश करता है। इसलिए वहाँ के सभी लोग सामने से उसकी पूजा करते हैं। वहाँ परमानन्द नाम के पर्वत के ऊपर अखण्डबोध नामक विमान प्रकाशित हो रहा है। उसके भीतर एक चैतन्यमय आसन विराजित है। उसके ऊपर अखण्ड तेजोमय आनन्द का मण्डल प्रकाशित हो रहा है। उसके ऊपर आदिनारायण बैठे हुए हैं। उनका ध्यान करके, प्रदक्षिणा और नमस्कार करके साधक विविध उपचारों से अच्छी तरह उनकी पूजा करता है। और पुष्पांजलि समर्पित करके अनेक प्रकार के स्तोत्रों से उनकी स्तुति करता है। फिर आदिनारायण सामने अपने ही स्वरूप में उपस्थित हुए उस साधक को अपने सिंहासन पर बिठाते हैं। और सभी वैकुण्ठवासी लोगों के साथ रहकर समस्त मोक्ष साम्राज्य के पट्टाभिषेक को उद्दिष्ट करके, मन्त्रों से पवित्र किए गए आनन्द-कलशों से वे उपासक के ऊपर अभिषेक करते हैं। बाद में दिव्य मंगलमय वाद्यों को बजाकर विविध उपचारों से उसकी पूजा करके अपने सभी मूर्त चिह्नों से उसे अलंकृत करते हैं। और उसकी प्रदक्षिणा और नमस्कार करके उससे कहते हैं कि—'तू ब्रह्म है, मैं ब्रह्म हूँ', 'हम दोनों में किसी भी प्रकार का अन्तर नहीं है।' 'तू ही मैं हूँ और मैं ही तू है।' इस प्रकार कहकर आदिनारायण उस समय अदृश्य हो जाते हैं, ऐसा यह उपनिषद् कहती है।

इस प्रकार आथर्वण-महानारायणोपनिषद् में 'परममोक्षमार्गस्वरूपनिरूपण' नामक षष्ठ अध्याय समाप्त हुआ।

सप्तमोऽध्यायः

अथोपासकस्तदाज्ञया नित्यं गरुडमारुह्य वैकुण्ठवासिभिः सर्वैः परिवेष्टितो महासुदर्शनं पुरस्कृत्य विष्वक्सेनपरिपालितश्चोपर्युपरि गत्वा

ब्रह्मानन्दविभूतिं प्राप्य सर्वत्रावस्थितान् ब्रह्मानन्दमयान् अनन्तवैकुण्ठा-नवलोक्य निरतिशयानन्दसागरो भूत्वा आत्मारामान् आनन्दविभूति-पुरुषानन्तानवलोक्य तान् सर्वानुपचारैः समभ्यर्च्य तैः सर्वैरभि-पूजितश्चोपासकस्तत उपर्युपरि गत्वा ब्रह्मानन्दविभूतिं प्राप्य अनन्त-दिव्यतेजःपर्वतैरलंकृतान् परमानन्दलहरीवनशोभितान् असंख्याकान् आनन्दसमुद्रान् अतिक्रम्य विविधविचित्रानन्तपरमतत्त्वविभूतिसमष्टि-विशेषान् परमकौतुकान् ब्रह्मानन्दविभूतिविशेषानतिक्रम्य उपासकः परमकौतुकं प्राप ॥1॥

बाद में उपासक उनकी आज्ञा से नित्य गरुड पर बैठकर वैकुण्ठवासियों से आवृत होकर महासुदर्शन को आगे करके विश्वक्सेन से परिलक्षित होते हुए ऊपर ही ऊपर उठकर ब्रह्मानन्द विभूति में पहुँच जाता है। वहाँ सभी जगहों में आए हुए ब्रह्मानन्दमय अनन्त वैकुण्ठों के दर्शन करके निरतिशय आनन्द का सागर बन जाता है। बाद में आत्माराम तथा आनन्दविभूति नाम के अनन्त पुरुषों का दर्शन करके उन सभी की उपचारों के साथ पूजा करता है। इसलिए वे भी सामने से उसकी पूजा करते हैं। फिर वह उपासक वहाँ से भी ऊपर-ही-ऊपर जाकर ब्रह्मानन्द विभूति में पहुँचता है। वहाँ से आगे अनन्त दिव्य तेजोमय पर्वतों से सुशोभित और परमानंद की लहरों वाले वनों से शोभित आनन्द के असंख्य समुद्रों को पार करके विविध-विचित्र-अनन्त परमतत्त्व की विभूतियों के विशेष समष्टि रूप होने से परमकौतुकमय ऐसी ब्रह्मानन्द की विशेष विभूतियों को अतिक्रान्त करते हुए वह उपासक परमकौतुक का अनुभव करता है।

ततः सुदर्शनवैकुण्ठपुरमाभाति नित्यमङ्गलम् अनन्तविभवं सहस्रानन्द-प्राकारपरिवेष्टितम् अयुतकुक्ष्युपलक्षितम् अनन्तोत्कटज्वलदरमण्डलं निरतिशयदिव्यतेजोमण्डलं वृन्दारकपरमानन्दं शुद्धबुद्धस्वरूपम् अनन्तानन्दसौदामिनीपरमविलासं निरतिशयपरमानन्दपारावारम् अनन्तैरानन्दपुरुषैश्चिद्रूपैरधिष्ठितम् ॥2॥

इसके बाद सुदर्शनवैकुण्ठ नामक नगर शोभित है। वह नित्य मंगलमय और अनन्त वैभवशाली है। वह एक हजार आनन्ददुर्गों से आवृत्त है। दस हजार केन्द्रप्रदेशों से युक्त, अनन्त-उत्कट-प्रकाशमय अरों के मण्डलों वाला, निरतिशय दिव्य तेज के मण्डलवाला, अतिश्रेष्ठ, परमानन्दमय, शुद्धज्ञानस्वरूप, विद्युत् के परम विलासों से युक्त, निरतिशय परमानन्द के सागर जैसा और चैतन्यरूप अनन्त आनन्दपुरुषों के द्वारा बसा हुआ है।

तन्मध्ये च सुदर्शनं महाचक्रम् ॥3॥
चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि।
तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम ॥4॥
लोकस्य द्वारमर्चिमत् पवित्रं ज्योतिष्मद् भ्राजमानं महस्वत्।
अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधातु ॥5॥

उसके बीच सुदर्शन चक्र है। वह गतिशील, पवित्र, सर्वत्र फैला हुआ और पुरातन से भी पुरातन है। इससे पवित्र हुआ पुरुष सभी पापों से छूट जाता है। उस शुद्ध और पवित्र चक्र से पावन हुए हम बड़े पापरूपी शत्रु को पार कर जाते हैं। वह लोक के द्वाररूप है और ज्वालामय (तेजोमय) है। वह

प्रकाशमय है, तेजस्वी है, अनेक प्रकार की अमृतधाराओं को वह बहाता है। वह चक्र हमें इस लोक में उत्तम बनाए।

अयुतारज्वलन्तम् अयुतारसमष्ट्याकारं निरतिशयविक्रमविलासम् अनन्तदिव्यायुधदिव्यशक्तिसमष्टिरूपं महाविष्णोरनर्गलप्रतापविग्रहम् अयुतायुतकोटियोजनविशालम् अनन्तज्वालाजालैरलंकृतं समस्तदिव्य-मङ्गलनिदानम् अनन्तदिव्यतीर्थानां निजमन्दिरमेवं सुदर्शनं महाचक्रं प्रज्वलति ॥6॥

दस हजार अरों वाला, प्रज्वलित, दस हजार अरों की समष्टिरूप आकारवाला, निरतिशय पराक्रमों के विलासों से युक्त, अनन्त दिव्य आयुधों की दिव्यशक्ति की समष्टिस्वरूप, महाविष्णु के असीम प्रताप के मूर्तरूप जैसा, हजारों करोड़ योजन विशालतायुक्त, अनन्त ज्वालासमूहों से अलंकृत, समस्त दिव्यमंगल कारणों का मूलकारण, अनन्त दिव्य तीर्थों का स्वयंस्थान—ऐसा वह सुदर्शन महाचक्र प्रकाशित हो रहा है।

तस्य नाभिमण्डलसंस्थाने उपलक्ष्यते निरतिशयानन्ददिव्यतेजोराशिः। तन्मध्ये च सहस्रारचक्रं प्रज्वलति। तदखण्डदिव्यतेजोमण्डलाकारं परमानन्दसौदामिनीनिचयोज्ज्वलम् ॥7॥

तदभ्यन्तरसंस्थाने षट्शतारचक्रं प्रज्वलति। तस्यामितपरमतेजः-परमविहारसंस्थानविशेषं विज्ञानघनस्वरूपम् ॥8॥

तदन्तराले त्रिशतारचक्रं विभाति। तच्च परमकल्याणविलासविशेषम् अनन्तचिदादित्यसमष्ट्याकारम् ॥9॥

तदभ्यन्तरे शतारचक्रमाभाति। तच्च परमतेजोमण्डलविशेषम् ॥10॥

तन्मध्ये षष्ट्यरचक्रमाभाति। तच्च ब्रह्मतेजःपरमविलासविशेषम् ॥11॥

तदभ्यन्तरसंस्थाने षट्कोणचक्रं प्रज्वलति। तच्चापरिच्छिन्नानन्तदिव्य-तेजोराश्याकारम् ॥12॥

उसके नाभिमण्डल के स्थान में निरतिशय आनंद की दिव्य तेजोराशि दिखाई पड़ती है। उसके बीच एक हजार अर वाला चक्र प्रकाशित हो रहा है। वह अखण्ड दिव्यतेज के मण्डल जैसे आकारवाला और परमानन्द के विद्युत्समूह जैसा उज्ज्वल है। उसके बीच के स्थान में छः सौ अरों वाला एक चक्र प्रकाशित है। उसका तेज असीम है। और वह श्रेष्ठ विहार के विशिष्ट स्थान जैसा होने से विज्ञानघन स्वरूप है। उसके भी भीतर तीन सौ अरों वाला चक्र प्रकाशित है। वह परमकल्याण के विशेष विलासरूप एवं अनन्त चैतन्यरूप सूर्य के समष्टि के आकारवाला है। और उसके भी बीच में सौ अरों वाला चक्र प्रकाशित है। वह परमतेज के विशेष जैसा है। उसके बीच आठ अरों वाला चक्र प्रकाशित है। वह ब्रह्मतेज का परमविशेष विलासरूप है। और उसके भी बीच के स्थान में छः कोणों वाला चक्र प्रकाशित है। वह असीम-अमित-अनन्त तेज के राशि जैसे आकारवाला है।

तदभ्यन्तरे महानन्दपदं विभाति। तत्कर्णिकायां सूर्येन्दुवह्निमण्डलानि चिन्मयानि ज्वलन्ति। तत्रोपलक्ष्यते निरतिशयदिव्यतेजोराशिः ॥13॥

तदभ्यन्तरसंस्थाने युगपदुदितानन्तकोटिरविप्रकाशः सुदर्शनपुरुषो विराजते। सुदर्शनपुरुषो महाविष्णुरेव ॥14॥

महाविष्णोः समस्तासाधारणचिह्नचिह्नित एवमुपासकः सुदर्शनपुरुषं ध्यात्वा विविधोपचारैराराध्य प्रदक्षिणनमस्कारान् विधायोपासकस्तेनाभिपूजितस्तदनुज्ञातश्च उपर्युपरि गत्वा परमानन्दमयान् अनन्तवैकुण्ठान् अवलोक्य उपासकः परमानन्दं प्राप ॥15॥

इसके बीच महानन्द नामक स्थान प्रकाशित है। उसकी कली में सूर्य, चन्द्र और अग्नि के चैतन्यमय मंडल प्रकाशित हैं। इसमें निरतिशय तेज की राशि दिखाई पड़ती है। इसके बीच के स्थान में एक ही साथ उदित हुए करोड़ों सूर्य के जैसे तेजस्वी सुदर्शन पुरुष विराजमान हैं। वे सुदर्शन पुरुष महाविष्णु ही हैं। उन महाविष्णु के समस्त असाधारण चिह्नों से चिह्नित ऐसा ही वह उपासक उन सुदर्शन पुरुष का ध्यान करके विविध उपचारों से उनकी पूजा करके उनकी प्रदक्षिणा और नमस्कार करता है। सामने से वह सुदर्शन पुरुष भी उस उपासक की पूजा करते हैं। बाद में उनकी दी गई अनुज्ञा से वह उपासक वहाँ से और भी ऊपर-ही-ऊपर जाकर परमानन्दमय अनेकानेक वैकुण्ठों के दर्शन करके परमानन्द को प्राप्त करता है।

तत उपरि विविधविचित्रानन्तचिद्विलासविभूतिविशेषानतिक्रम्य अनन्तपरमानन्दविभूतिसमष्टिविशेषान् अनन्तनिरतिशयानन्दसमुद्रानतीत्य उपासकः क्रमेणाद्वैतसंस्थानं प्राप ॥16॥

कथमद्वैतसंस्थानम्। अखण्डानन्दस्वरूपम् अनिर्वाच्यम् अमितबोधसागरम् अमितानन्दसमुद्रं विजातीयविशेषविवर्जितं सजातीयविशेषविशेषितं निरवयवं निराधारं निर्विकारं निरञ्जनम् अनन्तब्रह्मानन्दसमष्टिकन्दं परमचिद्विलाससमष्ट्याकारं निर्मलं निरवद्यं निराश्रयम् अतिनिर्मलानन्तकोटिरविप्रकाशैकस्फुलिङ्गम् अनन्तोपनिषदर्थस्वरूपम् अखिलप्रमाणातीतं मनोवाचामगोचरं नित्यमुक्तस्वरूपम् अनाधारम् आदिमध्यान्तशून्यं कैवल्यं परमं शान्तं सूक्ष्मात् सूक्ष्मतरं महतो महत्तरम् अमितानन्दविशेषं शुद्धबोधानन्दविभूतिविशेषम् अनन्तानन्दविभूतिविशेषसमष्टिरूपम् अक्षरम् अनिर्देश्यम् कूटस्थम् अचलं ध्रुवम् अदिग्देशकालम् अन्तर्बहिश्च तत् सर्वं व्याप्य परिपूर्णं परमयोगिभिर्विमृग्यं देशतः कालतो वस्तुतः परिच्छेदरहितं निरन्तराभिनवं नित्यपरिपूर्णम् अखण्डानन्दामृतविशेषं शाश्वतं परमं पदं निरतिशयानन्दानन्ततटित्पर्वताकारम् अद्वितीयं स्वयंप्रकाशम् अनिशं ज्वलति ॥17॥

वहाँ से ऊपर विविध, अद्भुत और अनन्त चैतन्य के विलासों की विशेष विभूतियों को पार करके, अनन्त परमानन्द की विभूतियों की विशेष समष्टिरूप और असीम निरतिशय अनन्त समुद्रों को पार करके वह उपासक क्रमशः अद्वैत संस्थान को प्राप्त हो जाता है। कैसा है वह अद्वैत स्थान ? (तो सुनो)—अखण्डानन्दस्वरूप, अवर्णनीय, असीमज्ञानसमुद्ररूप, अप्रमेयआनन्दसागरस्वरूप, विजातीय विशेषताओं से रहित, सजातीय विशेषताओं से युक्त, अवयवरहित, निरधिष्ठान, निर्विकार, निरंजन अनन्तब्रह्मानन्द की समष्टि का मूल, परम चैतन्य के विलासों की समष्टि का आकाररूप, निर्मल, निर्दोष, निरवलम्ब, अनन्त करोड़ विमल सूर्य के प्रकाश का मानो एक स्फुलिंग-सा हो, अनन्त उपनिषदों का अर्थस्वरूप, समग्र प्रमाणों से अतीत, मन और वाणी का अविषय, नित्यमुक्तस्वरूप,

आधाररहित, आदि-मध्य-अन्त-रहित, कैवल्यरूप, परमशान्त, अतिशय सूक्ष्म, महान् से भी अति महान्, अमेय, विशेष आनन्दरूप, शुद्ध ज्ञानानन्द की विशेष विभूतिरूप, अनन्त आनन्द की समष्टि की विशेष विभूतिरूप, अविनाशी, अनिर्देश्य, कूटस्थ, अचल, स्थिर, दिशा-देश-काल रहित, भीतर-बाहर चारों ओर से परिपूर्ण, बड़े बड़े योगियों के द्वारा अन्वेषणीय, देश-काल-वस्तु से नहीं नापा जाने वाला, निरन्तर अभिनव नित्य अखण्डानन्दस्वरूप, अमृतविशेष, शाश्वत, परमपद, निरतिशय आनन्दरूप विद्युतों और पर्वतों के-से आकार वाला वह अद्वितीय और स्वयंप्रकाश रूप से सदा प्रकाशित है।

परमानन्दलक्षणापरिच्छिन्नानन्तपरंज्योतिः शाश्वतं शश्वद्विभाति ॥18॥
तदभ्यन्तरसंस्थाने अमितानन्दचिद्रूपाचलम् अखण्डपरमानन्दविशेषं बोधानन्दमहोज्ज्वलं नित्यमङ्गलमन्दिरं चिन्मथनाविर्भूतचित्सारम् अनन्ताश्चर्यसागरम् अमिततेजोराश्यन्तर्गततेजोविशेषम् अनन्तानन्दप्रवाहैरलङ्कृतं निरतिशयानन्दपारावाराकारं निरुपमनित्यनिरवद्यनिरतिशयनिरवधिकतेजोराशिविशेषं निरतिशयानन्दसहस्त्रप्राकारैरलङ्कृतं शुद्धबोधसौधावलिविशेषैरलङ्कृतं चिदानन्दमयानन्तदिव्यारामैः सुशोभितं शश्वदमितपुष्पवृष्टिभिः समन्ततः सन्ततम् ॥19॥

परमानन्दरूप लक्षणवाला और अमेय-अनन्त परमज्योतिरूप वह स्थान निरंतर प्रकाशित हो रहा है। उसके बीच के स्थान में अमित, आनन्द, चैतन्यरूप, अचल, अखण्ड परमात्मरूप, ज्ञानानन्द से महा उज्ज्वल, नित्य, मांगल्यमंदिर, चैतन्यमंथन से प्राप्त, चैतन्य का सारतत्त्व, अनन्त आश्चर्यसागर, अमित, तेजसमूह के बीच अवस्थित विशेष तेजरूप, अनन्त आनंदप्रवाहों से अलंकृत, निरतिशय आनन्दसागर के जैसे आकारवाला, निरुपम, नित्य, निर्दोष, निरवधि, निरतिशय तेजोविशेषरूप के समूहरूप, निरतिशय आनंद के हजारों प्राकारों से सुशोभित, निरंतर असीम पुष्पवृष्टियों से चारों ओर फैला हुआ एक स्थान है।

तदेव त्रिपाद्विभूतिवैकुण्ठस्थानम्। तदेव परमकैवल्यम्। तदेवाबाधितपरमतत्त्वम्। तदेवानन्तोपनिषद्विमृग्यम्। तदेव परमयोगिभिर्मुमुक्षुभिः सर्वैराशास्यमानम्। तदेव सद्घनम्। तदेव चिद्घनम्। तदेवानन्दघनम्। तदेव शुद्धबोधघनविशेषम् अखण्डानन्दब्रह्मचैतन्याधिदेवतास्वरूपम्। सर्वाधिष्ठानम् अद्वयपरब्रह्मविहारमण्डलं निरतिशयानन्दतेजोमण्डलम् अद्वैतपरमानन्दलक्षणपरब्रह्मणः परमाधिष्ठानमण्डलं निरतिशयपरमानन्दपरममूर्तिविशेषमण्डलम् अनन्तपरममूर्तिसमष्टिमण्डलं निरतिशयपरमानन्दलक्षणपरब्रह्मणः परममूर्तिपरमतत्त्वविलासविशेषमण्डलं बोधानन्दमयानन्तपरमविलासविभूतिविशेषसमष्टिमण्डलम् अनन्तचिद्विलासविभूतिविशेषसमष्टिमण्डलम् अखण्डशुद्धचैतन्यनिजमूर्तिविशेषविग्रहं वाचामगोचरानन्तशुद्धबोधविशेषविग्रहम् अनन्तानन्दसमुद्रसमष्ट्याकारम् अनन्तबोधाचलैरनन्तबोधानन्दाचलैरधिष्ठितं निरतिशयानन्दपरममङ्गलविशेषसमष्ट्याकारं अखण्डाद्वैतपरमानन्दलक्षणपरब्रह्मणः परममूर्तिपरमतेजःपुञ्जपिण्डविशेषं चिद्रूपादित्यमण्डलं

द्वात्रिंशद्व्यूहभेदैरधिष्ठितम्। व्यूहभेदाश्च केशवादिचतुर्विंशतिः सुदर्शनादिन्यासमन्त्राः (सुदर्शनादियन्त्रोद्धारः)। अनन्तगरुडविष्वक्सेनाश्च निरतिशयानन्दश्च ॥20॥

वही स्थान त्रिपाद् विभूति वैकुण्ठस्थान है और वही कैवल्य है, वही अबाधित तत्त्व है, वही अनन्त उपनिषदों के द्वारा अन्वेषणीय है, वही परमयोगियों (मुमुमुक्षों) के द्वारा चाहने योग्य है, वही सत्यमय, वही चैतन्यमय, वही आनन्दमय, वही शुद्धज्ञानविषयमय और अखण्ड आनन्दमय ब्रह्मचैतन्य से अधिष्ठित देवतास्वरूप है। और भी, वह सर्व का आश्रयस्थान, अद्वैत परब्रह्म का विहार-मण्डल, निरतिशय आनन्द और तेज का मण्डल, अद्वैत परमानन्दस्वरूप परब्रह्म का परमाश्रयरूप मण्डल, निरतिशय परमानन्द की परममूर्ति का विशेष मण्डल, अनन्त परब्रह्म की परममूर्ति का समष्टिमंडल, परमतत्त्व के विलासों का विशेष मण्डल, ज्ञान तथा आनन्दमय अनन्त-परम विलासों की विभूतियों का विशेष समष्टिमण्डल, अनन्त चैतन्य के विलासों की विभूतियों का विशेष समष्टिमण्डल, अखण्ड शुद्ध चैतन्यरूप अपनी मूर्ति का विशेष शरीररूप, वाणी का अविषय, अनन्त शुद्ध ज्ञान-विशेष के विग्रह रूप, अनन्त आनन्दसागर का समष्टिआकाररूप, ज्ञानरूपी अनन्त पर्वतों से और बोधानन्दरूप अनन्त पर्वतों से युक्त, निरतिशय आनन्द और परममंगल के विशेष समष्टि आकाररूप, अखण्ड अद्वैत परमानन्दरूप लक्षण वाले परब्रह्म की परममूर्ति के तेज की जो राशि है, उसके बड़े पिण्ड जैसा, चैतन्यरूप सूर्य के मण्डलवाला और अलग-अलग बत्तीस व्यूहों से वह आश्रित है। और अन्य केशव आदि चौबीस व्यूह और सुदर्शनादि न्यासमन्त्र भी उसमें प्रतिष्ठित हैं। (यहाँ सुदर्शनादि यन्त्रोद्धार नताया गया है) और भी अनेक गरुडों के साथ अनेक विश्वक्सेन और निरतिशय आनन्दों का समूह इसमें है।

आनन्दव्यूहमध्ये सहस्रकोटियोजनायतोन्नतचिन्मयप्रासादं ब्रह्मानन्दमयविमानकोटिभिरतिमङ्गलम् अनन्तोपनिषदर्थारामजालसङ्कुलं सामहंसकूजितैरतिशोभितम् आनन्दमयानन्तशिखरैरलङ्कृतं चिदानन्दरसनिर्झरैरभिव्याप्तं अखण्डानन्दतेजोराश्यन्तरस्थितम् अनन्तानन्दाश्चर्यसागरम् ॥21॥

उस आनन्दव्यूह के बीच, हजारों करोड़ योजन लम्बा, चौडा और ऊँचा चैतन्यमय महल है। ब्रह्मानन्दमय करोड़ों विमानों से वह अतिमंगलमय है। अनन्त उपनिषदों के अर्थरूप उद्यानों से वह व्याप्त है। सामवेदरूपी हंस के शब्दों से वह अतिशोभित है। आनन्दमय अनन्त शिखरों से वह अलंकृत है। चिदानन्द के रसमय झरनों से वह व्याप्त है। अखण्ड आनन्द के तेज के बीच वह अवस्थित है। वह अनन्त आनन्दों का और आश्चर्य का सागर है।

तदभ्यन्तरसंस्थाने अनन्तकोटिरविप्रकाशातिशयप्राकारं निरतिशयानन्दलक्षणं प्रणवाख्यं विमानं विराजते। शतकोटिशिखरैरानन्दमयैः समुज्ज्वलति ॥22॥

तदन्तराले बोधानन्दाचलोपर्यष्टाक्षरीमण्डपो विभाति ॥23॥

तन्मध्ये च चिदानन्दमयवेदिका आनन्दवनविभूषिता ॥24॥

तदुपरि ज्वलति निरतिशयानन्दतेजोराशिः ॥25॥

तदभ्यन्तरसंस्थाने अष्टाक्षरीपद्मविभूषितं चिन्मयासनं विराजते ॥26॥

उसके भीतर के स्थान में अनन्त करोड़ सूर्य जैसे प्रकाशमय बड़े प्राकारवाला और निरतिशय लक्षणवाला प्रणव नाम का विमान विराजित है। वह सौ करोड़ आनन्दमय शिखरों से शोभित है। उसके बीच में बोधानन्द नाम का पर्वत है। उसके ऊपर अष्टाक्षरी नाम का मण्डप शोभायमान है। उसके बीच चिदानन्दमय वेदिका है। और वह आनन्दवन से अलंकृत की गई है। उसके ऊपर निरतिशय आनन्दरूप तेजोराशि प्रकाशित हो रही है और उसके बीच के स्थान में अष्टाक्षरी नाम का मण्डप शोभायमान है। उसके बीच चिदानन्दमय वेदिका है।

प्रणवकर्णिकायां सूर्येन्दुवह्निमण्डलानि चिन्मयानि ज्वलन्ति ॥27॥ तत्राखण्डानन्दतेजोराश्यन्तर्गतं परममङ्गलाकारमनन्तासनं विराजते ॥28॥

तस्योपरि च महायन्त्रं प्रज्वलति। निरतिशयब्रह्मानन्दपरममूर्तिमहायन्त्रं समस्तब्रह्मतेजोराशिसमष्टिरूपं चित्स्वरूपं निरञ्जनं परब्रह्मस्वरूपं परब्रह्मणः परमरहस्यकैवल्यं महायन्त्रमयपरमवैकुण्ठनारायणयन्त्रं विजयते ॥29॥

उस प्रणव की कली में सूर्य, चन्द्र तथा अग्नि के मण्डल चैतन्यमय होकर प्रकाशित हो रहे हैं। उनमें अखण्ड आनन्द तथा तेज की राशि के बीच स्थित परम मंगलकारी अनन्त का आसन विराजमान है। उसके ऊपर महान् यंत्र प्रकाशित हो रहा है। निरतिशय ब्रह्मानन्द की परममूर्ति रूप वह महामंत्र समस्त ब्रह्मतेज की राशि का समष्टिरूप है। चैतन्यरूप, ब्रह्मरूप, निरंजन का परमरहस्य कैवल्य रूप ही वह है। वह सभी यन्त्रों में महायन्त्र है। वह परम वैकुण्ठनारायणयंत्र विजयी होता है।

तत्स्वरूपं कथमिति। देशिकस्तथेति होवाच—

'उस महायंत्र का स्वरूप कैसा है' ? शिष्य के ऐसा पूछने पर गुरु ने 'ठीक है' ऐसा कहकर अब आगे उसका स्वरूप बता रहे हैं—

[आगे 30 से 48 कण्डिकामय मन्त्रों से नारायण मन्त्र का स्वरूप बताया जा रहा है। और उसमें स्थापित किए जाने वाले मन्त्र भी बताए गए हैं। ये मन्त्र और उनका वर्णन अत्यन्त गूढ और रहस्यमय पारिभाषिक संज्ञाओं से युक्त हैं। उनका वाच्यार्थ करने से भी कोई ऐसा तात्पर्य बोध नहीं होता। ऐसे गूढ (रहस्यमय) मन्त्रों का किसी अन्य भाषा में केवल अस्पष्ट वाच्यार्थ में अनुवाद करना हमें उचित भी मालूम नहीं होता। तात्पर्य बोध हो सके तो ऐसे मन्त्रों का अनुवाद करना कुछ हद तक ठीक भी है, पर ऐसे निगूढ और अत्यन्त गोपनीय मन्त्रों का अनुवाद करना ठीक नहीं है। जो लोग साधक हैं, उनको साधना के लिए किसी सिद्ध गुरु के पास जाकर महायंत्र का तथा इनका मर्म पहचान लेना चाहिए। यहाँ अनुवाद करना योग्य नहीं है, ऐसा समझकर केवल मन्त्र ही ज्यों-के-त्यों दिए जा रहे हैं और उनके साथ महायंत्र का मूल स्वरूप भी ज्यों-का-त्यों दिया जा रहा है—]

आदौ षट्कोणचक्रम्। तन्मध्ये षड्दलपद्मम्। तत्कर्णिकायां प्रणवं ॐ मिति। प्रणवमध्ये नारायणबीजमिति। तत्साध्यगर्भितं—मम सर्वाभीष्टसिद्धिं कुरुकुरु स्वाहेति। तत्पद्मदलेषु विष्णुनृसिंहषडक्षरमन्त्रौ—ॐ नमो विष्णवे, ऐं क्लीं श्रीं ह्रीं क्ष्म्यौंफट्। तद्दलकपोलेषु रामकृष्णषडक्षरमन्त्रौ—रां रामाय नमः, क्लीं कृष्णाय नमः। षट्कोणेषु

सुदर्शनषडक्षरमन्त्रः—सहस्त्रार हुं फडिति। षट्कोणकपोलेषु प्रणव-युक्तशिवपञ्चाक्षरमन्त्रः—ॐ नमः शिवायेति ॥30॥

तद्बहिः प्रणवमालायुक्तं वृत्तम्। वृत्ताद्बहिरष्टदलपद्मम्। तेषु दलेषु नारायणनृसिंहाष्टाक्षरमन्त्रौ—ॐ नमो नारायणाय, जयजय नरसिंह। तद्दलसन्धिषु रामकृष्णश्रीकराष्टाक्षरमन्त्राः—ॐ रामाय हुं फट् स्वाहा, क्लीं दामोदराय नमः, उत्तिष्ठ श्रीकर स्वाहा ॥31॥

तद्बहिः प्रणवमालायुक्तं वृत्तम्। वृत्ताद्बहिर्नवदलपद्मम्। तेषु दलेषु रामकृष्णहयग्रीवनवाक्षरमन्त्राः—ॐ रामचन्द्राय नमः ॐ क्लीं कृष्णाय गोविन्दाय क्लीम्। 'ह्सौं हयग्रीवाय नमो ह्सौम्। तद्दलकपोलेषु दक्षिणामूर्तिनवाक्षरमन्त्रः—ॐ दक्षिणामूर्तिरितरोम् ॥32॥

तद्बहिर्नारायणबीजयुक्तं वृत्तम्। वृत्ताद्बहिर्दशदलपद्मम्। तेषु दलेषु रामकृष्णदशाक्षरमन्त्रौ—हुं जानकीवल्लभाय स्वाहा, गोपीजनवल्लभाय स्वाहा। तद्दलसन्धिषु नृसिंहमालामन्त्रः—ॐ नमो भगवते श्रीमहा-नृसिंहाय करालदंष्ट्रवदनाय मम विघ्नान् पचपच स्वाहा ॥33॥

तद्बहिर्नृसिंहैकाक्षरयुक्तं वृत्तम्—क्ष्म्रौं इत्येकाक्षरम्। वृत्ताद्बहिर्द्वा-दशदलपद्मम्। तेषु दलेषु नारायणवासुदेवद्वादशाक्षरमन्त्रौ—ॐ नमो भगवते नारायणाय, ॐ नमो भगवते वासुदेवाय। तद्दलकपोलेषु महा-विष्णुरामकृष्णद्वादशाक्षरमन्त्राश्च—ॐ नमो भगवते महाविष्णवे, ॐ ह्रीं भरताग्रज राम क्लीं स्वाहा, श्रीं ह्रीं क्लीं कृष्णाय गोविन्दाय नमः ॥34॥

तद्बहिर्जगन्मोहनबीजयुक्तं वृत्तं—क्लीमिति। वृत्ताद्बहिश्चतुर्दशदल-पद्मम्। तेषु दलेषु लक्ष्मीनारायणहयग्रीवगोपालदधिवामनमन्त्राश्च—ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मीवासुदेवाय नमः, ॐ नमः सर्वकोटिसर्वविद्यारा-जाय, क्लीं कृष्णाय गोपालचूडामणये स्वाहा, ॐ नमो भगवते दधिवामनाय। तद्दलसन्धिष्वन्नपूर्णेश्वरीमन्त्रः—ह्रीं पद्मावत्यन्नपूर्णे माहेश्वरि स्वाहा ॥35॥

तद्बहिः प्रणवमालायुक्तं वृत्तम्। वृत्ताद्बहिः षोडशदलपद्मम्। तेषु दलेषु श्रीकृष्णसुदर्शनषोडशाक्षरमन्त्रौ च—ॐ नमो भगवते रुक्मिणीवल्ल-भाय स्वाहा, ॐ नमो भगवते महासुदर्शनाय हुं फट्। तद्दलसंधिषु स्वराः सुदर्शनमालामन्त्राः—अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः, सुदर्शन-महाचक्राय दीप्तरूपाय सर्वतो मां रक्षरक्ष सहस्त्रार हुं फट् स्वाहा ॥36॥

तद्बहिर्वराहबीजयुक्तं वृत्तं—तद्धुमिति। वृत्ताद्बहिरष्टादशदलपद्मम्। तेषु दलेषु श्रीकृष्णवामनाष्टादशाक्षरमन्त्रौ—क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा, ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा। तद्दलकपोलेषु गरुडपञ्चाक्षरीमन्त्रो गरुडमालामन्त्रश्च—क्षिप ॐ स्वाहा, ॐ नमः पक्षिराजाय सर्वविषभूतरक्षःकृत्याऽऽदिभेदनाय सर्वेष्टसाधकाय स्वाहा ॥37॥

तद्बहिर्मायाबीजयुक्तं वृत्तं—ह्रीमिति। वृत्ताद्बहिः पुनरष्टदलपद्मम्। तेषु दलेषु श्रीकृष्णवामनाष्टाक्षरमन्त्रौ—ॐ नमो दामोदराय, ॐ वामनाय नमः ॐ। तद्दलकपोलेषु नीलकण्ठत्र्यक्षरीगरुडपञ्चाक्षरीमन्त्रौ च—प्रें रीं ठः, नमोऽण्डजाय ॥38॥

तद्बहिर्मन्मथबीजयुक्तं वृत्तम्। वृत्ताद्बहिश्चतुर्विंशतिदलपद्मम्। तेषु दलेषु शरणागतनारायणमन्त्रौ नारायणहयग्रीवगायत्रीमन्त्रौ च—श्रीमन्नारायणचरणौ शरणं प्रपद्ये, श्रीमते नारायणाय नमः, नारायणाय विद्महे एवग्रीवाय धीमहि तन्नो विष्णुः प्रचोदयात्। वागीश्वराय विद्महे हयग्रीवाय धीमहि तन्नो हंसः प्रचोदयात्। तद्दलकपोलेषु नृसिंहसुदर्शन-ब्रह्मगायत्रीमन्त्राश्च—वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि तन्नः सिंहः प्रचोदयात्, सुदर्शनाय विद्महे हेतिराजाय धीमहि तन्नश्चक्रः प्रचोदयात्, तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥39॥

तद्बहिर्हयग्रीवैकाक्षरयुक्तं वृत्तं—ह्सौमिति। वृत्ताद्बहिर्द्वात्रिंशद्दल-पद्मम्। तेषु दलेषु नृसिंहहयग्रीवानुष्टुभमन्त्रौ—

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्॥
ऋग्यजुःसामरूपाय वेदाहरणकर्मणे।
प्रणवोद्गीथवपुषे महाश्वशिरसे नमः॥

तद्दलकपोलेषु रामकृष्णानुष्टुभमन्त्रौ—

रामभद्र महेष्वास रघुवीर नृपोत्तम।
भो दशास्यान्तकास्माकं रक्षां देहि श्रियं च ते॥
देवकीसुत गोविन्द वासुदेव जगत्पते।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥40॥

तद्बहिः प्रणवसंपुटिताग्निबीजयुक्तं वृत्तम्—ॐ रं ॐ इति। वृत्ताद्बहिः षट्त्रिंशद्दलपद्मम्। तेषु दलेषु हयग्रीवषट्त्रिंशदक्षरमन्त्रः पुनरष्टत्रिंशदक्षरमन्त्रश्च—

हंसः—विश्वोत्तीर्णस्वरूपाय चिन्मयानन्दरूपिणे।
तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे—सोहम्॥

ह्सौं ॐ नमो भगवते हयग्रीवाय सर्ववागीश्वरेश्वराय सर्ववेदमयाय सर्वविद्यां मे देहि स्वाहा। तद्दलकपोलेषु प्रणवादिनमोऽन्ताश्चतुर्थ्यन्ताः केशवादिचतुर्विंशतिमन्त्राश्च। अवशिष्टद्वादशस्थानेषु रामकृष्णगायत्री-द्वयवर्णचतुष्टयमेकैकस्थले—ॐ केशवाय नमः ॐ नारायणाय नमः ॐ माधवाय नमः ॐ गोविन्दाय नमः ॐ विष्णवे नमः ॐ मधुसूदनाय नमः ॐ त्रिविक्रमाय नमः ॐ वामनाय नमः ॐ श्रीधराय नमः ॐ हृषीकेशाय नमः ॐ पद्मनाभाय नमः ॐ दामोदराय नमः ॐ सङ्कर्षणाय नमः ॐ वासुदेवाय नमः ॐ प्रद्युम्नाय नमः ॐ अनिरुद्धाय नमः ॐ

पुरुषोत्तमाय नमः ॐ अधोक्षजाय नमः ॐ नरसिंहाय नमः ॐ अच्युताय नमः ॐ जनार्दनाय नमः ॐ उपेन्द्राय नमः ॐ हरये नमः ॐ श्रीकृष्णाय नमः, दाशरथाय विद्महे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात्, दामोदराय विद्महे वासुदेवाय धीमहि तन्नः कृष्णः प्रचोदयात् ॥41॥

तद्बहिः प्रणवसम्पुटिताङ्कुशबीजयुक्तं वृत्तम्—ॐ क्रों ॐ इति। तद्बहिः पुनर्वृत्तम्। तन्मध्ये द्वादशकुक्षिस्थानानि सान्तरालानि। तेषु कौस्तुभवनमालाश्रीवत्ससुदर्शनगरुडपद्मध्वजानन्तशार्ङ्गगदाशङ्खनन्दकमन्त्राः प्रणवादिनमोऽन्ताश्चतुर्थ्यन्ताः क्रमेण—ॐ कौस्तुभाय नमः ॐ वनमालायै नमः ॐ श्रीवत्साय नमः ॐ सुदर्शनाय नमः ॐ गरुडाय नमः ॐ पद्माय नमः ॐ ध्वजाय नमः ॐ अनन्ताय नमः ॐ शार्ङ्गाय नमः ॐ गदायै नमः ॐ शङ्खाय नमः ॐ नन्दकाय नमः। तदन्तरालेषु—ॐ विष्वक्सेनाय नमः ॐ आचक्राय स्वाहा ॐ विचक्राय स्वाहा ॐ सुचक्राय स्वाहा ॐ धीचक्राय स्वाहा ॐ संचक्राय स्वाहा ॐ ज्वालाचक्राय स्वाहा ॐ क्रुद्धोल्काय स्वाहा ॐ महोल्काय स्वाहा ॐ वीर्योल्काय स्वाहा ॐ विद्योल्काय स्वाहा ॐ सहस्त्रोल्काय स्वाहा इति प्रणवादिमन्त्राः ॥42॥

तद्बहिः प्रणवसम्पुटितगरुडपञ्चाक्षरयुक्तं वृत्तम्—ॐ क्षिप ॐ स्वाहा ॐ। तच्च द्वादशवज्रैः सान्तरालैरलंकृतम्। तेषु वज्रेषु—ॐ पद्मनिधये नमः ॐ महापद्मनिधये नमः ॐ गरुडनिधये नमः ॐ शङ्खनिधये नमः ॐ मकरनिधये नमः ॐ कच्छपनिधये नमः ॐ विद्यानिधये नमः ॐ परमानन्दनिधये नमः ॐ मोक्षनिधये नमः ॐ लक्ष्मीनिधये नमः ॐ ब्रह्मनिधये नमः ॐ श्रीमुकुन्दनिधये नमः ॐ वैकुण्ठनिधये नमः। तत्संधिस्थानेषु—ॐ विद्याकल्पकतरवे नमः ॐ आनन्दकल्पकतरवे नमः ॐ ब्रह्मकल्पकतरवे नमः ॐ भुक्तिकल्पकतरवे नमः ॐ अमृतकल्पकतरवे नमः ॐ बोधकल्पकतरवे नमः ॐ विभूतिकल्पकतरवे नमः ॐ वैकुण्ठकल्पकतरवे नमः ॐ वेदकल्पकतरवे नमः ॐ योगकल्पकतरवे नमः ॐ यज्ञकल्पकतरवे नमः ॐ पद्मकल्पकतरवे नमः। तच्च शिवगायत्रीपरब्रह्ममन्त्राणां वर्णैर्वृत्ताकारेण संवेष्ट्य—
तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्,
श्रीमन्नारायणो ज्योतिरात्मा नारायणः परः।
नारायणः परं ब्रह्म नारायणः नमोऽस्तु ते ॥43॥

तदबहिः प्रणवसम्पुटितश्रीबीजयुक्तं वृत्तम्—ॐ श्रीमोमिति। तद्बहिश्चत्वारिंशद्दलपद्मम्। तेषु दलेषु व्याहृतिशिरःसम्पुटितवेदगायत्रीपादचतुष्टयसूर्याष्टाक्षरीमन्त्रौ—ॐ भूः ॐ भुवः ॐ सुवः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यम् ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ परोरजसे सावदोम् ॐ आपो

ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम्, ॐ घृणिः सूर्य आदित्यः। तद्दलसन्धिषु प्रणवश्रीबीजसम्पुटितनारायणबीजं सर्वत्र—ॐ श्रीमं श्रीमोम् ॥44॥

तद्बहिरष्टशूलाङ्कितभूचक्रम्। चक्रान्तश्चतुर्दिक्षु हंसःसोहंमन्त्रौ प्रणवसम्पुटितौ नारायणास्त्रमन्त्राश्च—ॐ हंसः सोहम्, ॐ नमो नारायणाय हुं फट् ॥45॥

तद्बहिः प्रणवमालासंयुक्तं वृत्तम्। वृत्ताद्बहिः पञ्चाशद्दलपद्मम्। तेषु दलेषु मातृकापञ्चाशदक्षरमाला लकारवर्ज्या। तद्दलसन्धिषु प्रणवश्री-बीजसम्पुटितरामकृष्णमालामन्त्रौ—ॐ श्रीमों नमो भगवते रघुनन्दनाय रक्षोघ्नविशदाय मधुरप्रसन्नवदनायामिततेजसे बलाय रामाय विष्णवे नमः श्रीमों, ॐ श्रीं ॐ नमः कृष्णाय देवकीपुत्राय वासुदेवाय निर्गलच्छेदनाय सर्वलोकाधिपतये सर्वजगन्मोहनाय विष्णवे कामितार्थदाय स्वाहा श्रीमोम् ॥46॥

तद्बहिरष्टशूलाङ्कितभूचक्रम्। तेषु प्रणवसम्पुटितमहानीलकण्ठमन्त्र-वर्णानि—ॐमों नमो नीलकण्ठाय ॐ। शूलाग्रेषु लोकपालमन्त्राः प्रणवादिनमोऽन्ताश्चतुर्थ्यन्ताः क्रमेण—ॐ इन्द्राय नमः ॐ अग्नये नमः ॐ यमाय नमः ॐ निर्ऋतये नमः ॐ वरुणाय नमः ॐ वायवे नमः ॐ सोमाय नमः ॐ ईशानाय नमः ॥47॥

तद्बहिः प्रणवमालायुक्तं वृत्तत्रयम्। तद्बहिर्भूपुरचतुष्टयं चतुर्द्वारयुतं चक्रकोणचतुष्टयमहावज्रविभूषितम्। तेषु वज्रेषु प्रणवश्रीबीज-सम्पुटितामृतबीजद्वयम्—ॐ श्रीं ठं वं श्रीमोमिति। बहिर्भूपुरवीथ्याम्—ॐ आधारशक्त्यै नमः ॐ मूलप्रकृत्यै नमः ॐ आदिकूर्माय नमः ॐ अनन्ताय नमः ॐ पृथिव्यै नमः। मध्यभूपुरवीथ्याम्—ॐ क्षीरसमुद्राय नमः ॐ रत्नद्वीपाय नमः ॐ रत्नमण्डपाय नमः ॐ श्वेतच्छत्राय नमः ॐ कल्पवृक्षाय नमः ॐ रत्नसिंहासनाय नमः। प्रथमभूपुरवीथ्यां धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यसत्त्वरजस्तमोमायाविद्याऽनन्तपद्माः प्रणवादिनमोन्ताश्चतुर्थ्यन्ताः क्रमेण। बाह्यवृत्तवीथ्यां विमलोत्कर्षिणी ज्ञानाक्रियायोगाप्रह्वीसत्येशानाः प्रणवादिनमोऽन्ताश्चतुर्थ्यन्ताः क्रमेण। अन्तर्वृत्तवीथ्यां—ओमनुग्रहायै नमः, ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपीठात्मने नमः।

वृत्तावकाशेषु—

बीजं प्राणं च शक्तिं च दृष्टिं वश्यादिकं तथा।
मन्त्रयन्त्राख्यगायत्रीप्राणस्थापनमेव च।
भूतदिक्पालबीजानि यन्त्रस्याङ्गानि वै दश॥
मूलमन्त्रमालामन्त्रकवचदिग्बन्धनमन्त्राश्च ॥48॥

इस प्रकार पहले 28 और 29 कण्डिकाओं के द्वारा अनन्त आसन के ऊपर स्थित समष्टिमहायंत्र को बताकर बाद में 30 से 48 कण्डिकाओं के द्वारा व्यष्टियंत्र का निगूढ स्वरूप और उसमें उपयुक्त

रहस्यमय मन्त्र बताए गए हैं। इसका स्वरूप और उसमें उपयुक्त मन्त्र दोनों रहस्यमय और गुरु से ही बोध्य हैं।

एवंविधमेतद्यन्त्रं महामन्त्रमयं योगधीरान्तैः परममन्त्रैरलङ्कृतं षोडशोपचारैरभ्यर्चितं जपहोमादिना साधितमेतद्यन्त्रं शुद्धब्रह्मतेजोमयं सर्वाभयङ्करं समस्तदुरितक्षयकरं सर्वाभीष्टसम्पादकं सायुज्यमुक्तिप्रद-मेतत् परमवैकुण्ठमहानारायणयन्त्रं प्रज्वलति ॥49॥

ऐसा यह यन्त्र महायन्त्रमय है। योगधीर तक के परममन्त्रों से यह शोभित है। यदि इसकी षोडशोपचार पूजा की जाए और जप-होम आदि विहित विधियों से उसको सिद्ध किया जाए, तो यह मन्त्र शुद्ध तेजोमय बनकर साधक को सब तरह से निर्भय बनाता है। समग्र पापों का नाश करता है। सभी इष्ट कामनाएँ पूरी करता है। सायुज्य मुक्ति प्रदान करता है। ऐसा यह परमवैकुण्ठ महायन्त्र प्रकाशित है।

तस्योपरि च निरतिशयानन्दतेजोराश्यभ्यन्तरसमासीनं वाचामगोचरा-नन्दतेजोराश्याकारं चित्साराविर्भूतानन्दविग्रहं बोधानन्दस्वरूपं निरति-शयसौन्दर्यपारावारं तुरीयस्वरूपं तुरीयातीतं चाद्वैतपरमानन्दं निरन्तरा-तितुरीयनिरतिशयसौन्दर्यानन्दपारावारं लावण्यवाहिनीकल्लोलतटिद्भा-सुरं दिव्यमङ्गलविग्रहं मूर्तिमद्भिः परममङ्गलैरुपसेव्यमानं चिदानन्दमयै-रनन्तकोटिरविप्रकाशैरनन्तभूषणैरलङ्कृतं सुदर्शनपाञ्चजन्यपद्मगदा-ऽसिशार्ङ्गमुसलपरिघाद्यैश्चिन्मयैरनेकायुधगणैर्मूर्तिमद्भिः सुसेवितं श्रीवत्स-कौस्तुभवनमालाऽङ्कितवक्षसं ब्रह्मकल्पवनामृतपुष्पवृष्टिभिः सन्तत-मानन्दं ब्रह्मानन्दरसनिर्भरैरसंख्यैरतिमङ्गलं शेषायुतफणाजालविपुल-च्छत्रशोभितं तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहं तदङ्गकान्तिनिर्झरै-स्ततं निरतिशयब्रह्मगन्धस्वरूपं निरतिशयानन्दब्रह्मगन्धविशेषाकारम् अनन्तब्रह्मगन्धाकारसमष्टिविशेषम् अनन्तानन्दतुलसीमाल्यैरभिनवं चिदानन्दमयानन्तपुष्पमाल्यैर्विराजमानं तेजःप्रवाहतरङ्गततपरम्परा-भिर्ज्वलन्तं निरतिशयानन्तकान्तिविशेषावर्तैरभितोऽनिशं प्रज्वलन्तं बोधानन्दमयानन्तधूपदीपावलिभिरतिशोभितं निरतिशयानन्दचामर-विशेषैः परिसेवितं निरन्तरनिरुपमनिरतिशयोत्कटज्ञानानन्दानन्तगुच्छ-फलैरलङ्कृतं चिन्मयानन्ददिव्यविमानच्छत्रध्वजराजिभिर्विराजमानं परममङ्गलानन्तदिव्यतेजोभिर्ज्वलन्तम् अनिशं वाचामगोचरानन्ततेजो-राश्यन्तर्गतम् अर्धमात्रात्मकं तुर्यं ध्वन्यात्मकं तुरीयातीतम् अवाच्यं नादबिन्दुकलाऽध्यात्मस्वरूपं चेत्याद्यनन्ताकारेणावस्थितं निर्गुणं निष्क्रियं निर्मलं निरवद्यं निरञ्जनं निराकारं निराश्रयं निरतिशयाद्वैत-परमानन्दलक्षणम् आदिनारायणं ध्यायेदित्युपनिषत् ॥50॥

इत्याथर्वणमहानारायणोपनिषदि परममोक्षस्वरूपनिरूपणद्वारा त्रिपाद्विभूति-परमवैकुण्ठमहानारायणयन्त्रस्वरूपनिरूपणं नाम सप्तमोऽध्यायः।

उसके ऊपर निरतिशय आनन्दमय तेजोराशि के बीच तुरीय और तुरीयातीय स्वरूप विराजित है। वह वाणी का अविषय है, आनन्द और तेजोराशि के आकारवाला है, वह बोध और आनंदस्वरूप निरतिशय आनन्द और सौन्दर्य के सागर जैसा, अद्वैत परमानन्द से व्याप्त, तुरीय से परे, निरतिशय आनन्द और सौन्दर्य के सागररूप, चैतन्य के सारतत्त्व से उत्पन्न आनन्दरूप शरीरधारी, बोध और आनन्द का स्वरूप, लावण्य की नदी के तरंगों से युक्त, विद्युत् जैसा प्रकाशित, दिव्यमंगल शरीरधारी, श्रेष्ठमूर्त मांगल्यों से सेवित, चिदानन्दमय अनन्त सूर्यों के प्रकाशों से तथा अनंत आभूषणों से शोभित है। सुदर्शन-पांचजन्य शंख-कमल-गदा-तलवार-शार्ङ्ग-धनुष-मुसल-परिघ आदि चैतन्यमय अनेक मूर्तिमान आयुधों के समूहों से अच्छी तरह सेवित है। और उस नारायणयन्त्र में श्रीवत्स, कौस्तुभ तथा वनमाला से युक्त वक्ष:स्थलवाले, ब्रह्मरूप, कल्पवन के अमर पुष्पों की वृष्टियों से व्याप्त, आनन्दस्वरूप, ब्रह्मानन्द के रस से भरे हुए असंख्य प्रवाहों से अतिमंगल शेषनाग के दस हजार फणों के समूहरूपी बड़े छत्र से शोभायमान, उन फणों के ऊपर के बहुत तेजस्वी मणियों से प्रकाशित शरीरवाले, अपने अंगों की कान्तिरूपी झरनों से व्याप्त, निरतिशय ब्रह्मरूप सुगन्ध से सुगन्धित, निरतिशय आनन्दयमय ब्रह्मगन्ध के विशेष आकार रूप, अनन्त ब्रह्मगन्ध की विशेष समष्टिरूप आकारवाले, आनन्दमय तुलसी की मालाओं से चारों ओर नवीन, चिदानन्दमय अनन्त पुष्पों की मालाओं से विराजमान, उनके प्रवाहों और उनकी तरंगों की परम्पराओं से प्रकाशित होते हुए निरतिशय आनन्दस्वरूप कान्ति की विशेषताओं के मण्डलों से निरन्तर प्रज्वलित हुए, बोधानन्दमय अनन्त धूपों और दीपकों की पंक्तियों से अत्यन्त शोभित और निरतिशय आनन्दमय अनेक चामरों से चारों ओर सुसेवित होते हुए, निरन्तर उपमारहित, निरतिशय उत्कट ज्ञानानन्दमय, अनन्त गुच्छों और फलों से अलंकृत, चैतन्यमय और आनन्दस्वरूप दिव्य विमानों, छत्रों और ध्वजों की पंक्तियों से विराजमान, परममंगलमय, अनन्त दिव्यतेज से प्रकाशमान, निरन्तर वाणी के अविषयरूप, अनन्त तेज की राशि की भीतर रहे हुए, अर्धमात्रारूप, तुरीयस्वरूप, नादस्वरूप, तुर्यातीत, अवर्णनीय, और नाद-बिन्दु-कला-अध्यात्मस्वरूप इत्यादि अनन्त आकार से अवस्थित, निर्गुण, क्रियाशून्य, निर्मल, निर्दोष, निरंजन, निराकार, आश्रयरहित और निरतिशय अद्वैत परमानन्दरूप लक्षण वाले श्रीआदिनारायण का ध्यान करना चाहिए। ऐसा यह उपनिषद् कहती है।

इस प्रकार आथर्वण-महानारायणोपनिषद् में परममोक्षस्वरूपनिरूपण द्वारा त्रिपाद्वि-भूतिपरमवैकुण्ठमहानारायणयन्त्रस्वरूपनिरूपण पूरा हुआ।

अष्टमोऽध्याय:

ततः पितामहः परिपृच्छति भगवन्तं महाविष्णुं—भगवन् शुद्धाद्वैतपरमानन्दलक्षणपरब्रह्मणस्तव कथं विरुद्धवैकुण्ठप्रासादप्राकारविमानाद्यनन्तवस्तुभेदः ॥1॥

सत्यमेवोक्तमिति भगवान् महाविष्णुः परिहरति। यथा शुद्धसुवर्णस्य कटकमुकुटाङ्गदादिभेदः। यथा समुद्रसलिलस्य स्थूलसूक्ष्मतरङ्गफेनबुद्बुदकरकलवणपाषाणाद्यनन्तवस्तुभेदः। यथा भूमेः पर्वतवृक्षतृणगुल्मलताद्यनन्तवस्तुभेदः। तथैवाद्वैतपरमानन्दलक्षणपरब्रह्मणो मम

सर्वाद्वैतमुपपन्नं भवत्येव। मत्स्वरूपमेव सर्वं मद्व्यतिरिक्तमणुमात्रं न विद्यते ॥2॥

पुनः पितामह ब्रह्मा ने भगवान् महाविष्णु से पूछा—'हे भगवन्! आप तो स्वयं शुद्ध, अद्वैत, परमानन्द, परब्रह्म के ही लक्षणवाले हैं। फिर भी इससे विरोधी ये वैकुण्ठधाम, वहाँ के महल, वहाँ के प्राकार, विमान आदि अनन्त वस्तुस्वरूप से आपका भेद किस तरह संभव हो सकता है? इस प्रश्न का उत्तर कहते हुए भगवान् महाविष्णु ब्रह्मा की शंका का निराकरण करते हुए कहने लगे कि आपने यह ठीक ही कहा है, परन्तु जिस तरह शुद्ध सोने के कड़े, मुकुट, कुण्डल, बाजूबन्द आदि भेद होते हैं, अथवा जैसे सागर के जल के छोटे-बड़े तरंग-फेन-बुद्बुद्-ओले, लवण और उसके ढेले आदि अनन्त वस्तुओं के रूप में भेद होते हैं, अथवा जिस प्रकार पृथ्वी के पर्वत, वृक्ष, घास, पौधे, बेल आदि अनन्त वस्तुओं के रूप में भेद होते हैं, ठीक उसी प्रकार से अद्वैत परमानन्दरूप लक्षणवाले परब्रह्म ऐसे मेरे स्वरूपों के केवल काल्पनिक भेद ही हैं, वास्तविक रूप से तो सब कुछ अद्वैत परब्रह्म ही है, ऐसा सिद्ध होता है। सब कुछ मेरा ही स्वरूप ही है, मुझसे अलग बिल्कुल नहीं है।

पुनः पितामहः परिपृच्छति—भगवन् परमवैकुण्ठ एव परममोक्षः। परममोक्षस्त्वेक एव श्रूयते सर्वत्र। कथमनन्तवैकुण्ठाश्च अनन्तानन्द-समुद्रादयश्च अनन्तमूर्तयः सन्तीति ॥3॥
तथेति होवाच भगवान् महाविष्णुः—एकस्मिन्नविद्यापादेऽनन्तकोटि-ब्रह्माण्डानि सावरणानि श्रूयन्ते। तस्मिन्नेकस्मिन्नण्डे बहवो लोकाश्च बहवो वैकुण्ठाश्चानन्तविभूतयश्च सन्त्येव। सर्वाण्डेष्वनन्तलोकाश्चा-नन्तवैकुण्ठाः सन्तीति सर्वेषां खल्वभिमतम्। पादत्रयेऽपि किं वक्तव्यम्। निरतिशयानन्दाविर्भावो मोक्ष इति मोक्षलक्षणं पादत्रये वर्तते। तस्मात् पादत्रयं परममोक्षः। पादत्रयं परमवैकुण्ठः। पादत्रयं परमकैवल्यमिति। ततः शुद्धचिदानन्दब्रह्मविलासानन्दाश्चानन्तरपरमा-नन्दविभूतयश्चानन्तवैकुण्ठाश्चानन्तपरमानन्दसमुद्रादयः सन्त्येव ॥4॥

इसके बाद पितामह ब्रह्मा ने पुनः पूछा—'हे भगवन्! परम वैकुण्ठ ही परममोक्ष है। किन्तु शास्त्रों में परम मोक्ष तो एक ही सुना जाता है। फिर भी अनन्त वैकुण्ठ, अनन्त आनन्दसागर और अनन्त मूर्तियाँ हैं, यह बात कैसे उचित ठहरता है।?' तब भगवान् विष्णु ने कहा—हाँ, वह उचित है, क्योंकि एक-एक ही अविद्यापाद अनन्त कोटि ब्रह्माण्ड आवरणों के साथ स्थित हैं, ऐसा सुना जाता है। उस एक ही ब्रह्माण्ड में बहुत से लोग, बहुत से वैकुण्ठ और अनन्त विभूतियाँ भी तो हैं ही। और सब ब्रह्माण्डों में अनन्त लोग एवं अनन्त वैकुण्ठ हैं—यह बात तो सभी लोगों को मान्य है ही। अब बाकी के तीन पादों में क्या है, यह कहना चाहिए। निरतिशय आनन्द का आविर्भाव ही मोक्ष है—मोक्ष का ऐसा लक्षण अन्य तीनों पादों में है। इसलिए तीन पाद परममोक्ष हैं, एवं तीन पाद परम वैकुण्ठ है और तीन पाद परम कैवल्य है। इसलिए शुद्ध चैतन्य और आनन्दरूप ब्रह्म के विलासवाले आनन्द, परमानन्द की विभूतियाँ, अनन्त वैकुण्ठ, और अनन्त परमानन्द के समूह—ये सब हैं ही।

उपासकस्ततोऽभ्येत्यैवंविधं नारायणं ध्यात्वा प्रदक्षिणनमस्कारान् विधाय विविधोपचारैरभ्यर्च्य निरतिशयाद्वैतपरमानन्दलक्षणो भूत्वा

तदग्रे सावधानेनोपविश्य अद्वैतयोगमास्थाय सर्वाद्वैतपरमानन्दलक्षणाखण्डामिततेजोराश्याकारं विभाव्योपासकः स्वयं शुद्धबोधानन्दमयामृतनिरतिशयानन्दतेजोराश्याकारो भूत्वा महावाक्यार्थमनुस्मरन् ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि योऽहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहोमि स्वाहा। अहं ब्रह्मेति भावनया यथा परमतेजोमहानदीप्रवाहः परमतेजःपारावारे प्रविशति। यथा परमतेजःपारावारतरङ्गाः परमतेजःपारावारे प्रविशन्ति। तथैव सच्चिदानन्दात्मोपासकः सर्वपरिपूर्णाद्वैतपरमानन्दलक्षणे परब्रह्मणि नारायणे मयि सच्चिदानन्दात्मकोऽहमजोऽहं परिपूर्णोऽहमस्मीति प्रविवेश। तत उपासको निस्तरङ्गाद्वैतापारनिरतिशयसच्चिदानन्दसमुद्रो बभूव ॥5॥

यस्त्वनेन मार्गेण सम्यगाचरति स नारायणो भवत्यसंशयमेव। अनेन मार्गेण सर्वे मुनयः सिद्धिं गताः। असंख्याताः परमयोगिनश्च सिद्धिं गताः ॥6॥

फिर उस प्रकार के नारायण को प्राप्त कर लेने के बाद उपासक उनका ध्यान करता है, प्रदक्षिणा और नमस्कार करता है, विविध उपचारों से उनकी पूजा करता है और निरतिशय परमानन्द युक्त होकर उनके सामने बैठता है। बाद में अद्वैत योग का आश्रय करके सम्पूर्ण अद्वैत परमानन्द के लक्षणयुक्त अखंड-अमित-तेजोराशि का जो आकार है, उनका चिन्तन करके उपासक स्वयं भी ज्ञानमय और आनन्दमय, अमर तथा निरतिशय आनन्दस्वरूप तेजोराशि का आकार ग्रहण कर लेता है, और महावाक्य के अर्थ का स्मरण करता है कि 'मैं ब्रह्म हूँ, मैं ब्रह्म हूँ, मैं जो हूँ, वही ब्रह्म है। मैं ही मेरा होम करता हूँ, स्वाहा' इस प्रकार, 'मैं ब्रह्म हूँ'—ऐसी भावना से, जिस तरह परमप्रेम की महानदी का प्रवाह वेग के सागर में प्रवेश करता है, उसी तरह और जैसे परमतेज के सागर की तरंगें परमतेज के सागर में प्रवेश करती हैं, उसी तरह वह सच्चिदानन्द स्वरूपधारी उपासक, 'सर्वांशपरिपूर्ण अद्वैत परमानन्दस्वरूप परब्रह्म नारायण मुझमें हैं,' 'मैं अब सच्चिदानन्द स्वरूप हूँ' 'अब मैं परिपूर्ण हूँ'—ऐसी भावना से प्रवेश करता है, और वह उपासक फिर निस्तरंग अद्वैत-अपार-निरतिशय-सच्चिदानन्द का सागर बन जाता है। जो मनुष्य इस मार्ग पर चलकर उत्तम आचरण करता है, वह अवश्य नारायण ही बन जाता है। इस मार्ग पर चलकर सब मुनियों ने सिद्धि प्राप्त की है तथा असंख्य श्रेष्ठ मुनिजन सिद्धि प्राप्त किए हुए हैं।

ततः शिष्यो गुरुं परिपृच्छति—भगवन् सालम्बनिरालम्बयोगौ कथमिति ॥7॥

सालम्बस्तु समस्तकर्मातिदूरतया करचरणादिमूर्तिविशिष्टं मण्डलाद्यालम्बनं सालम्बयोगः। निरालम्बस्तु समस्तनामरूपकर्मातिदूरतया सर्वकामाद्यन्तःकरणवृत्तिसाक्षितया तदालम्बनशून्यतया च भावनं निरालम्बयोगः ॥8॥

फिर शिष्य ने गुरु से पूछा—'हे भगवन्! सालम्ब और निरालम्ब योग कैसा होता है, यह मुझे कहिए।' तब गुरु ने कहा—सभी कर्मों को अत्यन्त दूर ढकेलकर, हाथ-पैर आदि अवयवों वाली मूर्ति का जिस योग में ध्यान किया जाता है, वह अथवा जिसमें मण्डल आदि का आलम्बन होता है वह

'सालम्ब-योग' कहा जाता है। तथा जिस योग में सब नामों तथा कर्मों को अत्यन्त दूर करके, सभी कामनाओं से मुक्त हुए अन्त:करण की वृत्ति के साक्षी रूप में, उसके आलम्बन से रहित होकर ही चिन्तन किया जाता है, उसे 'निरालम्ब योग' कहा जाता है।

अथ च निरालम्बयोगाधिकारी कीदृशो भवति ॥9॥
अमानित्वादिलक्षणोपलक्षितो यः पुरुषः स एव निरालम्बयोगाधिकारी ॥10॥
कार्यः कश्चिदस्ति। तस्मात् सर्वेषामधिकारिणामनधिकारिणां च भक्तियोग एव प्रशस्यते। भक्तियोगो निरुपद्रवः। भक्तियोगान्मुक्तिः। भक्तिमतामनायासेनाचिरादेव तत्त्वज्ञानं भवति ॥11॥
तत्कथमिति। भक्तवत्सलः स्वयमेव सर्वेभ्यो मोक्षविघ्नेभ्यो भक्तिनिष्ठान् सर्वान् परिपालयति सर्वाभीष्टान् प्रयच्छति मोक्षं दापयति चतुर्मुखादीनाम्। सर्वेषामपि विना विष्णुभक्त्या कल्पकोटिभिर्मोक्षो न विद्यते। कारणेन विना कार्यं नोदेति। भक्त्या विना ब्रह्मज्ञानं कदाऽपि न जायते। तस्मात्त्वमपि सर्वोपायान् परित्यज्य भक्तिमाश्रय। भक्तिनिष्ठो भव। भक्तिनिष्ठो भव। भक्त्या सर्वसिद्धयः सिध्यन्ति। भक्त्यसाध्यं न किञ्चिदस्ति ॥12॥

अब इस निरालम्ब योग का अधिकारी कैसा होता है ? तो कहते हैं—अभिमानराहित्य आदि लक्षणों से युक्त होता है, वही निरालम्बयोग का अधिकारी समझा जाता है। और वह तो कोई विरल पुरुष ही हो सकता है। इसलिए सभी अधिकारियों और अनधिकारियों के लिए भक्तियोग ही उत्तम है। क्योंकि भक्तियोग उपद्रवरहित है। भक्तियोग से मुक्ति मिलती है। जो भक्तिमान हैं, उन्हें अनायास ही तत्त्वज्ञान हो जाता है। ऐसा कैसे होता है ? तो उत्तर यह है कि भक्तवत्सल भगवान् स्वयं ही सभी भक्तिनिष्ठों का मोक्षावरोधक विघ्नों से रक्षण करते हैं। वे सभी इच्छित फल देते हैं, और मोक्ष प्रदान करते हैं। ब्रह्मा आदि करोड़ों देवों का भी विष्णुभक्ति के बिना करोड़ों वर्षों में भी मोक्ष नहीं हो सकता। कारण के बिना कार्य कभी उत्पन्न हो नहीं सकता। इसलिए तुम भी अन्य सभी उपायों को छोड़कर भक्ति का ही आश्रय कर लो। भक्तिनिष्ठ हो जाओ ! भक्तिपरायण हो जाओ ! भक्ति से सभी सिद्धियाँ प्राप्त की जा सकती हैं, भक्ति से असाध्य कुछ भी नहीं है।

एवंविधं गुरूपदेशमाकर्ण्य सर्वं परमतत्त्वरहस्यमवबुध्य सर्वसंशयान् विधूय क्षिप्रमेव मोक्षं साधयामीति निश्चित्य ततः शिष्यः समुत्थाय प्रदक्षिणनमस्कारं कृत्वा गुरुभ्यो गुरुपूजां विधाय गुर्वनुज्ञया क्रमेण भक्तिनिष्ठो भूत्वा भक्त्यतिशयेन पक्वविज्ञानं प्राप्य तस्मादनायासेन शिष्यः क्षिप्रमेव साक्षान्नारायणो बभूवेत्युपनिषत् ॥13॥

इस प्रकार से गुरु के उपदेश को सुनकर, 'मैं परमतत्त्व का सर्व रहस्य जानकर, सभी संशयों को छोड़कर मोक्ष को शीघ्र साध्य करूँगा'—इस प्रकार का निश्चय करके शिष्य उठा और गुरु की प्रदक्षिणा करके नमस्कार किया और फिर उनकी पूजा की। बाद में उनकी अनुमति लेकर भक्तिनिष्ठ बना। और क्रमशः भक्ति में वृद्धि होते-होते पक्व विज्ञान प्राप्त करके उसके द्वारा अनायास ही शीघ्र स्वयं नारायणरूप बन गया। ऐसा यह उपनिषद् कहती है।

ततः प्रोवाच भगवान् महाविष्णुः चतुर्मुखमवलोक्य—ब्रह्मन् परमतत्त्वरहस्यं ते सर्वं कथितम्। तत्स्मरणमात्रेण मोक्षो भवति। तदनुष्ठानेन सर्वमविदितं विदितं भवति। यत्स्वरूपज्ञानिनः सर्वमविदितं विदितं भवति तत्सर्वं परमरहस्यं कथितम् ॥14॥

बाद में भगवान् महाविष्णु ने ब्रह्मा को सामने देखकर कहा—हे ब्रह्मा ! परमतत्त्व का सर्व रहस्य मैंने आपसे कहा। उसका केवल स्मरण करने से ही मोक्ष मिल जाता है। और उसका आचरण करने से तो नहीं जाना हुआ भी सब कुछ जाना जा सकता है। उसका स्वरूप जानने वालों को सभी अज्ञात वस्तुएँ ज्ञात हो जाती है। यह सब परमरहस्य मैंने कहा है।

गुरुः क इति। गुरुः साक्षादादिनारायणः पुरुषः। स आदिनारायणोऽहमेव। तस्मान्मामेकं शरणं व्रज। मद्भक्तिनिष्ठो भव। मदीयोपासनां कुरु। मामेव प्राप्स्यसि। मद्व्यतिरिक्तं सर्वं बाधितम्। मद्व्यतिरिक्तमबाधितं न किञ्चिदस्ति। निरतिशयानन्दाद्वितीयोऽहमेव। सर्वपरिपूर्णोऽहमेव। सर्वाश्रयोऽहमेव। वाचामगोचरनिराकारपरब्रह्मस्वरूपोऽहमेव। मद्व्यतिरिक्तमणुमात्रं न विद्यते ॥15॥

अब, 'गुरु कौन है ?' यह कहा जाता है—साक्षात् आदिनारायण पुरुष स्वयं ही गुरु हैं। और मैं ही वह आदिनारायण हूँ। इसलिए तुम केवल मेरी ही शरण में आओ। मेरी ही भक्ति में निष्ठासम्पन्न हो जाओ। मेरी ही उपासना करो। इससे तुम मुझे ही प्राप्त करोगे। मेरे सिवा सब मिथ्या है। मेरे सिवा जो मिथ्या न हो, ऐसा कुछ है ही नहीं। मैं ही निरतिशय आनंद और मैं ही अद्वितीय हूँ। सब तरह से परिपूर्ण मैं ही हूँ। मैं ही सब का आश्रय हूँ। जो वाणी का अविषय है, ऐसे परब्रह्म का निराकारस्वरूप भी तो मैं ही हूँ। मुझसे अलग तो एक अणु भी नहीं है।

इत्येवं महाविष्णोः परममिममुपदेशं लब्ध्वा पितामहः परमानन्दं प्राप ॥16॥
विष्णोः कराभिमर्शनेन दिव्यज्ञानं प्राप्य पितामहस्ततः समुत्थाय प्रदक्षिणनमस्कारान् विधाय विविधोपचारैर्महाविष्णुं प्रपूज्य प्राञ्जलिर्भूत्वा विनयेनोपसङ्गम्य भगवन् भक्तिनिष्ठां मे प्रयच्छ। त्वदभिन्नं मां परिपालय कृपालय ॥17॥

इस प्रकार से श्रीमहाविष्णु का उत्तम उपदेश सुनकर ब्रह्माजी बहुत आनंदित हुए। उन्हें विष्णु के हाथ का स्पर्श होने से दिव्य ज्ञान प्राप्त हुआ। इसके बाद ब्रह्माजी ने खड़े होकर महाविष्णु की प्रदक्षिणा की और उन्हें नमस्कार किया। बाद में विविध उपचारों से उनका पूजन किया और दोनों हाथ जोड़कर उनके पास जाकर विनयपूर्वक कहने लगे—'हे कृपानिधान ! मुझे भक्तिनिष्ठा दीजिए।'

तथैव साधु साध्विति साधुप्रशंसापूर्वकं महाविष्णुः प्रोवाच—मदुपासकः सर्वोत्कृष्टः स भवति। मदुपासनया सर्वमङ्गलानि भवन्ति। मदुपासनया सर्वं जयति। मदुपासकः सर्ववन्द्यो भवति। मदीयोपासकस्यासाध्यं न किञ्चिदस्ति। सर्वबन्धाः प्रविनश्यन्ति। सद्वृत्तमिव सर्वे देवास्तं सेवन्ते। महाश्रेयांसि च सेवन्ते। मदुपासकस्तस्मान्निरतिशयाद्वैतपरमानन्द-

लक्षणपरब्रह्म भवति। यो वै मुमुक्षुरनेन मार्गेण सम्यगाचरति स परमानन्दलक्षणपरब्रह्म भवति ॥18॥

'बहुत अच्छा, बहुत अच्छा' इस तरह प्रशंसापूर्वक महाविष्णु ने कहकर आगे कहा—'मेरा उपासक सबसे उत्कृष्ट बनता है। मेरी उपासना से सब-कुछ मंगल होता है। मेरी उपासना से सब-कुछ विजयी होता है। मेरा उपासक सबके लिए वन्दनीय होता है। मेरे उपासक के लिए कुछ भी असाध्य नहीं होता। उसके सभी बन्धन नष्ट हो जाते हैं। सभी देव सदाचारी की तरह उसकी सेवा करते हैं। सभी कल्याण उसकी सेवा करते हैं। मेरा उपासक मेरी उपासना से निरतिशय परमानन्दस्वरूप परब्रह्म ही हो जाता है।

यस्तु परमतत्त्वरहस्याथर्वणमहानारायणोपनिषदमधीते स सर्वेभ्यः पापेभ्यो मुक्तो भवति। ज्ञानाज्ञानकृतेभ्यः पातकेभ्यो मुक्तो भवति। महापातकेभ्यः पूतो भवति। रहस्यकृतप्रकाशकृतचिरकालात्यन्त-कृतेभ्यः सर्वेभ्यः पापेभ्यो मुक्तो भवति। स सकललोकान् जयति। स सकलमन्त्रजपनिष्ठो भवति। स सकलवेदान्तरहस्याधिगतपरमार्थज्ञो भवति। स सकलभोगभुग्भवति। स सकलयोगविद्भवति। स सकल-जगत्परिपालको भवति। सोऽद्वैतपरमानन्दलक्षणपरब्रह्म भवति ॥19॥

जो कोई मनुष्य परमतत्त्व के रहस्यरूप इस अथर्ववेदीय महानारायण उपनिषद् को जानता है, वह सभी पापों से मुक्त हो जाता है। जाने-अनजाने किए गये पापों से छुटकारा पाता है। बड़े पापों से मुक्त होकर पवित्र हो जाता है। छिपकर किए हुए, खुले-आम किए गए, प्राचीन काल में किए हुए और अतिशय किए हुए—इन सभी पापों से मुक्त हो जाता है। वह सभी लोकों को जीत लेता है। वह सभी मन्त्रों के जाप में निष्ठावाला होता है। वह सभी वेदान्तों के रहस्य को जानकर परमार्थ को जानने वाला होता है। वह सब भोगों का भोगने वाला होता है। सब योगों को जानने वाला होता है। वह समग्र लोगों का पालन करने वाला हो जाता है। वह अद्वैत परमानन्द लक्षणवाला परब्रह्म ही हो जाता है।

इदं परमतत्त्वरहस्यं न वाच्यं गुरुभक्तिविहीनाय। न चाशुश्रूषवे वाच्यम्। न तपोविहीनाय नास्तिकाय। न दाम्भिकाय मद्भक्तिविहीनाय। मात्सर्याङ्किततनवे न वाच्यम्। न वाच्यं मदसूयापराय कृतघ्नाय ॥20॥
इदं परमरहस्यं यो मद्भक्तेष्वमिधास्यति मद्भक्तिनिष्ठो भूत्वा मामेव प्राप्स्यति ॥21॥
आवयोर्य इमं संवादमध्येष्यति। स नरो ब्रह्मनिष्ठो भवति ॥22॥
श्रद्धावाननसूयुः शृणुयात् पठति वा य इमं संवादमावयोः स पुरुषो मत्सायुज्यमेति ॥23॥
ततो महाविष्णुस्तिरोदधे। ततो ब्रह्मा स्वस्थानं जगामेत्युपनिषत् ॥24॥

इत्याथर्वणमहानारायणोपनिषदि परमसायुज्यमुक्ति-स्वरूपनिरूपणं नामाष्टमोऽध्यायः।

उत्तरकाण्डः समाप्तः।

इति त्रिपादविभूतिमहानारायणोपनिषत्समाप्ता।

परमतत्त्व का यह रहस्य गुरुभक्तिरहित को नहीं कहना चाहिए। जो सेवाभावी न हो, उसको भी नहीं कहना चाहिए। तपरहित और नास्तिक को भी नहीं कहना चाहिए। मेरी भक्ति से राहत किसी दाम्भिक को भी नहीं बताना चाहिए। जिसका शरीर (मन) द्वेष से कलंकित हुआ हो, उसको भी नहीं कहना चाहिए। मुझसे ईर्ष्या करने वाले कृतघ्न को भी नहीं कहना चाहिए। जो मनुष्य इस परमरहस्य को मेरे भक्तों को बताएगा, वह मेरी भक्ति में निष्ठावाला होकर मुझे ही प्राप्त करेगा। हम दोनों के इस संवाद को जो मनुष्य पढ़ेगा, वह मेरे सायुज्य को प्राप्त होगा।—ऐसा कहकर महाविष्णु अदृश्य हो गए और ब्रह्मा भी अपने स्थान पर चले गए। इस प्रकार यह उपनिषद् समाप्त होती है।

इस प्रकार आथर्वण-महानारायणोपनिषद् में परमसायुज्यमुक्ति-
स्वरूपनिरूपण नामक अष्टम अध्याय समाप्त हुआ।

शान्तिपाठः

ॐ भद्रं कर्णेभिः……देवहितं यदायुः। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः॥

(54) अद्वयतारकोपनिषत्

(उपनिषत्परिचय)

यह उपनिषत् शुक्लयजुर्वेद की परंपरा की है। गर्भ-जन्म-जरा-मरण-संसार के महान् भय से मनुष्यों को तारने वाला ब्रह्म है। इसीलिए वह 'तारक' है। जीव-ईश्वर को मायाकल्पित जानकर, नाम-रूपादि को 'नेति नेति' कहकर, छोड़ते हुए अवशिष्ट रहे हुए अद्वयब्रह्म की प्राप्ति के लिए, आन्तर-बाह्य-मध्य ऐसे तीन लक्ष्यों का अनुसन्धान करके, शरीर में मूलाधार से ब्रह्मरन्ध्र तक अवस्थित सुषुम्णा नाडी में जो सूक्ष्म और तेजोमय कुण्डलिनी शक्ति है, उसको मन द्वारा देखना चाहिए। इससे मनुष्य मुक्त होता है। और भी भालप्रदेश में तेजोदर्शन, कानों को बन्द करके भीतर के नाद का श्रवण, आँखों के कोनों में स्वर्णिम तेजोदर्शन, नासिका के अग्रभाग में चार-छ-आठ-दस अंगुलों तक प्रकाश को देखने के अभ्यास आदि से योगी अमर बनता है। तीसरा मध्य लक्ष्य ऐसा है जिसमें करोड़ों सूर्यों के प्रकाश जैसे—सूर्याकाश में अथवा परमाकाश, महाकाश, तत्त्वाकाश आदि पंचविध आकाश में दृष्टि स्थिर करने से अनेकविध सिद्धियाँ मिलती हैं। अन्तर्लक्ष्य और बहिर्लक्ष्य में जब आँख का मिलनोन्मीलन बिल्कुल बन्द हो जाता है, तब शांभवी मुद्रा होती है। गुरूपदेशानुसार इन लक्ष्यों का अनुसन्धान करना चाहिए। क्योंकि गुरु ही परमब्रह्म, परमगति, पराविद्या—सब कुछ है।

शान्तिपाठः

ॐ पूर्णमदः पूर्णमिदं ...... पूर्णमेवावशिष्यते। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (जाबालोपनिषद् में) द्रष्टव्य है।

अथातोऽद्वयतारकोपनिषदं व्याख्यास्यामो यतये जितेन्द्रियाय शमदमादिषड्गुणपूर्णाय ॥1॥

चित्स्वरूपोऽहमिति सदा भावयन् सम्यङ् निमीलिताक्षः किंचिदुन्मीलिताक्षो वान्तर्दृष्ट्या भ्रूदहरादुपरि सच्चिदानन्दतेजःकूटरूपं परं ब्रह्मावलोकयंस्तद्रूपो भवति ॥2॥

गर्भजन्मजरामरणसंसारमहद्भयात्संतारयति तस्मात्तारकमिति। जीवेश्वरौ मायिकौ विज्ञाय सर्वविशेषं नेति नेतीति विहाय यदवशिष्यते तदद्वयं ब्रह्म ॥3॥

तत्सिद्ध्यै लक्ष्यत्रयानुसन्धानः कर्तव्यः ॥4॥

योगियों, संन्यासियों, जितेन्द्रियों तथा शम-दमादि छः गुणों से युक्त साधकों के लिए हम अब अद्वयतारकोपनिषद् की व्याख्या कर रहे हैं। यह साधक आँखें बन्द या अधखुली रखकर, भौंहों के

ऊपरी भाग में 'मैं चित्स्वरूप हूँ'—इस प्रकार अन्तःदृष्टि से भावचिन्तन करते हुए सच्चिदानन्द के तेज से युक्त कूट – निश्चल ब्रह्म का दर्शन करता हुआ स्वयं ब्रह्मरूप हो जाता है। वह तेजस्वरूप परब्रह्म, गर्भ-जन्म-जरा-मरण-संसार इत्यादि पापों से तारने वाला है। इसीलिए उसे 'तारक' कहा जाता है। जीव और ईश्वर को मायिक जानकर बाकी सब कुछ को 'नेति नेति' अर्थात् यह नहीं, यह नहीं—ऐसा कहकर छोड़ते हुए जो कुछ शेष बचा रहता है, वही 'अद्वयब्रह्म' कहा गया है। उस तेजस्वरूप परब्रह्म की सिद्धि के लिए तीन लक्ष्यों का अनुसन्धान करना आवश्यक है।

देहमध्ये ब्रह्मनाडी सुषुम्ना सूर्यरूपिणी पूर्णचन्द्राभा वर्तते। सा तु मूलाधारादारभ्य ब्रह्मरन्ध्रगामिनी भवति। तन्मध्ये तडित्कोटिसमानकान्त्या मृणालसूत्रवत्सूक्ष्माङ्गी कुण्डलिनीति प्रसिद्धास्ति। तां दृष्ट्वा मनसैव नरः सर्वपापविनाशद्वारा मुक्तो भवति। फालोर्ध्वगललाटविशेषमण्डले निरन्तरं तेजस्तारकयोगविस्फुरणेन पश्यति चेत्सिद्धो भवति। तर्जन्यग्रोन्मीलितकर्णरन्ध्रद्वये तत्र फूत्कारशब्दो जायते। तत्र स्थिते मनसि चक्षुर्मध्यगतनीलज्योतिःस्थलं विलोक्यान्तर्दृष्ट्या निरतिशयसुखं प्राप्नोति। एवं हृदये पश्यति। एवमन्तर्लक्ष्यलक्षणं मुमुक्षुभिरुपास्यम् ॥5॥

उस साधक के देह के बीच में सुषुम्ना नामक ब्रह्मनाडी सूर्यरूपिणी है, वह पूर्णचन्द्र के तेजवाली है। वह मूलाधार चक्र से ब्रह्मरन्ध्र तक जाती है। उस नाडी (नलिका) के बीच में करोड़ों विद्युत् की कान्ति के समान तेजवाली और मृणाल के सूत्र जैसे सूक्ष्म आकार वाली कुण्डलिनी नामक एक प्रसिद्ध शक्ति है। उस शक्ति का मन से ही दर्शन मात्र करने से मनुष्य सभी पापों के विनाश से मुक्त हो जाता है। पापमुक्त होकर मोक्षाधिकारी हो जाता है। मस्तिष्क के ऊपर विशेष मण्डल में निरन्तर विद्यमान प्रकाश को जो तारक ब्रह्म के योग से देखता है वह सिद्ध हो जाता है। दोनों तर्जनियों के अग्रभाग से दोनों कर्ण-छिद्रों को बन्द करके जो आवाज सुनाई देती है, वह 'फुत्कार शब्द'—साँप के फुफकार जैसा शब्द—जो है, उसमें मन को केन्द्रित करके आँखों के बीच में अवस्थित नीली ज्योति को आन्तरिक दृष्टि से देखने पर वह अत्यन्त आनन्द प्राप्त करता है। ऐसा ही दर्शन हृदय में भी किया जाता है। ऐसे 'अन्तर्लक्ष्य' के लक्षणों की अर्थात् अन्तःकरण में ही देखे जाने योग्य लक्षणों की मुमुक्षुओं को उपासना करनी चाहिए।

अथ बहिर्लक्ष्यलक्षणं नासिकाग्रे चतुर्भिः षड्भिरष्टभिर्दशभिर्द्वादशभिः क्रमादङ्गुलान्ते नीलद्युतिश्यामत्वसदृग्रक्तभङ्गीस्फुरत्पीतशुक्लवर्णद्वयोपेतव्योम यदि पश्यति स तु योगी भवति। चलदृष्ट्या व्योमभागवीक्षितुः पुरुषस्य दृष्ट्यग्रे ज्योतिर्मयूखा वर्तन्ते। तद्दर्शनेन योगी भवति। तप्तकाञ्चनसङ्काशज्योतिर्मयूखा अपाङ्गान्ते भूमौ वा पश्यति तद्दृष्टिः स्थिरा भवति। शीर्षोपरि द्वादशाङ्गुलसमीक्षितुरमृतत्वं भवति। यत्र कुत्र स्थितस्य शिरसि व्योमज्योतिर्दृष्टं चेत्स तु योगी भवति ॥6॥

अब 'बहिर्लक्ष्य' के लक्षण कहे जा रहे हैं। नासिका के आगे के भाग में चार, छः, आठ, दस या बारह अंगुल की दूरी पर क्रमशः नील और श्याम जैसे रक्तवर्ण की आभावाला आकाश जो कि पीले

श्वेतवर्ण से युक्त है, ऐसे आकाशतत्त्व को जो निरन्तर देखता रहता है, उसी को वास्तव में सच्चा योगी कहा जा सकता है। उस चलित दृष्टि से आकाश को (अवकाश को) देखते रहने पर ज्योति की वे किरणें स्पष्टतया दिखाई देती हैं। उन किरणों को देखने वाला योगी कहलाता है। अथवा जब दोनों आँखों के कोनों पर भूमि पर तपाए हुए स्वर्ण सदृश ज्योति की किरणों के दर्शन होते हैं, तब जाकर उस साधक की दृष्टि एकाग्र होती है। मस्तिष्क के ऊपर के भाग में लगभग बारह अंगुल की दूरी पर ज्योति को देखने वाला योगी अमृतत्व को प्राप्त होता है। यदि कोई भी मनुष्य किसी भी स्थान पर रहकर मस्तक के ऊपर उस आकाशज्योति का दर्शन करता है, तो वही पूर्ण योगी कहा जाता है।

अथ मध्यलक्ष्यलक्षणं प्रातश्चित्रादिवर्णाखण्डसूर्यचक्रवद्वह्निज्वालावली-वत्तद्विहीनान्तरिक्षवत्पश्यति। तदाकाराकारितयावतिष्ठति। तद्भूयो-दर्शनेन गुणरहिताकाशं भवति। विस्फुरत्तारकाकारसन्दीप्यमानागाढ-तमोपमं परमाकाशं भवति। कालानलसमद्योतमानं महाकाशं भवति। सर्वोत्कृष्टपरमद्युतिप्रद्योतमानं तत्त्वाकाशं भवति। कोटिसूर्यप्रकाश-वैभवसङ्काशं सूर्याकाशं भवति। एवं बाह्याभ्यन्तरस्थव्योमपञ्चकं तारकलक्ष्यम्। तद्दर्शी विमुक्तफलस्तादृग्व्योमसमानो भवति। तस्मात् तारक एव लक्ष्यममनस्कफलप्रदं भवति ॥7॥

इसके बाद, अब 'मध्यलक्ष्य' का लक्षण कहा जा रहा है। जो साधक प्रात:काल में भाँति-भाँति के वर्णों से युक्त अखण्ड सूर्य का अग्नि की ज्वालाओं के चक्र की तरह और उससे रहित अन्तरिक्ष के समान देखता है, और उस आकार के समान होकर प्रतिष्ठित रहता है, फिर से उसके दर्शनमात्र से वह गुणविहीन **'आकाश'** की तरह हो जाता है। विस्फुरित (प्रकाशित) ताराओं के समूह से प्रकाशमान और प्रात:काल के आधे अँधेरे की तरह **'परमाकाश'** होता है। जो **'महाकाश'** होता है, वह कालाग्नि के समान प्रकाश वाला होता है। जो **'तत्त्वाकाश'** है, वह सर्वोत्कृष्ट प्रकाश और प्रखर ज्योति से युक्त होता है। जो **'सूर्याकाश'** है, वह करोड़ों सूर्यों के तेज वाला है। इस तरह बाह्य और अन्त: में प्रतिष्ठित ये 'पाँच आकाश' तारकब्रह्म के ही लक्ष्य हैं। उसका दर्शन करने वाला उसी की तरह समग्र बन्धनों को काटकर मुक्तिलाभ के अधिकार को प्राप्त करता है। तारक का लक्ष्य ही अमनस्कतारूप फल का दाता कहा गया है।

तत्तारकं द्विविधं पूर्वार्धतारकमुत्तरार्धममनस्कं चेति। तदेष श्लोको भवति।
तद्योगं च द्विधा विद्धि पूर्वोत्तरविधानतः।
पूर्वं तु तारकं विद्यादमनस्कं तदुत्तरमिति ॥8॥
अक्ष्यन्तस्तारयोश्चन्द्रसूर्यप्रतिफलनं भवति। तारकाभ्यां सूर्यचन्द्रमण्डल-दर्शनं ब्रह्माण्डमिव पिण्डाण्डशिरोमध्यस्थाकाशे रवीन्दुमण्डलद्वितय-मस्तीति निश्चित्य तारकाभ्यां तद्दर्शनमात्राण्युभयैक्यदृष्ट्या मनोयुक्तं ध्यायेत्। तद्योगाभावे इन्द्रियप्रवृत्तेरनवकाशात्। तस्मादन्तर्दृष्ट्या तारक एवानुसन्धेयः ॥9॥

वह तारकयोग दो प्रकार का बतलाया गया है—एक पूर्वार्ध और दूसरा उत्तरार्ध। इस विषय में

यह श्लोक द्रष्टव्य है—'यह तारक योग, पूर्वार्ध और उत्तरार्ध, दो प्रकार का है। पूर्व को 'तारक' और उत्तर को 'अमनस्क' (शून्यमनस्क) कहा जाता है।' हम अपनी आँखों की पुतलियों से सूर्य और चन्द्र का दर्शन करते हैं। हम जिस तरह से आँखों के तारकों से ब्रह्माण्ड के सूर्य और चन्द्र को देखते हैं, ठीक उसी तरह हमें अपने सिररूपी ब्रह्माण्ड के मध्य में अवस्थित सूर्य और चन्द्र का निर्धारण करके उसका सदैव दर्शन करना चाहिए और उन दोनों को एक ही रूप वाला मानकर, उसमें मन को एकाग्र करके उसका चिन्तन करना चाहिए। क्योंकि यदि मन को उसमें उस भाव से एकाग्र न किया जाय, तो सभी इन्द्रियाँ विषयों की ओर प्रवृत्त होने लगेंगी। इसलिए उस योगी (साधक) को अपने भीतर की (अन्तस् की) दृष्टि से तारक का अनवरत अनुसन्धान करते ही रहना चाहिए।

तत्तारकं द्विविधं मूर्तितारकममूर्तितारकं चेति। यदिन्द्रियान्तं तन्मूर्तिमत्। यद् भ्रूयुगातीतं तदमूर्तिमत्। सर्वत्रान्तःपदार्थविवेचने मनोयुक्ताभ्यास इष्यते तारकाभ्यां सदूर्ध्वस्थ सत्त्वदर्शनान्मनोयुक्तेनान्तरीक्षणेन सच्चिदानन्दस्वरूपं ब्रह्मैव। तस्माच्छुक्लतेजोमयं ब्रह्मेति सिद्धम्। तद् ब्रह्म मनःसहकारिचक्षुषान्तर्दृष्ट्या वेद्यं भवति। एवममूर्तितारकमपि मनोयुक्तेन चक्षुषैव दहरादिकं वेद्यं भवति रूपग्रहणप्रयोजनस्य मनश्चक्षुरधीनत्वाद्बाह्यवदान्तरेऽप्यात्ममनश्चक्षुःसंयोगेनैव रूपग्रहणकार्योदयात्। तस्मान्मनोयुक्तान्तर्दृष्टिस्तारकप्रकाशा भवति ॥10॥

यह 'तारक' दो प्रकार का है—एक मूर्त (मूर्तिवाला) और दूसरा अमूर्त (मूर्तिरहित)। जो इन्द्रियों के अन्त में अर्थात् मनरूपी चक्षु में है, वह 'मूर्त' है, और जो दोनों भौंहों से बाहर है, वह 'अमूर्त' तारक है। आन्तरिक पदार्थों के विवेचन के लिए सभी जगह मन को एकाग्र करके ही अभ्यास करते रहना चाहिए। सात्त्विक दर्शन से युक्त मन द्वारा अपने अन्तस् (अन्तःकरण) में लगातार निरीक्षण करते रहने से दोनों तारकों को (मूर्त और अमूर्त को) ऊर्ध्वभाग में सच्चिदानन्द रूप परब्रह्म की परमज्योति के दर्शन होते हैं। इससे यह जाना जा सकता है कि ब्रह्म शुभ्र तेजोमय है। ऐसे ब्रह्म को मनसहित नेत्रों की अन्तर्दृष्टि (भीतर की दृष्टि) से देखकर जान लेना चाहिए। इसी प्रकार से अमूर्त तारक को भी मनसहित चक्षुओं के द्वारा अवश्य जाना जा सकता है। रूपदर्शन के सम्बन्ध में मन नेत्रों के आश्रय में रहता है और बाहर की तरह अन्तस् में भी रूपग्रहण का कार्य इन दोनों के द्वारा ही होता है। इसलिए मन के साथ संलग्न हुए नेत्रों के द्वारा ही 'तारक' का प्रकाश होता है।

भ्रूयुगमध्यबिले दृष्टिं तद् द्वारोर्ध्वस्थिततेज आविर्भूतं तारकयोगो भवति। तेन सह मनोयुक्तं तारकं सुसंयोज्य प्रयत्नेन भ्रूयुग्मं सावधानतया किञ्चिदूर्ध्वमुत्क्षेपयेत्। इति पूर्वभागी तारकयोगः। उत्तरं त्वमूर्तिमदमनस्कमित्युच्यते। तालुमूलोर्ध्वभागे महान् ज्योतिर्मयूखो वर्तते। तद्योगिभिर्ध्येयम्। तस्मादणिमादिसिद्धिर्भवति ॥11॥

कोई भी साधक अपनी आन्तरिक दृष्टि के द्वारा, दोनों भौहों से थोड़े से ऊपरी भाग में स्थित तेजोमय प्रकाश को देखता है, वही 'तारकयोगी' होता है (अर्थात् वह दर्शन ही तारकयोग है)। उसके साथ मन लगाकर तारक का अनुसन्धान करते हुए प्रयत्नपूर्वक दोनों भ्रूकुटियों को थोड़ी सी ऊँचाई पर स्थिर करना चाहिए। इसी को 'तारक' का पूर्वार्ध योग कहा जाता है। दूसरे (उत्तरार्ध) भाग को 'अमूर्त'

कहा गया है। तालु-मूल के ऊर्ध्व भाग में ज्योतिकिरणों का एक महामण्डल विद्यमान है। उसी का ध्यान करना योगियों का ध्येय (लक्ष्य) होता है और इसी से अणिमादि सिद्धियाँ प्राप्त होती हैं।

अन्तर्बाह्यलक्ष्ये दृष्टौ निमेषोन्मेषवर्जितायां सत्यां शाम्भवी मुद्रा भवति। तन्मुद्रारूढज्ञानिनिवासाद्भूमिः पवित्रा भवति। तद् दृष्ट्वा सर्वे लोकाः पवित्रा भवन्ति। तादृशपरमयोगिपूजा यस्य लभ्यते सोऽपि मुक्तो भवति ॥12॥

उस योगी (साधक) की दृष्टि जब अन्तर्बाह्य—दोनों लक्ष्यों को देखने का सामर्थ्य प्राप्त करती है और स्थिरता प्राप्त करती है, तब वह स्थिति 'शांभवी मुद्रा' कहलाती है। इस मुद्रा में ओत-प्रोत हुए ज्ञानी का निवासस्थान बड़ा ही पवित्र माना जाता है। ऐसे मुद्रारूप पुरुष की दृष्टि पड़ने मात्र से सभी लोग पवित्र हो जाते हैं। कोई भी मनुष्य यदि ऐसे योगी की पूजा करता है, तो वह उसे पाकर मुक्ति का अधिकारी हो जाता है।

अन्तर्लक्ष्यजलज्योतिःस्वरूपं भवति। परमगुरूपदेशेन सहस्त्रारे जल-ज्योतिर्वा बुद्धिगुहानिहितज्योतिर्वा षोडशान्तस्थतुरीयचैतन्यं वान्तर्लक्ष्यं भवति। तद्दर्शनं सदाचार्यमूलम् ॥13॥

अन्तर्लक्ष्य का स्वरूप उज्ज्वल ज्योति जैसा हो जाता है। परमसद्गुरु का ज्ञान प्राप्त हो जाने पर सहस्रदल कमल में स्थित उज्ज्वल ज्योतिरूप, **अथवा** बृद्धिगुहास्थित ज्योतिरूप, **अथवा** फिर वह सोलह कला के भीतर अवस्थित तुरीय चैतन्य ही अन्तर्लक्ष्य हो जाता है। यही दर्शन सदाचार का मूल है।

**आचार्यो वेदसम्पन्नो विष्णुभक्तो विमत्सरः।
योगज्ञो योगनिष्ठश्च सदा योगात्मकः शुचिः ॥14॥
गुरुभक्तिसमायुक्तः पुरुषज्ञो विशेषतः।
एवं लक्षणसम्पन्नो गुरुरित्यभिधीयते ॥15॥
गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः।
अन्धकारनिरोधित्वाद् गुरुरित्यभिधीयते ॥16॥**

जो वेदज्ञान से सम्पन्न, श्रेष्ठ आचरणवाला, विष्णु का भक्त, मात्सर्य आदि विकारों से रहित, योग का ज्ञाता, योग में निष्ठावाला, योगात्मा, पवित्रतायुक्त, गुरुभक्त, परमात्मप्राप्ति में विशेष संलग्न रहता हो, ऐसे लक्षण वाला ही गुरु पद से कहा जाता है। 'गुरु' के 'गु' अक्षर का अर्थ 'अन्धकार' और 'रु' अक्षर का अर्थ 'अन्धकार को दूर करने में समर्थ'—ऐसा होता है। अतः अज्ञानरूपी अन्धकार को दूर कर देने वाला ही गुरु कहलाने योग्य है।

**गुरुरेव परं ब्रह्म गुरुरेव परा गतिः।
गुरुरेव परा विद्या गुरुरेव परायणम् ॥17॥
गुरुरेव परा काष्ठा गुरुरेव परं धनम्।
यस्मात्तदुपदेष्टासौ तस्माद् गुरुत्तरो गुरुरिति ॥18॥**

गुरु ही परब्रह्म परमात्मा है। गुरु ही परम गति है। गुरु ही पराविद्या है और गुरु ही परम आश्रय

है। गुरु ही परा काष्ठा है। गुरु ही परमश्रेष्ठ घन है। जो श्रेष्ठ उपदेश करता है, इसीलिए वह गुरु से भी गुरुतर अर्थात् उत्तम से भी उत्तम गुरु होता है—ऐसा मानना चाहिए।

यः सकृदुच्चारयति तस्य संसारमोचनं भवति। सर्वजन्मकृतं पापं तत्क्षणादेव नश्यति। सर्वान्कामानवाप्नोति। सर्वपुरुषार्थसिद्धिर्भवति। य एवं वेदेत्युपनिषत् ॥19॥

इति अद्वयतारकोपनिषत्समाप्ता।

जो मनुष्य एक बार भी गुरु का या इस उपनिषत् का उच्चारण (पाठ) करता है, वह इस संसारसागर से निवृत्त (मुक्त) हो जाता है। उसके जन्म-जन्मान्तर के सभी पाप तत्क्षण नष्ट हो जाते हैं। उसकी सभी इच्छाएँ (आकांक्षाएँ) पूर्ण हो जाती हैं। उसके सकल पुरुषार्थ सफल हो जाते हैं। जो यह जनता है, वही उपनिषत् का सच्चा ज्ञानी है। यही वह उपनिषत् है।

इस प्रकार यह उपनिषद् पूरी हुई।

शान्तिपाठः

ॐ पूर्णमदः पूर्णमिदं ...... पूर्णमेवावशिष्यते। (पूर्ववत्)

ॐ शान्तिः शान्तिः शान्ति ॥

❋

(55) रामरहस्योपनिषत्

(उपनिषत्परिचय)

पाँच अध्यायों वाली यह उपनिषद् अथर्ववेद-परम्परा की है। इसमें सनकादि ऋषियों का हनुमान जी के साथ संवाद है। हनुमान जी के द्वारा रामोपासना का इसमें विस्तृत वर्णन किया गया है। राम ही परब्रह्म हैं, राम ही परम तप हैं, और राम ही परम तत्त्व हैं, ऐसा यहाँ निरूपण किया गया है। इसमें राम के अंगरूप में हनुमान, गणपति, सरस्वती, दुर्गा, क्षेत्रपाल, सूर्य, चन्द्र, नारायण, नरसिंह, वासुदेव, वराह, सीता, लक्ष्मण, शत्रुघ्न, भरत, विभीषण, सुग्रीव, अंगद, जाम्बवान और प्रणव आदि बताए गए हैं। राम नाम के तीन करोड़ जप करने से बड़े से बड़े पापों का छुटकारा हो जाता है। हनुमान जी ने षडक्षर मंत्र के साथ प्रणव को जोड़ने को कहा है, वह उपलक्षण है। अन्य सभी मन्त्रों के साथ प्रणव को जोड़ना चाहिए। इसमें एकाक्षर मन्त्र से लेकर इकत्तीस अक्षर वाले मन्त्र तक के जाप की बात कही है। पर मन्त्रराज तो 'ॐ रामाय नमः' यह षडक्षर ही है। इसी मन्त्र में अलग-अलग बीज जोड़ने से विविध मन्त्र बनते हैं। बीजाक्षरों की व्याख्या भी अन्त में दी गई है। यह उपासना-प्रधान उपनिषद् है।

शान्तिपाठः

ॐ भद्रं कर्णेभिः ...... देवहितं यदायुः। (पूर्ववत्)
ॐ शान्तिः शान्तिः शान्तिः ॥

इसका हिन्दी रूपान्तर पूर्व में (अथर्वशिर उपनिषद् में) द्रष्टव्य है।

प्रथमोऽध्यायः

सनकाद्या योगिवर्या अन्ये च ऋषयस्तथा।
प्रह्लादाद्या विष्णुभक्ता हनूमन्तमथाब्रुवन् ॥1॥
वायुपुत्र महाबाहो किं तत्त्वं ब्रह्मवादिनाम्।
पुराणेष्वष्टादशसु स्मृतिष्वष्टादशस्वपि ॥2॥
चतुर्वेदेषु शास्त्रेषु विद्यास्वाध्यात्मिकेषु च।
सर्वेषु विद्यादानेषु विघ्नसूर्येशशक्तिषु ॥3॥
एतेषु मध्ये किं तत्त्वं कथय त्वं महाबल ॥4॥

सनकादि योगिश्रेष्ठ और अन्य ऋषियों ने तथा प्रह्लादादि विष्णुभक्तों ने हनुमान जी से कहा— 'हे वायुपुत्र ! हे महाबाहु ! अठारह पुराणों में, अठारह स्मृतियों में, चार वेदों में, अन्य सभी शास्त्रों में, सभी विद्याओं में, सभी आध्यात्मिक विद्यादानों में और विघ्नेश, सूर्य और शक्ति में—इन सभी में ब्रह्मवादियों के लिए कौन-सा तत्त्व (उपास्य) है। हे महाबल ! वह आप हमें बताइए।'

हनूमान् होवाच—
भो योगीन्द्राश्च ऋषयो विष्णुभक्तास्तथैव च।
शृणुध्वं मामकीं वाचं भवबन्धविनाशिनीम् ॥5॥
एतेषु चैव सर्वेषु तत्त्वं च ब्रह्म तारकम्।
राम एव परं ब्रह्म राम एव परं तपः।
राम एव परं तत्त्वं श्रीरामो ब्रह्म तारकम् ॥6॥

हनुमान ने कहा—'हे योगीन्द्रो !' हे ऋषियो ! हे विष्णुभक्तो ! आप सब मेरी संसार के बन्धनों को नाश करने वाली वाणी सुनिए। इन सभी में परमतत्त्व तो तारक ब्रह्म ही है। और वह परब्रह्म राम ही हैं। राम ही परम तप है। राम ही परम तत्त्व है। श्रीराम ही तारक ब्रह्म हैं।

वायुपुत्रेणोक्तास्ते योगीन्द्रा ऋषयो विष्णुभक्ता हनूमन्तं पप्रच्छुः—
रामस्याङ्गानि नो ब्रूहीति ॥7॥

वायुपुत्र के द्वारा इस प्रकार कहे गए वे योगीन्द्र, ऋषिलोग और विष्णुभक्त हनुमान जी से पूछने लगे—'हमें आप राम के अंग कहिए।'

हनूमान् होवाच—वायुपुत्रं विघ्नेशं वाणीं दुर्गां क्षेत्रपालकं सूर्यं चन्द्रं नारायणं नारसिंहं वायुदेवं वाराहं तत्सर्वान् मन्त्रान् सीतां लक्ष्मणं शत्रुघ्नं भरतं विभीषणं सुग्रीवमङ्गदं जाम्बवन्तं प्रणवमेतानि रामस्याङ्गानि जानीथाः। तान्यङ्गानि विना रामो विघ्नकरो भवति ॥8॥

तब हनुमान ने कहा—वायुपुत्र (हनुमान), गणपति, सरस्वती, दुर्गा, क्षेत्रपाल, सूर्य, चन्द्र, नारायण, नरसिंह, वासुदेव, वराह, सीता, लक्ष्मण, शत्रुघ्न, भरत, विभीषण, सुग्रीव, अंगद, जाम्बवान और प्रणव—इन सबको तुम राम के अंग के रूप में जानो। उन अंगों के जपादि किए बिना तो राम विघ्न करने वाले हो जाएँगे।

पुनर्वायुपुत्रेणोक्तास्ते हनूमन्तं पप्रच्छुः—आञ्जनेय महाबल विप्राणां गृहस्थानां प्रणवाधिकारः कथं स्यादिति ॥9॥
स होवाच—श्रीराम एवोवाचेति। येषामेव षडक्षराधिकारो वर्तते तेषां प्रणवाधिकारः स्यान्नान्येषाम्। केवलमकारोकारमकारार्धमात्रासहितं प्रणवमूह्य यो राममन्त्रं जपति तस्य शुभकरोऽहं स्याम्। तस्य प्रणवस्याकारस्योकारस्य मकारस्यार्धमात्रायाश्च ऋषिच्छन्दो देवता तत्तद्वर्णवर्णावस्थानं स्वरवेदाग्निगुणानुच्चार्यान्वहं प्रणवं मन्त्राद् द्विगुणं जप्त्वा पश्चाद्राममन्त्रं यो जपेत् स रामो भवतीति रामेणोक्तास्तस्माद्रामाङ्गं प्रणवः कथित इति ॥10॥

वायुपुत्र हनुमान के द्वारा इस प्रकार कहे जाने पर वे फिर से हनुमान को पूछने लगे—'हे अंजनीपुत्र ! ब्राह्मणों को और गृहस्थों को प्रणव का अधिकार कैसे होता है ?' तब उन्होंने कहा—यह बात तो श्रीरामजी ने स्वयं बताई है। जिन लोगों को षडक्षरमन्त्र का अधिकार है, उनको प्रणवाधिकार है ही, यह षडक्षर मन्त्र अनधिकारियों के लिए नहीं है। प्रणव—अकार, उकार और मकार के साथ अर्धमात्रा वाले प्रणव (ॐ कार) के साथ (चार मात्रा तक) जो मनुष्य षडक्षर राममन्त्र को जपते हैं, उनके लिए मैं कल्याणकारक होता हूँ। उस प्रणव का—अकार, उकार और मकार तथा अर्ध मात्रा वाले

ओंकार का—ऋषि, छन्द, देवता, उन-उन वर्णों का अवस्थान, स्वर, वेद, अग्नि आदि का उच्चारण करके प्रतिदिन प्रणाम करते हुए मन्त्र से दुगुना जाप करके बाद में जो राममन्त्र का जप करता है, वह स्वयं राम हो जाता है—ऐसा राम ने कहा है। इसलिए प्रणव राम का अंग है।

विभीषण उवाच—
सिंहासने समासीनं रामं पौलस्त्यसूदनम्।
प्रणम्य दण्डवद्भूमौ पौलस्त्यो वाक्यमब्रवीत् ॥11॥
रघुनाथ महाबाहो केवलं कथितं त्वया।
अङ्गानां सुलभं चैव कथनीयं च सौलभम् ॥12॥
श्रीराम उवाच—अथ पञ्च दण्डकानि पितृघ्नो मातृघ्नो ब्रह्मघ्नो गुरुहननः कोटियतिघ्नोऽनेककृतपापो यो मम षण्णवतिकोटिनामानि जपति स तेभ्यः पापेभ्यः प्रमुच्यते। स्वयमेव सच्चिदानन्दस्वरूपो भवेन्न किम् ॥13॥

विभीषण ने कहा—सिंहासन पर बैठे हुए, रावणविनाशक भगवान् राम को भूमि पर दण्डवत् प्रणाम करके पौलत्स्य (विभीषण) इस प्रकार वाक्य कहने लगा—'हे रघुनाथ ! हे महाबाहो ! आपने तो केवल अंगों की सामान्य बात कही है। अब उसका सुफल भी तो कहना चाहिए।' तब श्रीराम ने कहा—पाँच बहुत बड़े अपराधी माने जाते हैं—पिता का हत्यारा, माता का हत्यारा, ब्राह्मण का हत्यारा, गुरु का हत्यारा और अनेकानेक यतियों का हत्यारा। ऐसे अनेक पाप करने वाला भी यदि मेरे छियानबे करोड़ नामों का जप करता है, तो उन सभी पापों से मुक्त हो जाता है। वह स्वयं ही सच्चिदानन्दस्वरूप हो जाता है। क्यों नहीं ?

पुनरुवाच विभीषणः—तत्राप्यशक्तोऽयं किं करोति ॥14॥
स होवाचेमम्—कैकसेय पुरश्चरणविधावशक्तो यो ममोपनिषदं मम गीतां मन्नामसहस्रं मद्विश्वरूपं मदष्टोत्तरशतं रामशताभिधानं नारदोक्तस्तवराजं हनूमत्प्रोक्तं मन्त्रराजात्मकस्तवं सीतास्तवं च रामषडक्षरीत्यादिभिर्मन्त्रैर्यो मां नित्यं स्तौति मत्सदृशो भवेन्न किं भवेन्न किम् ॥15॥

इति प्रथमोऽध्यायः।

तब विभीषण ने फिर से पूछा—'उसमें अर्थात् जप करने में यदि मनुष्य अशक्तिमान हो, तो वह क्या करता है ?' तब उन्होंने (हनुमान जी ने) कहा—'हे कैकसीपुत्र ! उस पूर्वोक्त पुरश्चरणविधि करने की जिसकी शक्ति नहीं है, यदि वह मनुष्य मेरे द्वारा कही गई उपनिषत् को, मेरे सहस्र नाम को, मेरे विश्वरूप एक सौ आठ रामनाम को, नारद के द्वारा कहे गए स्तवराज को, हनुमान द्वारा कहे गए मन्त्रराजात्मक स्तवराज को, सीताजी के स्तवन को अथवा तो रामषडक्षर इत्यादि मन्त्रों को पढ़ते हुए मेरी प्रतिदिन स्तुति करता है, वह मेरे समान ही हो जाता है। क्यों न होगा ?

यहाँ प्रथम अध्याय पूरा हुआ।

❋

द्वितीयोऽध्यायः

सनकाद्या मुनयो हनूमन्तं पप्रच्छुः—आञ्जनेय महाबल तारकब्रह्मणो रामचन्द्रस्य मन्त्रग्रामं नो ब्रूहीति।
हनूमान् होवाच—
वह्निस्थं शयनं विष्णोरर्धचन्द्रविभूषितम्।
एकाक्षरो मनुः प्रोक्तो मन्त्रराजः सुरद्रुमः ॥1॥

तब सनकादि मुनियों ने हनुमान से पूछा—'हे अंजनीपुत्र ! हे महाबलशाली ! तारक ब्रह्म ऐसे रामचन्द्र के एकाक्षरादि मन्त्रग्राम (मन्त्रसमूह) को हमें कहिए।' तब हनुमान ने एकाक्षर से लेकर बत्तीस अक्षर वाले मन्त्र तक के मन्त्रभेदों को अंगादिसहित बताते हुए पहले एकाक्षर मन्त्र को बताया कि विष्णु का शयनरूप वह्निस्वरूप जो शेष है, वह रेफ (**'र'** कार) है। वह विष्णु का शयनरूप होने से दीर्घ है अर्थात् **'रा'**कार है। उस पर अर्धचन्द्राकार बिन्दु लगा है। सब मिलकर **'राँ'** होता है। वही **'राँ'** एकाक्षर मन्त्र कहा गया है। वह कल्पवृक्ष के समान है। वह मन्त्रराज है।

ब्रह्मा मुनिः स्याद् गायत्रं छन्दो रामोऽस्य देवता।
दीर्घार्धेन्दुयुजाङ्गानि कुर्याद्वह्न्यात्मनो मनोः ॥2॥
बीजशक्त्यादिबीजेन इष्टार्थे विनियोजयेत्।
सरयूतीरमन्दारवेदिकापङ्कजासने ॥3॥
श्यामं वीरासनासीनं ज्ञानमुद्रोपशोभितम्।
वामोरुन्यस्ततद्धस्तं सीतालक्ष्मणसंयुतम् ॥4॥
अवेक्षमाणमात्मानमात्मन्यमिततेजसम्।
शुद्धस्फटिकसङ्कासं केवलं मोक्षकाङ्क्षया ॥5॥

इस एकाक्षर 'राँ' मन्त्र के ऋषि ब्रह्मा हैं, गायत्री छन्द है, देवता राम हैं। इस मन्त्र के दीर्घ रेफ के साथ अर्धेन्दु संयुक्त हुए रूप में, अर्थात् 'राँ' के रूप में करांगन्यास करना चाहिए। इसका ध्यान-मन्त्र यह है—'सरयू नदी के तीर पर मन्दारवृक्ष के नीचे बनी हुई वेदिका पर बिछाए गए कमलासन पर वीरासन में बैठे हुए, वामा की जांघ पर हाथ रखे हुए, सीता और लक्ष्मण के साथ में रहे हुए, स्वयं को देखते हुए, अपने में असीम तेजोयुक्त और शुद्ध स्फटिक जैसे वे हैं।' इस प्रकार मोक्ष की आकांक्षा से (ध्यान करके मन्त्रजाप करना चाहिए)—

चिन्तयन् परमात्मानं भानुलक्षं जपेन्मनुम्।
वह्निर्नारायणेनाढ्यो जाठरः केवलोऽपि च ॥6॥
द्व्यक्षरो मन्त्रराजोऽयं सर्वाभीष्टप्रदस्ततः।
एकाक्षरोक्तमृष्यादि स्यादाद्येन षडङ्गकम् ॥7॥
तारमायारमाऽनङ्गवाक्स्वबीजैश्च षड्विधः।
त्र्यक्षरो मन्त्रराजः स्यात् सर्वाभीष्टफलप्रदः ॥8॥
द्व्यक्षरश्चन्द्रभद्रान्तो द्विविधश्चतुरक्षरः।
ऋष्यादि पूर्ववज्ज्ञेयमेतयोश्च विचक्षणैः ॥9॥

पूर्वमन्त्र में वर्णित स्वरूप का ध्यान करते हुए मोक्ष की आकांक्षा से इसका एक लाख जप करना

